२३।१] "अरण्यमियात्ततोन पुनरेयात्, "संन्यस्याग्निं न पुनरावर्तयेत्" (य.का.) इति नैष्ठिकवनस्थविरक्तानां नियमात्। तस्मादाश्रमाच्च्युतानां नैष्ठिकादीनां न विद्यायामधिकारः ॥४०॥

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ।३।४।४१।

नैष्ठिकाद्यधिकारोक्तप्रायश्चित्तमप्येषु न सम्भवति। यतस्तेषां स्वाश्रमधर्मात्पतनं स्मर्यते। "आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः।

वर्तयेत् 'इत्यादिना शास्त्रेण तेषां नियमनात्। प्रायश्चित्तादिना विशोध्य नैष्ठिकस्य पुनराश्रमविधानं तु न नैष्ठिकब्रह्मचारीविषयकमपितूपकुर्वाणविषयकमेव। तत आश्रमपरिभ्रष्ठानां नैष्ठिकादीनामाश्रमाभावाद् ब्रह्मविद्यायां नास्त्येवाधिकार इति संक्षेपः ॥४०॥

विवरणम्—ननु यदा गृहस्थः पतितः प्रायश्चित्तेन विशुद्ध्यति तथैव पतितो नैष्ठिकादिराधिकारिकप्रायश्चित्तादिना विशुद्धो ब्रह्मविद्यायामधिकृतो भवेदित्याशङ्कां निराकर्तुं सूत्रव्याख्यानतउपक्रतते "नैष्ठिकाद्यधिकारोक्त" इत्यादि। नैष्ठिकाद्यधिकारोक्तमपि प्रायश्चित्तं तेषां न संभवति आवे नहीं" अग्नि का न्यास अर्थात् परित्याग करके पुनः आश्रमान्तर में न आवे" इस प्रकार नैष्ठिकवनस्थ तथा संन्यासियों का नियम देखने में आता है इस लिए स्वकीय आश्रम परिभ्रष्टों को अनाश्रमी होने से ब्रह्म विद्या में अधिकार नहीं ॥४०॥

सारबोधिनी—नैष्ठिकवानप्रस्थ संन्यासियों के लिये जो प्रायश्चित का विधान है। 'वह स्वाश्रमी ब्रह्मचारी के लिए नहीं है। किन्तु उपकुर्वाण विषयक है। इस बात को बतलाने के लिए उपक्रम करते हैं "नैष्ठिकाद्यधिकारोक्त" इत्यादि। नैष्ठिकादि ब्रह्मचारो के अधिकारोक्त जो प्रायश्चित्त का कथन है वह इन सबके विषय में संभवित नही हो सकता है। क्योंकि स्वाश्रम धर्म से परि भ्रष्ट का तो पतन ही सुना गया है संहिता स्मृत्यादिक में "सन्यासिनो

प्रायश्चित्तं न पश्यामि" [आग्नेयः १६।५।२३।] तदत्राचार्याः "नस्त्रियं परिगृह्णीयाद् विरक्तो वैष्णवः क्वचित्। मन्वादिस्मृतिशास्त्रेषु तन्निषेधस्य शासनात् ।। विवाहे तु कृते सस्यादारूढपतितो ध्रुवम् । आरूढपतितस्यार्थे प्रायश्चित्तं नविद्यते ।। प्रच्युतो नैष्ठिकाद्धर्मादात्महापि प्रकीर्तितः । मठाध्यक्षत्वदोक्षादौ बहिष्कार्यो स यत्नतः ।। व्यासेन ब्रह्मविद्यातो बहि-

---

येन स कदाचित् शुद्धिमियात् । यदपि तेषां प्रायश्चित्तविधानं तन्न नैष्ठिकादिपरकं किन्तूपकुर्वाणब्रह्मचारिविषयकमेव । तदुक्तं स्मृतौ "आरूढो नैष्ठिकं धर्मम्" नैष्ठिकधर्ममारूढोद्विजातिर्यदि कारणवशात् ततः परिच्युतोभवेत्तदातस्य प्रायश्चित्तं नास्ति येन कृतप्रायश्चित्तः स आत्मघाती विशुद्धोभवेदित्याग्नेयवचनात् "विवाहेतु कृते स स्यादारूढपतितो ध्रुवम्,आरूढपतितस्यार्थे प्रायश्चित्तं नविद्यते" इत्याद्याचार्योक्तेश्च यत्तुतेषां प्रायश्चित्तविधानं तत्तु=उपकुर्वाणब्रह्मचारिणमभिप्रेत्योक्तं नतु नैष्ठिकब्रह्मचारिणम् । द्विविधोहि ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च । तत्र प्रायश्चित्ता- गृहस्थत्वे त्वारूढपतनं भवेत् । आरूढपतितस्यात्र प्रायश्चित्तं नविद्यते" इह भ्रष्टाधिकारोहि गर्हितो मान वर्जितः । मृतोहि नरकं गच्छत्यारूढपतितो यतिः ।। ब्रह्मचर्यव्रतं रक्ष्यं गृहस्थान्याश्रमन्त्रये, तदभावेहि तत्स्थानामारूढपतनं भवेत् । भ्रष्टाश्चाश्रमधर्मेभ्य आरूढपतिताश्चये । स्वाधिकाराद्बहिष्कार्या नृपैश्च- धार्मिकैश्चते" (वशिष्टसहिता) जो द्विजातिक नैष्ठिक धर्म का स्वीकार करके यदि कारणवस से प्रच्यवित हो जाय तो उसका कोई प्रायश्चित नहीं है । जिसमें कि वह आत्महा विशुद्ध होवे" इत्यादि प्रकार से प्रायश्चित्त के अभाव का प्रतिपादन किया है। अधिकारिक प्रायश्चित्त का जो विधान है वह उपकुर्वाण ब्रह्मचारी विषयक है । नतु नैष्ठिक ब्रह्मचारी विषयक है । ब्रह्मचारी दो प्रकार के होते हैं उपकुर्वाण तथा नैष्ठिक । जो यथा नियम यथा समय गुरुकुल में वेदाध्ययन करके आश्रमान्तर का स्वीकार करे वह प्रथम है ।

स्कारोऽस्य सूचितः। शिष्टा यज्ञादिकार्येषु वर्जयन्ति तथा विधम् ॥ विरक्तै वैष्णवैस्तमादारूढपतितो नहि। व्यवहारेषु योक्तव्यस्तत्संसर्गोऽपि पापकृत्॥" (श्रीवैष्णवमताब्जभास्करः ५।५-६-७-८-९।) इत्यतः पतितस्य प्रायश्चित्तायोगात्। आधिकारिकं प्रायश्चित्तन्त्वौपकुर्वाणिकं बोध्यम् ॥४१॥

उपपूर्वमपीत्वेके भावमशनवत्तदुक्तम् ।३।४।४२।

नैष्ठिकादीनां ब्रह्मचर्यात्प्रच्युतावुपपातकमस्ति तत्र प्रायश्चित्ताभावमे-

---

दिना प्रथम एव संशुद्धो भवति. द्वितोयस्तु कारणवशात्कदाचित्पतितो-भवेत्तदासर्वदा पतित एव भवति नतु कदाचिदपि विशुद्धो भवति येन कदाचिद् विशुद्धः सन् ब्रह्मविद्यायामधिकृतो भवेत् "परदारा नगन्तव्याः परधर्मो भयावहः। कदाचिदपिनो कुर्याद्विरक्तो हि गृहस्थताम्। यतस्तस्याश्चशास्त्रेषु प्रायश्चित्तं नविद्यते ॥" (श्रीवैष्णवधर्मपीयूषम् २३।२४) इत्याचार्योक्तेः स्वाश्रमपरिभ्रष्टानामेतेषामनाममित्वान्न कथमपि तत्र ब्रह्मविद्यायामधिकारो भवति। आधुनिकपतितसंन्यासिवदितिबोध्यम्। विशेषस्त्वन्यत्रानुसंधेयः ॥४१॥

विवरणम्—प्रकृतविषये मतान्तरं दर्शयति "उपपूर्वमपीत्यादि" एके आचार्याः नैष्ठिकादीनां ब्रह्मचर्यात् प्रच्युतौ न महापातकत्वमपितूपपातकत्व

तथा यावज्जीवन आचार्य कुल में निवास करके शरीर को छोड़ता है वह नैष्ठिक ब्रह्मचारी कहलाता है। उसमें किसी कारण से परिभ्रष्ट हो जाय तो प्रायश्चित्त करके विशुद्ध होता है वह प्रथम है। और द्वितीय यदि किसी कारण से विभ्रष्ट हो जाता है तो वह पतित हो रह जाता है उसका कोई भी प्रायश्चित्त नहीं है। ऐसा बादरायण तथा जैमिनी आदि सबपूर्वाचार्यों का मत है परिभ्रष्ट नैष्ठकादि का ब्रह्मविद्या में अधिकार नहीं है ॥४१॥

के धर्मविदो मन्यन्ते । यथा मध्वशनेनैष्ठिकोपकुर्वाणयोरुभयोरपि प्रायश्चित्तेन शुद्धिस्तद्वच्छुद्धौ स्यादेव विद्याधिकारः । तदुक्तम्—"उत्तरेषां चैतदविरोधि" [गौ० १।३।४] इति ॥४२॥

बहिस्तूभयथापि स्मृतेराचाराच्च ।३।४।४३।

तुना मतव्यावृत्तिः । नैष्ठिकादेरुपपातकित्वे महापातकित्वे वोभयथापि ब्रह्मोपासनलक्षणविद्यातो बहिर्भाव एव । "प्रायश्चित्तं न पश्यामि

मेवमन्यन्ते तत्र प्रायश्चित्तकरणेन विशुद्धौ जातायां विद्याधिकारोभवत्येव । यथामधुभक्षणेद्वयोरपिब्रह्मचारिणोः प्रायश्चित्ताद्विशुद्धिर्जायते तद्वत् प्रकृतेऽपिभवतीति वृत्तेर्भावः ॥४२॥

विवरणम्—स्वाश्रमपरिभ्रष्टनैष्ठिकानामुपपातकं महापादकं वा भवतु कृतप्रायश्चित्ता वा भवन्तु तथापि तेषां ब्रह्मविद्यायां नास्त्यधिकारः "प्रायश्चित्तं न पश्चामी" त्यादिस्मृतेः । तथा शिष्टानामाचारोऽपि यत्

सारबोधिनी—नैष्ठिक ब्रह्मचारी स्वाश्रम से परिभ्रष्ठ होने पर पतित हो जाता है इसलिए ब्रह्मविद्या में इन लोगों का अधिकार नहीं है ऐसा जो पूर्वसूत्र में कहा गया है इस विषय में मतान्तर बतलाते है "उपपूर्वमपीत्यादि" नैष्ठिक ब्रह्मचारी यदि ब्रह्मचर्य से पतित हो तो उसको महापातक नहीं है किन्तु उपपातक है । अतः इस विषय में एकधर्मवित् कहते हैं कि इसका प्रायश्चित्त होता है । जैसे मधुभक्षण में नैष्ठिक उपकुर्वाण इन दोनों को प्रायश्चित्त कहा गया है । तथा उस प्रायश्चित को करने से उन दोनों को शुद्धिता होती है । शुद्ध होने पर ब्रह्मविद्या में पतित नैष्ठिकों का अधिकार हो जाता है । इसविषयको "उत्तरेषांतदविरोधि" इस सूत्र में गौतमने स्पष्ट किया है अतः उपपातकत्वेन प्रायश्चित्तहोजानेसे पतितोंका ब्रह्मविद्या में अधिकार है ऐसा एक देशीमत है ॥४२॥

सारबोधिनी—स्वाश्रम से परिभ्रष्ट जो नैष्ठिक ब्रह्मचारीप्रभृतिक हैं उनका

येन शुध्येत्स आत्महा" [आग्येने० १६।५।२३]' वसन्नावसथेभिक्षुर्मैथुनं यदि सेवते । तस्यावसथनाशः स्यात्कुलान्यपि हि कृन्तति" [दक्ष० ७।४१।] "सन्यासिनो गृहस्थत्वे त्वारूढपतनं भवेत् । आरूढपतनस्यात्र प्रायश्चित्तं नविद्यते ॥३९॥ ब्रह्मचर्यव्रतं रक्ष्यं गृहस्थान्याश्रमत्रये । तदभावे हि तत्स्थानादारूढपतनं भवेत् ।४१॥ (वशिष्ठसंहिता) "विवाहेतु कृते सस्यादारूढपतितो ध्रुवम् । आरूढपतितस्यार्थे प्रायश्चित्तं नवि-

---

तान् "व्यासेन ब्रह्मविद्यातो बहिष्कारोऽस्य सूचितः । शिष्टा यज्ञादिकार्येषु वर्जयन्ति तथाविधम् ॥ (श्रीवैष्णवमताब्जभास्करः ५।८) इत्यादिरूपेण यज्ञादिकर्मणि न प्रवेशयन्तीत्याशयेनोपक्रमते "तुनामत व्यावृत्तिरित्यादि बहिस्तूभयथापीत्यादि सूत्रघटकस्तु शद्वः पूर्वपक्षं व्यावर्तयति । नैष्ठिकादि ब्रह्मचारिणामुपपातकंवा भवतु उभयथापि तेषां ब्रह्म-
उपपातकहो अथवा महापातक दोनो प्रकारसे तथा कृत प्रायश्चित्त हो अथवा अकृत प्रायश्चित्तक उभयथा. वे ब्रह्मविद्याधिकार से बहिर्भूत ही हैं । क्योंकि "प्रायश्चित्तं न पश्यामि" इत्यादि शास्त्रो में उनका सर्वथा निषेध किया गया है। तथा शिष्टों का आचार भी देखने में आता है कि तादृश व्यक्ति को शिष्ट महापुरुष यज्ञादिक कर्म में प्रविष्ट नही करते हैं" इस अभिप्राय से सूत्र व्याख्यान करने के लिए उपक्रम करते हैं "तुना पक्ष व्यावृत्तिरित्यादि" इस सूत्र में जो तुशद्व है वह पूर्वपक्ष का निराकरण परक है । आश्रम परिभ्रष्ट नैष्ठिक प्रभृतिक उपपातकी हो अथवा महापातकी हो उभयथा उपासना लक्षण ब्रह्म विद्या में उनका बहिर्भाव ही है । क्योंकि तादृश प्रायश्चित्त का शास्त्र में श्रवण नहीं है जिससे कि वह आत्मघाती विशुद्ध हो तथा स्वकीय आश्रम में निवास करता हुआ भिक्षुक यदि मैथुन सेवन करता है तब उसका आश्रमित्व विनष्ट हो जाता है । तथा वह अपने कुल आश्रम के मूल को काट देता है" इत्यादि स्मृति प्रमाणों से शिष्ट लोक परिभ्रष्ट नैष्ठिक को यदि

द्यते ॥ (श्रीवैष्णावमताब्जभास्करः ५।६) इत्यादिस्मृतेः कृतप्रायश्चित्तानपि तान् शिष्टा यागादिकर्मसु वर्जयन्ति । भिक्षुश्च विरक्ताश्रम्येव । अतो नास्त्येव तेषां ब्रह्मविद्यायामधिकारः ॥४३॥

इति श्रीरघुवरीयवृत्तौ तद्भुताधिकरणम् ॥१०॥

स्वाम्यधिकरणम् ॥११॥

स्वामिनः फलश्रुतेरित्यात्रेयः ।३।४।४४।

उद्गीथाद्युपासनानि यजमानकर्तृकाण्युतर्त्विक्कर्तृकाणीति संशयः । तत्र पूर्वः पक्षः । स्वामिनो यजमानस्यैव फलश्रुतेस्तत्कर्तृकाणीति आत्रेयो मन्यते ॥४४॥

विद्यातोबहिर्भाव एव "प्रायश्चित्तमित्यादि स्मृतिषु तथा दर्शनात् । एवं कृत प्रायश्चित्तानामप्येषां यागादि कर्मणि न प्रवेशयन्ति शिष्टाः किन्तु तेषां सर्वत्र बहिर्भाव एव भवतीति सूत्रवृत्त्योः संक्षिप्ताभिप्रायः ॥४३॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ श्रीरघुवरीय वृत्ति विवरणे तद्भुताधिकरणम् ॥१०॥

विवरणम्=उद्गीथाद्यङ्गोपासनानि यजमानानुष्ठेयानि अथवा ब्राह्मणेन निर्वर्त्यानि इति संशयः । तत्र "शास्त्रदेशितं फलमनुष्ठातरि" इति शास्त्रात् यः कर्त्ता सफलभोक्तेतिन्यायाद् यजमानेनैवानुष्ठेयानीति

प्रायश्चित्त किया भी हो तथापि यागादि कर्म में प्रविष्ट नहीं करते हैं । यहाँ भिक्षुक शब्द का अर्थ विरक्ताश्रमी है । इसलिए स्वाश्रम परिभ्रष्ट नैष्ठिक प्रभृतिक को ब्रह्मविद्या में अधिकार नहीं है । प्रायश्चित्त से विशुद्ध ब्रह्मचारी का प्रवेश विद्या में है । यह जो कथन है वह उपकुर्वाण ब्रह्मचारी के लिए है । अतः स्वाश्रम भ्रष्ट का उपासना लक्षण ब्रह्मविद्या में अधिकार नहीं है यह सिद्धहुआ ॥४३॥

सारबोधिनी—जो यह अङ्गश्रितोद्गीथादिक उपासना है वह यजमान कर्तृक है या ऋत्विजादिकर्तृक है । अर्थात् यह सब उपासना यजमान स्वयं करें अथवा ब्राह्मणों से ऐसा संशय होता है । इसमें आचार्य

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ।३।४।४५।

समाधत्ते ऋत्विक्कर्मोद्गीथाद्युपासनम् । यतो यजमानेनर्त्विक् परिक्रियते । स्वफलप्राप्तिसाधनभूतसाङ्गक्रतुसम्पादनाय परिक्रीतर्त्विगनुष्ठितस्यापि क्रतोः फलं यजमानगाम्येवेति न फलश्रुतेरपि विरोधः ॥४५॥

पूर्वपक्षं दर्शयितुमुपक्रमते "उद्गीथाद्युपासनानीत्यादि । यानीमान्यङ्गाश्रितोद्गीथोपासनादिकानि तानि यजमानेन संपादनीयानि अथवा ऋत्विग्भिर्विधेयानीति संशयः । भवति तत्र पूर्वपक्षः उपासनस्वामिनो यजमानस्यैवोपासनजनितफलभोक्तृत्वश्रवणेन यः करोति स एव फलभोक्तेति लौकिकन्यायात् । शास्त्रदेशितं फलमनुष्ठातरीतिशास्त्रे नियमात् यजमानकर्तृकाण्येवतान्युपासनानीत्यात्रेय आचार्याभिमतमिति पूर्वपक्षः ॥४४॥

विरागम्—पूर्वसूत्रकृतपूर्वपक्षस्य समाधानंदातुमुपक्रमते "समाधत्ते इत्यादि । यद्यपि उद्गीथाद्युपासनमृत्विजासंपादितं भवति तथापितत्कर्म यजमानसंपादितमेव कुतः ! दक्षिणायास्तावत्कालं ब्राह्मणः परिक्रीतो भवति' परिक्रीतेन तेन ब्राह्मणेन यद्यत्कृतं भवतितत्सर्वं यजमानकृतमेवेति । अतो ब्राह्मणादि कृतमपि कर्म यजमानेनैव कृतमिति यज-
आत्रेय कहते हैं जो कार्य करता है वही फल का भोक्ता होता है ऐसा लौकिक न्याय है तथा जो शास्त्र प्रदर्शित कर्म है उसका फल अनुष्ठाता को ही मिलता है । इत्यादि प्रमाण से सिद्ध होता है कि यजमान कर्तृक ही है ॥४४॥

सरबोधिनी—पूर्वसूत्र कृत जो पूर्वपक्ष है उसका समाधान करने के लिए तथा उत्तर सूत्र का अभिप्राय को अभिव्यक्त करने के लिए उपक्रम करते हैं "समाधत्ते" इत्यादि । यद्यपि उद्गीथादिक अङ्गाश्रितोपासन ऋत्विक् का कर्म है । अर्थात् यजमानेतर ऋत्विक् से संपाद्यमान होता है तथापि वह यजमान कर्म है अर्थात् यजमान कर्तृक ही है ऐसा मानना चाहिए । क्योंकि यावत् काल पर्यन्त कर्म किया जाता है तावत् काल के लिए यजमान से ऋत्विक्

सहकार्यन्तरविध्यधिकरणम् ॥१२॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ।३।४।४६।

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यंच

मान एव फलं प्राप्नोति । अतो न कर्तृत्वफलभोक्तृत्वयो वैधिकरण्यशङ्का भवतीति औडुलोमिराचार्यो मन्यते । तस्मान्न कोऽपि पूर्वापरयोर्विरोधो जायते प्रकृतमतमेव सूत्रकृन्मतमितिज्ञेयम् ॥४५॥

इति जगद्गुरु श्रीरामानन्दाचार्य कृतौ रामप्रपन्नाचार्य श्रीरघुवरीय वृत्ति विवरणे स्वाम्यधिकरणम् ॥११॥

विवरणम्—बृहदारण्यकश्रुतौ "तस्मादब्राह्मणः पाण्डित्यं निर्विद्य" इत्यादिकं श्रूयते । तत्र मौनस्य विधानमनुवादोवेति संशयः । तत्र मौन दक्षिणा द्वारा परिक्रीत हो जाता है । अतः कर्मफल प्राप्ति के लिए साधनीभूत अङ्ग सहित कर्मका संपादन के लिए खरीदा गया जो ऋगादिक ब्राह्मण समुदाय उनसे संपादित जो याग तादृश याग का जो फल है वह फल यजमानगत ही होता है । इसलिए फलश्रुति में कोई भी विरोध नहीं होता है । अर्थात् यद्यपि कर्म को यजमानेतर ब्राह्मण संपादित होने से कर्तृत्व फलभोक्तृत्व का वैयधिकरण्य प्रतिभासित होता है । तथापि यजमान से दक्षिणा द्वारा परिक्रीत ऋत्विक् कृत कर्म का फलभोक्ता यजमान के होने से वैयधिकरण्य नहीं होता है अपितु सामानाधिकरण्य ही होता है । इसलिए कोई भी पूर्वापर विरोध नहीं है । ऐसा औडुलोमी आचार्य का मत है और यही मत सिद्धान्त सिद्ध भी है । अन्यथा मात्र यजमान से संपादन असंभव होने से अश्वमेधादिक याग प्रतिपादक शास्त्र का प्रामाण्यभञ्जित हो जायगा तथा उन सबका उपदेश भी व्यर्थ हो जायगा ॥४५॥

सारबोधिनी-बृहदारण्यक श्रुति में "तस्मादब्राह्मणः पाण्डित्यं निर्विद्य" "ब्राह्मण पाण्डित्य को प्राप्त करके बाल्य रूप से रहे तथा बाल्य पाण्डित्य को

पाण्डित्यं च निर्विद्याथ मुनिः" [बृ० ३।५।१।] अत्र विद्यासहकारितया मौनमनूद्यत उत विधीयत इति संशयः। "अथ मुनिरित्यत्र विधिशब्दाभावान्मौनस्य ज्ञानविशेषाज्ज्ञानस्य च पूर्वं विधानादत्र मौनमनुद्यत इति पूर्वः पक्षः। अत्राभिधीयते—तद्वतो विद्यावतः पाण्डित्य बाल्यवत्तृतीयमिदमपूर्वं विद्यासहकार्यन्तरं मौनं विधीयते। पक्षेण मुनिशब्दस्य मानसजपादिवदन्तःकरणधर्मत्वेन प्रकृष्टमननात्मके निधिध्यासने प्रसिद्धत्वादाश्रमविध्यादिवदेवात्र निदिध्यासनात्मकस्य मौनस्य विधिः ॥४६॥

विधायकप्रत्ययाभावात मौनस्य न विधानं किन्तु पूर्वप्रदर्शितज्ञानस्यानुवादमात्रमेवेति पूर्वपक्षः। उत्तरस्तु निदिध्यासनात्मकस्य मौनस्य पूर्वापेक्षया बिलक्षणतया प्रकारान्तरेणाप्राप्तस्य विधिरेवेति दर्शयितुमुपक्रमते "तस्माद् ब्राह्मणः" इत्यादि। तत्र विद्यायाः सहकारितया मौनस्यानुवादो विधानं वेति संशयः। मुनिरित्यत्र विधायकप्रत्ययाभावादनुवाद एव न तस्य विधिरिति पूर्वपक्षः। बाल्यपाण्डित्यवत् तृतीयस्य मौनस्यविधिरेव। निदिध्यासनलक्षणस्याप्राप्तत्वाधित्युत्तरमितिदिक् ॥४६॥

प्राप्त करके मुनि होवे" इस तरह से सुनने में आता है। इसमें पण्डित्यवत् मौन का विधान है अथवा मौन का अनुवाद है। ऐसा संशय होता है। इस प्रकार संदिग्धवस्तु का निश्चय करने के लिए उपक्रण करते हैं "तस्माद् ब्राह्मणः" इत्यादि यहां विद्या के सहकारी रूप से मौन का अनुवाद होता है। अथवा मौन का विधान है। ऐसा संशय होता है। इसमें पूर्व पक्षवादी करते हैं कि "मुनिः" यहाँ विधायक कोई प्रत्यय नहीं है। और मौन को ज्ञान विशेष रूप होने से तथा सामान्य रूप से ज्ञान का पूर्व विधान हो गया है तब प्रकृत में मौन का अनुवादमात्र है। इस प्रश्न का उत्तर सूत्र से करते हैं। विद्यावान् उपासक को बाल्य पाण्डित्य की तरह तृतीय यह प्रमाणान्तर से अप्राप्त विद्या का सह कारीपाण्डित्यादिक से भिन्न विद्या सहकारी मुनित्व का विधान ही किया जाता

कृत्स्नभावात्तु गृहिणोपसंहारः ।३।४।४७।

अविशेषेण कृत्स्नेष्वाश्रमिषु विद्यायाः सद्भावाद् गृहस्थेनोपसंहारः "अभिसमावृत्य कुटुम्बे शुचौ देशे" इत्यारभ्य "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते" [छा० ८।१५।१] इत्येतत्सर्वाश्रमिपरः । विद्यानिष्ठगृहिणोऽपि ब्रह्मावाप्तिः किमुत विरक्ताश्रमिभ्य इति ॥४७॥

विवरणम्=ननु यदीयं ब्रह्मप्राप्तौ सादनीभूताब्रह्मविद्या सर्वाश्रमि साधारणा मौनादि सहकृता समुत्पद्यते तदा "सखल्वेवं वर्तयन्" इत्यादिना गृहस्थाश्रमेणैवोपसंहारः कथं कृत इत्याशङ्कांनिवर्तयितुमाह "कृत्स्नभावात्तु" इत्यादि सूत्रम् । अत्र तु शब्दः पूर्वपक्षनिराकरणपरकः । यदा खलु सर्वाश्रमिषु साधारणो विद्यायाः सद्भावः तदा गृहस्थाश्रमित्वेनोपसंहारोयो विद्यते स उपलक्षकः सन् सर्वाश्रमित्वेनोपसंहरति । यदाखलु गृहस्थानामपि विद्या प्राप्तिस्तदा का कथा विरक्ताश्रमनिष्ठानामितिकै-

है । एक पक्ष में मुनिशब्द मानसजपादि के समान अन्तः करण का धर्म है । अतः प्रकृष्ट मनन लक्षण निदिध्यासन में प्रसिद्ध आश्रम विधि के समान यहाँ निदिध्यासन लक्षण मौन का विधान ही है किन्तु अनुवाद नहीं । क्योंकि प्राप्त प्रापक को अनुवादक कहते हैं । प्रकृत में यह मनन पूर्व प्राप्त नहीं है किन्तु अपूर्व है । विशेष विवरण भाष्य में देखें ॥४६॥

सारबोधिनी—यदि गृहस्थादिक सभी आश्रमों में मौन सह कृत ब्रह्म प्राप्ति लक्षण मोक्ष में साधनीभूता ब्रह्म विद्या का उपदेश है तब "स खल्वेवं वर्तयन्यावदायुषम्" इत्यादि प्रकरण से गृहस्थाश्रम निष्ठत्वेन उपसंहार किस तरह से किया गया है" इस शङ्का का निराकरण करने के लिए उपक्रम करते हैं "अविशेषेण" इत्यादि । जब समान रूप से सभी आश्रमियो में ब्रह्म विद्या का सद्भाव है जो ब्रह्मविद्या मोक्ष का कारण है । तब गृहस्थाश्रम को लेकर के

मौनवदितरेषामप्युपदेशात् ।३।४।४८।

"तस्माद् ब्राह्मणा" इति वाक्ये "अथ भिक्षाचर्यं चरन्ति" [बृ० ३।५।१।] इति विरक्तधर्मेणोपसंहारोऽखिलाश्रमधर्मसंग्रहार्थः । मौनवदितरेषां यज्ञाद्याश्रमधर्माणामुपदेशात् ।।४८।।

इति श्रीरघुवरीयवृत्तौ सहकार्यन्तरविध्यधिकरणम् ।।१२।।

मुतिकन्यायात् विरक्ताश्रमिणामपि ब्रह्मावाप्तिर्भवत्येवेति । एतत्सर्वमभिप्रेत्य "अविशेषेण कृत्स्नेष्वाश्रमिषु" इत्यादिना वृत्तिकारः प्रोक्तवान् ।।४७।।

विवरणम्-यथा अविशेषेण सर्वाश्रमिषु विद्यया: सद्भावेन गृहस्थे नोपसंहारस्तथैवान्यत्र विरक्ताश्रमिपरत्वेनोपसंहार: "तस्माद् ब्राह्मणा:" इति वाक्ये "भिक्षाचर्यं चरन्ति" इत्यादिना विरक्तधर्मेणोपसंहारः कृतः । सचोपसहारः सर्वाश्रमिपरक एवोपलक्षणतया. इत्येतद्दर्शयितुमुपक्रमते "तस्माद् ब्राह्मणा:" इति वाक्ये भिक्षाचर्यं चरन्ति" एवं जो समावर्तन करके पवित्र कुटुम्ब तथा पवित्र देश में" इत्यादि से लेकर के "वह इस प्रकार यावज्जीवन करता हुआ ब्रह्मलोक को प्राप्त करता है और पुनः उसका संसार में आवर्तन नहीं होता है" इस प्रकार गृहस्थाश्रमित्वेन जो उपसंहार वचन है वह सर्व आश्रमियों का उपलक्षणपरक है । जब विद्या निष्ठ गृहस्थ को भी विद्या द्वारा मोक्ष होता है । तब विरक्ताश्रमि को मोक्ष होगा इसमें तो कहना ही क्या है ? अर्थात् विद्योत्पत्ति द्वारा सन्यासाश्रमविरक्ताश्रमनिष्ठों को तो मोक्ष अवश्यमेव होगा ।।४७।।

सारबोधिनी—"तस्माद ब्राह्मणः" इस वाक्य में "अथभिक्षाचर्यं चरन्ति" इत्यादि क्रम से जो विरक्त धर्म से उपसंहार किया गया है वह अखिल धर्म के संग्रह के लिए किया गया है । मौन की तरह इतर जो यज्ञादिक आश्रम धर्म है उनका उपदेश होने से ।।४८।।

अनाविष्काराधिकरणम् ।।१३।।

अनाविष्कुर्वन्नन्वयात् ।३।४।४९।

प्रोक्तवाक्ये "बाल्येन तिष्ठासेत्" [बृ०] इति श्रूयते । तत्र बालस्य कर्मस्वाभाविकं सर्वं विदुषोपादेयमुत स्वभावानाविष्काररूपं विशिष्टं कर्मैवेति संशयः । बाल्येनेत्यविशेषेणोक्तत्वात्कामचारादिकं सर्वमुपादेयमिति पूर्वः पक्षः । सिद्धान्तस्तु—स्वमाहात्म्यानाविष्कार एव विद्यामन्वेतीति स एव ग्राह्यः । अन्येषां विद्याविरोधित्वेनान्वयायोगात् । तदेवोक्तं "नाविरतो दुश्चरितात्" [का०] इत्यादिभिः ।।४९।।

इति श्रीरघुवरीयवृत्तावनाविष्काराधिकरणम् ।।१३।।

प्रकारेण विरक्तधर्मेण य. उपसंहारः कृतः सचोपलक्षणतया सर्वेषां धर्माणामुपसंहारतयैव कृतः यतः इतरेषां यज्ञाद्याश्रमधर्माणां मौनवदेवोपदेश दर्शनादिति ।।४८।।

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य वृत्तौ श्रीरघुवरीय वृत्तिविवरणे सहकार्यन्तरविध्यधिकारणम् ।।१२।।

विवरणम्— 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इत्यादिब्रह्मज्ञानिनां स्वस्मिन् बालभावमाविष्करणीयमिति श्रूयते । तत्र बालकस्य सर्वमेवकर्म अनुकरणीयं यत्किञ्चिद्वेति संशयः । सर्वमेवानुकरणीयमविशेषादिति पूर्व पक्षः । विशेषमेव बालकर्मविदुषानुकरणीयमिति मानापमानादिकमेव संग्राह्यं न तु विद्या विरोधिकामचारादिकमनुकरणीयम् । उपमानोपमेयभावश्च यत् किञ्चिद्धर्मसादृश्यमादायैव

सारबोधिनी—प्रोक्त वाक्य में अर्थात् "तस्माद् ब्र ह्मणो पाण्डित्यंनिर्विद्य" इस वाक्य में "बाल्येन तिष्ठासेत्" ऐसा सुनने में आया है । उसमें बालक का जो कर्म है मानापमान रहितत्व स्वेच्छाचारित्वादिक उन सबका विद्वान् ग्रहण अर्थात् आचरण करें । अथवा स्वभाव का अनाविष्कार रूप जो विशिष्ट कर्म है उसीका आचरण करें, ऐसा सन्देह होता है । उसमें बाल्येन इसमें

॥ ऐहिकाधिकरणाम् ॥ ॥१४॥

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ।३।४।५०॥

किमिहैव जन्मनि विद्योत्पद्यते उत जन्मान्तरेऽपीति संशयः । अधि-

---

नतुसर्वधर्मसादृश्यमादाय तथा सति सादृश्यस्यैव कुत्रापि संभवाभावादि-त्याशयेनोपक्रमते "प्रोक्त वाक्ये "बाल्येन तिष्ठासेत्" इति श्रूयते" इत्यादि । तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति" श्रूयते । तत्र बालकस्य यत्कर्ममानापमानराहित्यं स्वेच्छा विहरणादित-त्सर्वमनुकरणीयं विशेषकर्मैवेतिसंशयः । तत्र बाल्येनेति सामान्य कथनात्सर्वमेवादेयमिति पूर्वपक्षः स्वोकीयमाहात्म्यस्यानाविष्कार एव विद्यानुकूल इति तस्यैव ग्रहणं कर्त्तव्य नतुविद्याविरोधिनो ग्रहणमिति सिद्धान्तः ॥४९॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ श्रीरघुवरीयवृत्ति विवरणेऽनाविष्काराधिकारणाम् ॥१३॥

विवरणम्— किमियं विद्या अनुष्ठितकर्मणा अस्मिन्नेवजन्मनि अर्थात् यच्छरीरावच्छेदेन कर्मकृतं तच्छरीरावच्छेदेन जायते शरीरान्त-

अविशेषेण कथन होने से काम चारादिक सर्व कर्म का आचरण करें इस प्रकार से पूर्वपक्ष होता है । इसमे सिद्धान्त वादी कहते हैं कि स्वभाव के अनावि-ष्कार का ही विद्या में अन्वय होने की संभावना होने से उसीका ग्रहण करना चाहिए । किन्तु एतदतिरिक्त जो स्वेच्छा चरणादिक धर्म है उनको विद्या विरोधी होने से तम प्रकाश के समान अन्वय असंभवित है । इस विषय को अन्यत्र भी कहा है "नाविरतोदुश्चरितात्" (का. २।२४) इत्यादि प्रकरण से विद्वान् उसी कर्म का संग्रह तथा आचरण करें जो विद्या विरोधि न हो, नवा लोकाचार विरुद्ध हो । अन्यथा स्वेच्छाचारित्व होने से तत्वज्ञानी तथातदितर में क्या विशेषता रहेगी ॥४९॥

सारबोधिनी—कर्म द्वारा होनेवाला जो विद्यारूपफल वह जिस शरीर से कर्म किया जाता है उसी शरीर से विद्योदय होता है । अथवा शरीरान्तर से वह फल प्राप्त होता है । एतादृश संशय को निराकरण करके सिद्धान्त में

मन्नेव जन्मनि विद्योत्पत्तीच्छयानुष्ठितकर्मभिरिहैव विद्योदयः स्यादिति पूर्वः पक्षः। सिद्धान्तस्तु अप्रस्तुते प्रबलकर्मान्तरप्रतिबन्धेऽनन्तरं विद्योदयफलं तदभावे त्विहैवेति। तद्दर्शनात्। "यदेव विद्यया करोति" इत्युद्गीथविद्यावतः कर्मणोऽप्रतिबन्धस्य दर्शनादनियम एव विद्योदयफलस्य ॥५०॥

श्रीरघुवरीयवृत्तावैहिकाधिकरणम् ॥१४॥

रावच्छेदेन वेति संशयः। इहैवफलं जायते कर्मणि प्रवृत्तिदर्शनादिहैवतत्फलेनापि भाव्यं कृष्यादिकर्मवदिति पूर्वपक्षाशयः। यद्याचरितंकर्मप्रतिबन्धरहितं भवेत् तदा इहैव तदीयफलं जायते कृष्यादिवदिति यदातु सप्रतिबन्धको भवेत्तदा जन्मान्तरेतदीयं फलं भवति वामदेवादिवदिति न कोपि नियमः इहैवपरत्रवेति सिद्धान्तं दर्शयितुमुपक्रमते "किमिहैवजन्मनीत्यादि" वृत्तिः। यच्छरीरावच्छेदेन कर्मकृतं तच्छरीरावच्छेदेनैवविद्यारूपं फलमुत्पद्यते. अथवा शरीरान्तरावच्छेदेनापीति संशयः अनुष्ठितकर्मणा. इहैवफलं जायतामितीच्छयाकर्मणि प्रवृत्तिदर्शनात् एतज्जन्मन्येवफलंस्यात् कृष्यादिवाणिज्यादिवदिति पूर्वपक्षाशयः। सिद्धाअनियम है इसका प्रतिपादन करने के लिए उपक्रम करते हैं "किमि हैव जन्मनि" इत्यादि। क्या इसी जन्म में विद्या की उत्पत्ति होती है अथवा जन्मान्तर में भी अर्थात् जिस शरीर से कर्म का अनुष्ठान किया जाता है उसी शरीर में विद्या लक्षण फल होता है अथवा शरीरान्तर में विद्या लक्षण फल प्रादुर्भूत होता है ऐसा संशय होता है इसी जन्म में मुझको विद्या हो इस इच्छा से अनुष्ठित कर्म से इसी शरीर में विद्या की उत्पत्ति होती है। कृषि वाणिज्यादिक कर्म की तरह। इसप्रकार से पूर्वपक्ष होता है इसमें सिद्धान्तवादी कहते हैं कि यदि प्रबल प्रतिबन्धक कर्मान्तर का सद्भाव रहता है तब तो वह कृत कर्म का जन्मान्तर में फलोदय होता है। यदि कोइ प्रतिबन्धक न रहे तब इस जन्म में ही विद्या रूप फल प्राप्त होता है। क्योंकि ऐसा देखने में

मुक्तिफलाधिकरणम् ॥१५॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ।३।४।५१।

किमुत्पन्नविद्यस्येहैव जन्मनि मुक्तिफलमुतजन्मान्तरेऽपीति संशयः तत्र तस्यां विद्योत्पत्ताविहैव मुक्तिफलमिति पूर्वः पक्षः सिद्धान्तस्तु यथै-

न्तस्तु– "अप्रस्तुत" इत्यादि । अप्रस्तुते प्रवलकर्मान्तरप्रतिबन्धकस्य-सत्वेविद्यमानतायां जन्मान्तरावच्छेदेन फलमुपजायते. तदभावेतुविद्य मानजन्मन्येवेति । यथा वामदेवस्य जन्मान्तरे फलं जातम्. अन्येषा वहूनामिहैवेति नकोपि नियम इति संक्षेपः ॥५०॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य श्रीरघुवरीयवृत्तौ विवरणे ऐहिकाधिकारणम् ॥१४॥

विवरणम्– ननु यस्मिन् जन्मनि विद्याया उत्पत्तिर्जायये तस्मिन्नेव जन्मनि विदुषो मोक्षफलं समुत्पद्यते अथवा जन्मान्तरे मोक्षो जायते इति संशयः। तत्र कारणसत्वे कार्यमवश्यं भवतीति नियमाद्यदैव यत्र विद्या संजाता तत्रैव जन्मनि मोक्षो नतु जन्मान्तरे विलंबे कारणाभावादिति पूर्वः पक्षः। सिद्धान्तस्तु सत्यपिकारणसद्भावे प्रतिबन्धकसत्वे-कार्यं न भवति. यथा दाहकारणवह्नीन्धनादिसत्वेऽपि प्रतिबन्धक चन्द्रकान्तमणिसत्वे दाहो न भवति । चन्द्रकान्तमण्यभावेतु दाहो जायते तथैव प्रकृते प्रवलप्रतिबन्धकाभावे यदा विद्यायाः सद्भावस्तदैव मो-

आया है। जैसे वामदेव को जन्मान्तर में फल प्राप्त हुआ है। तथा उद्दालकादि विद्यावान् को तो प्रतिबंधक का अभाव होने से इसी जन्म में फलोदय होता है। इसलिए इस विषय में अनियम है। कोई विशेष नियम नहीं कि इसी जन्म में फलोदय हो या पर जन्म में ॥५०॥

सारबोधनी–जिस महापुरुष को जिस जन्म में विद्या की उत्पत्ति होती है उसी जन्म में विद्या बल से मोक्ष रूप फल होता है अथवा तादृश विद्या

कस्मिन्नेव जन्मनि प्रबलकर्मप्रतिबन्धाभावस्तदभावो वाविद्योदयं तदनुदयञ्च कुरुतस्तथैवाविच्छिन्नस्मृतिसन्तानरूपायां विद्यायामिहैव मुक्तिः

क्षोऽन्यथा तु न तस्मिन् जन्मनि किन्तु जन्मान्तरेइति वेदान्तानियमएवेत्याशयेन सूत्रव्याख्यातुमुपक्रमते "क्रिमुत्पन्नविद्यस्यैव" इत्यादि। पुष्कलकर्मकारणसद्भावेनास्य पुरुषधौरेयस्य विद्या यत्र जन्मनि समुत्पन्ना. तस्मिन्नेव जन्मनि तस्य विद्यारूपकारणसद्भावे मोक्षात्मकफलं जायते अथवा जन्मान्रे अनुष्ठितवाजपेयादिवदिति संशयः तत्र कारणसमवधाने कारणात्कार्यस्यावश्य सद्भाव इति नियमात् यस्मिन् जन्मनि विद्या जातातस्मिन्नेव जन्मनि तस्य फलं जायते वाणीज्यादिकर्मवदिति पूर्वपक्षाशयः। सिद्धान्तस्तु यस्मिन् जन्मनि विद्या जायते तस्मिन् जन्मनि कश्चित्प्रतिबन्धकोन भवेत् तदा तत्रैव जन्मनि फलं मोक्षः प्रतिबन्धकसत्वेतु जन्मान्तरे मोक्षःकारणसद्भावादितः प्रकृतेप्यनियम एव। यथा सत्यपितन्तुतन्तुवायादिकारणकलापे प्रतिबन्धकसद्भावेपटोत्पत्तिर्न जायते. प्रतिबन्धकाभावे तु तेनैव कारणकलापेन पटादिकार्यसमुत्पद्यमानं भवतीति नियमाभावस्तद्वत् प्रकृतेऽप्य

केवल से तदग्रिम जन्म में मोक्ष रूप फल की उत्पत्ति होती है ऐसा संशय होता है। मोक्ष का कारण विद्या का इस जन्म में सद्भाव होने से उसी जन्म में मोक्ष रूप कार्य होगा नतु जन्मान्तर में क्योंकि विलम्ब का प्रयोजक कोई नहीं है ऐसा पूर्वपक्ष होता है। सिद्धान्तवादी कहते हैं कि जिस तरह एक ही जन्म में प्रबल प्रतिबन्धक कर्म का अभाव होने से विद्या का उदय होता है। और प्रतिबन्ध का भाव अर्थात् प्रतिबन्धक रहने से विद्या नहीं होती है। उसी तरह तैलधारावत अविच्छिन्न स्मरण रूप विद्या का सद्भाव से उसी जन्म में मोक्ष होता है। अन्यथा जन्मान्तर में मोक्ष होता है। तो विद्या की तरह मोक्ष फल में भी अनियम है। "स्मृतिलंभे" इस प्रकरण से कर्म ग्रन्थी के

फलमन्यथा जन्मान्तरेऽपीत्यनियमः। "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" [छा० ७।२६।२] इति कर्मग्रन्थिमुक्तिहेतोरवधृतेरिति ॥५१॥

इति मुक्तिफलाधिकरणम् ॥१५॥

इति श्रीमद्भगवद्रामानन्दाचार्यान्वय प्रतिष्ठितश्रीमदनुभवानन्दाचार्य
द्वारकेण महामहोपाध्यायाद्यनेकोपाधिविभूषितेन
जगद्गुरु श्रीरामानन्दाचार्यरघुवराचार्यवेदान्तके
सरिणा विरचितायां श्रीरघुवरीयवृत्तौ
तृतीयाध्यायस्य चतुर्थः पादः

नियम एवेति भावः। कुत एवं तत्राह 'तदवस्थावधृतेः" अर्थात् "स्मृतिलंभे सर्वग्रन्थीनां विप्रमोक्षः" इत्यादिना स्मृते ग्रन्थिमोक्षे प्रप्रिकारत्वावधारणात् विद्यामोक्षयोः कार्यकारणभावविचारोऽन्यत्रानुसन्धेय इति दिक् ॥५१।

इति मुक्तिफलाधिकरणम् ॥१५॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यपीठाचार्यजगद्गुरुरामानन्दाचार्यराम
प्रपन्नाचार्ययोगीन्द्रकृतौ श्रीरघुवरीयवृत्तिविवरणे तृतीयाध्यायस्य चतुर्थपादः ॥

अभाव में स्मरण की कारणता का निश्चय किया गया है। अतः प्रकृत में अनियम है प्रसंगोपात्त इस जन्म में भी मुक्ति हो सकती है जन्मान्तर में भी ॥५१॥

इति स्वामी रामेश्वरानन्दाचार्य कृत सारबोधिनी में तृतीयाध्याय का चातुर्थवाद
॥श्रीरामार्पणमस्तु॥

रामो ब्रह्म परात्परं श्रुतिमतं भक्त्यैव निः श्रेयसं
शेषा येन च शेषिणो रघुपतेर्जीवा इति स्वीकृतम्।
श्रौतं युक्तियुतं मतं खलु विशिष्टाद्वैतकं यस्य सः
श्री बोधायनवृत्तिकृद्विजयतां बोधायनः शाश्वतम् ॥

श्रियः श्रियै नमः

अथ चतुर्थाध्यायस्य प्रथमः पादः

आवृत्त्यधिकरणम् ॥१॥

आवृत्तिरसकृदुपदेशात् ।४।१।१।

अतीतैस्त्रिभिरध्यायैश्चिदचिच्छरीरकस्यापहतपाप्मनो दिव्यगुणधाम्नः परब्रह्मणः श्रीरामस्य स्वरूपमुपासनात्मकविद्याश्चाभ्यधायि । अथानेन तुरीयाध्यायेनोपासनफले कलनीयेऽनेन प्रथमाधिकरणेनोपास-

---

विवरणम्= गतप्रकरणेन परमात्मशरीरलक्षणयोर्जड़चिदात्मक पदार्थयोः स्वरूपं तथाचिदचितोः शरीरिरूपस्य परमपुरुषस्यानन्तदिव्य गुणालङ्कृतस्य च स्वरूपप्रदर्शनं कृतवान् । तथा मोक्षप्रसाधनमुपासन पदबोध्यविद्यास्वरूपमपि निर्णीतवान्, प्रसङ्गागतमन्यदपिकिञ्चिद्विचिन्तितम् । सम्प्रति विद्यास्वरूपं निर्णेतुमुपक्रमते "अतीतै स्त्रिभिरध्यायैः" इत्यादि । प्रथमादितृतीयाध्यायान्ताध्यायैर्जड़चेतनशरीरकस्य निरस्त समस्तदोषस्य दिव्यगुणाकरस्य परमपुरुषस्य भगवतः श्रीसीतानाथस्य कृपापारावारस्य वास्तविकं स्वरूपं तत्प्रापिकामुपासनात्मकविद्याश्च प्रोक्त वान् । ततः परमनेन चतुर्थाध्यायेनोपासनं तत्फलंच विचारयितुमुपासनानुष्ठानं च निश्चेतु प्रयतते "आवृत्तिः" इत्यादि । "आत्मावारेद्रष्टव्यः" श्रोतव्यो मन्तव्यः "तमेवविदित्वाऽतिमृत्युमेति" "ब्रह्मविदाप्नोति परम्"

सारबोधिनी—अतीत प्रथम द्वितीय और तृतीय अध्याय से भगवान् का शेष रूप जो जड़ चेतन पदार्थजात है उसका तथा स्थूल सूक्ष्म साधारण जड़ चेतन शरीरक सर्व जगत् का उपादान कारण अपहत पाप्मत्वादि दिव्यानेक कल्याण गुणका पारावार परम ब्रह्म परमपुरुष भगवान् श्रीरामजी का जो वास्तविक स्वरूप है उसका और तदीय उपासनात्मक संसार विनाशक परम सुख प्राप्ति लक्षण मोक्ष का जनक विद्या है तादृशविद्याके स्वरूप का भी कथन

नानुष्ठानं निर्णीयते। "आत्माव्रारे द्रष्टव्यः" [बृ० ४।५।६।] "ब्रह्मविदाप्नोति परम्" [तै० १।१।] "तमेव विदित्वाऽति मृत्युमेति" [श्वे. ३।८।] इत्यादिश्रुतिषु ब्रह्मप्राप्त्युपायतयोपदिष्टस्य ध्यानादेः सकृदनुष्ठानं कार्यमुतावृत्तिरिति संशयः। सकृदनुष्ठानेऽपि शास्त्रार्थस्य साफल्या-

---

इत्याद्यनेकश्रुत्यादिषु परब्रह्मणः प्राप्तौध्यानवेदनादिकं साधनतयासमुपदिष्टमवलोक्यते तत् ध्यानादिकं सकृदेवानुष्ठेयम्। यथा दर्शपूर्णमासादौ प्रयाजाद्यनुष्ठानमथवा अनेकशस्तदनुष्ठानमवघातादिवदिति संशयः। तत्र सकृदेवानुष्ठान कार्यं तेनैव शास्त्रार्थस्य कृतत्वाद् यथा दर्शपूर्णमासाद्यङ्गभूतस्यानुष्ठानं सकृदेव कृतंसत् फलाय पर्याप्तं भवति नतु तदनुष्ठानमनेकशः क्रियते तथात्वे सकृत्कथितेऽनेकशोनुष्ठाने कर्मवैगुण्यायैव भवति नतु कर्म सहकारि। तथैवात्राप्यावर्तनस्याश्रुतत्वेनावर्तनकरणे फलवैगुण्यंस्यादिति सकृदेवावृत्तिः करणीयेति पूर्वपक्षः।

तत्र सिद्धान्तं दर्शयति "आवृत्तिरसकृदुपदेशात् इति। तत्र ध्यानादेर्मोक्षकारणस्यावर्तनमेव करणीयम् कुतः! असकृदुपदेशात्। अर्थात् प्रत्ययस्यवारंवारमनुसन्धानं करणीयं तत्वमस्यादिवाक्यस्यावृत्तिदर्शनात् अर्थात् निदिध्यासनादिकं दृष्टफलकम् तत्फलं यावन्न प्राप्तं भवति तावत्पर्यन्तं तत्कारणंनिदिध्यासनमनुष्ठेयम् यथातण्डुलनिष्पादकावघातस्यानु

किया गया है। इसके बाद इस चतुर्थ अध्याय से उपासना तथा तदीय फलजो मोक्ष उसके स्वरूप का विचार में प्रथमतः इस प्रथम अधिकरण से अर्थात् चतुर्थाध्याय के प्रथम पादान्तर्गत प्रथमाधिकरण से उपासना अनुष्ठान का निर्णय करते हैं। "आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यस्तत्साक्षात्कारः कर्त्तव्यः" [हे।! मैत्रेयी यह परमात्मा श्रुतिजनित शाब्दज्ञान का विषय करने योग्य है। मनन करने के योग्य है। तथा निदिध्यासन—अविच्छिन्न तैलधारावत् ध्यान विषय कर्तव्य अर्थात् ध्यान करने योग्य है। तदनन्तर साक्षात्कार का विषय है"] ब्रह्मविदाप्नोति परम्" [जो ब्रह्मज्ञानवान् पुरुष है वह उस पर

त्सकृदेवेति पूर्वः पक्षः । अत्राभिधीयते–"निदिध्यासितव्यः" [बृ० ४।५।६।] "आत्मानमेव लोकमुपासीत" [बृ० १।४।१५।] इत्याद्युपदेशाद्वेदनापरपर्यायस्योपासनस्यासकृदनुष्ठानं कार्यम् । "उपास्यविषयिणीस्मृ-

---

ष्ठानम् । नतु प्रयाजादिवत्सकृदनुष्ठानंप्रयाजादेरदृष्टफलकत्वादत इहासकृदनुष्ठानस्यावश्यकत्वात् । एतदेव दर्शयति "वेदनापरपर्यायस्य इत्यादि । वेदन स्वरूपस्योपासनस्य वारंवारमनुष्ठानं कर्त्तव्यमेव । कुतः ? तैलधारावदविच्छिन्नसंतानरूपस्य समुपासनस्य एकवारमनुष्ठानस्यासंभवादतो वेदनमसकृदेवयथाभवेत्तथा अनुष्ठेयमिति । अदृष्टफलके प्रयाजादौसकृदनुष्ठानेनापि फलसंभवात्तथानुष्ठीयते दृष्टफलके तु समुपासनेयावत्फलं न जायते तावदेवानुष्ठानं कर्त्तव्यमवघातादिवदिति । "निर्णीत एवायमर्थो भगवता बोधायनेन पूर्वपक्षोपन्यास पूर्वकप्रतिवचननिचयैः । तथाहि सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात् प्रयाजादिवत् (बो. वृ.) इत्यादिना पूर्वपक्षमुपन्यस्यसमाहितम् "सिद्धं तूपासनशब्दात्" (बो. वृ.) वेदनमेवोपासनमित्यप्युक्तम् "वेदनमुपासनं स्यात्तद्विषये श्रवणात्" (बो. वृ.) इति । उपासनं तु ध्रुवानुस्मृतिरूपमित्यभिहितम् "उपासनं स्याद्ध्रुवानुस्मृति दर्शनान्नि-

ब्रह्म परमात्मा को प्राप्त करता है ।] "तमेव विदित्वाऽतिमृत्युमेति" इत्यादि । [उस जगत्कारण परमात्मा को जान करके अति मृत्यु मोक्ष को प्राप्त करता है । इस परमात्मा के ज्ञान से अतिरिक्त अन्य कोई भी मोक्ष प्राप्तिका उपाय नहीं है ।] पूर्व प्रदर्शित इन श्रुतियों से सिद्ध होता है कि ध्यानादिक ब्रह्म प्राप्ति में कारण है अब यहाँ संशय होता है कि इन ध्यानादिक का जो अनुष्ठान है वह एक बार करना चाहिए अथवा वारंवार करना चाहिए । अर्थात् जिस तरह दर्शपूर्णमास याग में प्रयाज का अनुष्ठान एक बार करने से ही फल सिद्धि होने से सकृदेव प्रायाजादिक का अनुष्ठान किया जाता है । उसी तरह ध्यानादिक का अनुष्ठान सकृदेव करना चाहिए अथवा तण्डुल निष्पादक अवघात के समान वारंवार अनुष्ठान करना चाहिए यावत् पर्यन्त फल सिद्धि हो ।

तिरेव तत्र तत्रोपासनवेदनादिपदैरभिधीयते वेदनोपासने च समानप्रकरणाधीतत्वात्समानार्थक एवेत्यावृत्तिः कर्तव्ये" त्याचार्योक्तेः। अविच्छिन्नस्मरणात्मकस्योपासनस्य सकृदनुष्ठानासम्भवाद्वेदनमप्यसकृदेवेति तात्पर्यम् ॥१॥

वचनाच्च" (बो. वृ.) इति। साच ध्रुवानुस्मृतिः साधनसप्तकादेवेत्युदीरितम् "तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्च"(बो. वृ.) (आनन्दभाष्यम् १।१।१)। इति व्याख्यातश्चपरमार्षश्रीपुरुषोत्तमाचार्यबोधायनवाक्यजातं जगद्गुरुश्रीगङ्गाधराचार्ययतिसम्राजा—

"जात्याश्रयनिमित्तैर्यद्दुष्टमन्नं भवेन्नहि।
तस्माद्देहस्य संशुद्धिर्विवेकः कथ्यते बुधैः॥
शब्दरूपरसस्पर्शगन्धेषु विषयेषु यः।
अनादरः स तत्त्वज्ञै विमोकः परिकीर्तितः॥
शुभाश्रयस्य यच्चात्र संशीलनं पुनः पुनः।
अभ्यासः साधनं तद्धि योगध्यानोपकारकम्॥
यथाशक्ति हि पञ्चानां यज्ञानां महतां तथा।
आश्रमान्तरधर्माणामनुष्ठानं क्रिया मता॥

इसमें पूर्वपक्षवादी कहते है कि "ब्राह्मविदाप्नोति परम्" इत्यादि वेदान्त वाक्य से परम पुरुष के वेदनमात्र को ब्रह्म प्राप्ति के कारणता का श्रवण होने से "ज्योतिष्ठोमादि" याग के सदृश सकृदेव वेदनादिक का अनुष्ठान करना चाहिए। क्योंकि सकृदनुष्ठान करने से ही विधायक शास्त्र का चरितार्थत्व हो जाता है। तब प्रत्ययावृत्ति निष्फल है। निष्फल का अनुष्ठान शास्त्र प्रतिषिद्ध होने से क्रिया में वैगुण्य का ही जनक होगा क्रिया का सहायक नहीं इसलिए सकृदेव अनुष्ठान करना चाहिए ऐसा पूर्व पक्ष का अभिप्राय है॥

एतादृश प्रश्न के उत्तर में सिद्धान्तवादी कहते हैं "आवृत्तिरसकृदुपदेशात्" इति सूत्रम्। ब्रह्म प्राप्ति में कारणीभूत जो ध्यान वेदनादिक हैं उनका

लिङ्गाच्च ।४।१।२।

वेदनस्यासकृदनुष्ठेयता "अनन्यचेताः सततं योमां स्मरति नित्यशः [गी०] "मां ध्यायन्त उपासते" [गी०] "तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्पृहा । तद्ध्यानम्" [वि० पु० ६।७।९१] इत्यादिस्मृतेरप्यवगम्यते ॥२॥

इति श्रीरघुवरीयवृत्तावावृत्त्यधिकरणम ॥१॥

अहिंसा चानभिध्या च सत्यार्जवे तथा दया ।
दानं चैतानि कल्याणतयाऽऽम्नातानि सूरिभिः ॥
शोकभीतिनिमित्तेनावसादश्चित्तदीनता ।
तदभावो हि सम्प्रोक्तोऽनवसादो महात्मभिः ॥
उद्धर्षः खलुसन्तोषा ऽनुद्धर्षस्तद्विपर्ययः ।
शोकवच्चाति सन्तोषे मनः शैथिल्यहेतुता ॥"
इत्यादिरूपेण तस्मात्प्रत्ययावृत्तिः करणीयेति सिद्धान्तः ॥१॥

विवरणम्— न केवलमुपदेशादेव वेदनादेरसकृदनुवर्तनं विधेयमपि तु लिङ्गादपिहेतोरसकृदनुवर्तनं कर्त्तव्यमेवेति दर्शयितुमुपक्रमते "वेदनस्या आवर्तन करना चाहिए । क्योंकि इस आवर्तन में दृष्ट—ब्रह्म साक्षात्कारात्मक फलजनकत्व है । तत्वमस्यादि स्थल में असकृत् आवर्तन का ही उपदेश किया गया है । " निदिध्यासितव्यः " यहाँ निदिध्यासन पद असकृत ध्यानार्थक है । असकृत ध्यान के बिना ब्रह्म साक्षात्कार रूप फल असंभवित है । उपास्य विषयक स्मरण ही वेदन पदबोध्य है । इसी बात को पूर्वाचार्यो के उद्धरणपूर्वक बतलाते हैं "अत्राभिधीयते" इत्यादि "निदिध्यासितव्यः" "आत्मानमेवलोकमुपासित" इत्यादि उपदेश से वेदनका अपर पर्याय उपासन का असकृत् अनुष्ठान करना चाहिए । क्योंकि अविच्छिन्न स्मरणात्मक उपासना का सकृदनुष्ठान असंभवित है अतः वेदन भी बार—बार ही होना चाहिए इसी अंश में तात्पर्य है इसविषय में आनन्दमयजिज्ञासाधिकरण विवरणमें विशेषचर्चा किया है अतः विशेषार्थियों को वहो देखना चाहिये ॥१॥

॥ आत्मत्वोपासनाधिकरणम् ॥२॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ।४।१।३।

पूर्वोदित ब्रह्मोपासनं किमुपासकेन भिन्नत्वधिया विधेयमुत स्वात्मधियेति संशयः। तत्रोपासकस्य जीवस्य "ज्ञाज्ञौद्वावजावीशानीशौ"

सकृदनुष्ठेयमित्यादि" 'योहि उपासकोऽनन्यमनस्कोभूत्वाममोपासनंकरोति मदीयं स्मरणमेव विधत्ते" "मां ध्यायन्त उपासनं कुर्वन्ति" 'तत्परत्वये चक्रा" इत्यादि पुराणरत्नस्मृतिबलाच्चासकृदनुष्ठानं विधेयमितिगम्यते "अनेन सततानुस्मरणात्मिकाभक्तिरेव सुलभोपायः पूर्वमुपदर्शितेषूपायेष्वनायासाधिक्यमित्युक्तं भवति" इत्याचार्योक्तेः, तस्माद्वेदनादेरसकृदनुष्ठानं कर्त्तव्यमेव तदभावे साक्षात्कारात्मक फलस्य मोक्षस्य चासंभवात् ॥२॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणे आवृत्त्यधिकरणम् ॥१॥

विवरणम्- परमात्मप्रापकस्य वेदनस्यासकृदनुष्ठानं कर्त्तव्यमिति व्यवस्थितम्। तत्रोपासनमुपास्योपासकयोर्भेदपूर्वकं विधेयमभेदपूर्वकं वा। तत्राद्येऽभेदप्रतिपादकतत्त्वमस्यादिश्रुतिविरोधप्रसङ्गात्।

सारबोधिनी- वेदन का वारंवार अनुष्ठेयता निम्नाङ्कितलिङ्गों से बतलाते हैं अनन्यचित्त होकर के जो उपासक मेरा सतत स्मरण करता है हे पार्थ! उस उपासक के लिए मैं अति सुलभ होताहूँ। अर्थात् अति सरलतया वह मुझे प्राप्त कर लेता है। जो मेरा ध्यान करता हुआ उपासन करता है उसको मैं संसार से उद्धार कर देता हूँ" "भगवान् के रूप का अनन्य स्मरण करे; अन्य विषय में स्पृहा रहित होवें" इत्यादि स्मृतियों से भी सिद्ध होता है कि वेदनादिका असकृदनुष्ठान करना चाहिए ॥२॥

[श्वे० १।९।] "अधिकन्तु भेदनिर्देशात्" [ब्र० सू०] "शारीरश्चोभयेऽपिहि भेदेनैनमधीयते" [ब्र० सू० १।२।११।] इत्यादिश्रुतिस्मृतिभिर्ब्रह्मभिन्नत्वेनावगमाद्भिन्नत्वेनोपासनीयमिति पूर्वः पक्षः। अत्राभिधीयते उपासितुरन्यदपि ब्रह्मोपासनवेलायां स्वात्मतयैवोपासकेनोपास्यम्।

द्वितीये "ज्ञा ज्ञा" वित्यादि भेदप्रतिपादकश्रुतिविरोधप्रसङ्गाच्च नहि भवति सर्वथाऽभेदे उपास्योपासकभावः, इत्यालोच्योपासकभाव दर्शयितुं सूत्रव्याख्यानं च कर्तुमुपक्रमते' 'पूर्वोदित ब्रह्मोपासन मित्यादि वृत्तिः। इदमीयप्रथमद्वितीयसूत्रप्रदर्शितं यदुपासनम्, तदुपासनमुपासकेन उपास्योपासकयोर्भेदबुद्ध्यानुष्ठेयम्, अथवा उपास्योपासकयोरभेदं कृत्वा तदुपासनीयमिति संशयः। तत्र संशयोपस्थापककोटिद्वयो र्विद्यमानत्वात्। तत्र भेदकोटेरुपस्थापको भेदप्रतिपादको ज्ञाज्ञौ द्वावजावीशानीशौ-अधिकन्तु भेदनिर्देशादित्यादिवेदभागः, अभेदकोटेरप्युपस्था

सारबोधिनी--ब्रह्मोपासन मोक्षफलक है इस बात का निश्चय किया गया है। तो निदिध्यासन काल में उपासक उपास्य को स्वभेदेन उपासना करे अथवा स्व के साथ अभेद पूर्वक उपासना करे इसका निश्चय करने के लिए उपक्रम करते हैं कि "पूर्वोदित ब्रह्मोपासनमित्यादि--उपासक ब्रह्म का उपासन करें मोक्ष प्राप्ति के लिए। ऐसा जो पूर्व में ब्रह्मोपासन का कथन किया गया वह उपासक उपास्य परमात्मा को स्व से भिन्न समझ कर के उपासना करे अथवा परम पुरुष को स्व से अभिन्न समझ करके उपासना करें? ऐसा संशय होता है। क्योंकि "द्वासुपर्णा" इत्यादि से भेद प्रतिपादित है और "तत्त्वमसि" इत्यादि श्रुति से अभेद का प्रतिपादन होता है। अतः उभय कोटि का उपस्थापन होने से भेदाभेद विषयक संशय होता है। इसमें पूर्व पक्षवादी कहते हैं कि "परमात्मा तथा अज्ञ जीव ये दो हैं जो कि ईश अनीश तथा अज हैं" "अधिकंतु भेद निर्देशात्" "शारीरश्चोभयेपि" इत्यादि। [जीव से भिन्न परमात्मा है"] इत्यादि श्रुति स्मृति से यह सिद्ध होता है कि उपासक जीव ब्रह्म

पूर्वोपासकाश्चैवमुपगच्छन्ति "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि" इति । अभ्युपगमयन्त्येनं ज्ञापयन्ति वेदान्ताः स्पष्टम् । "ऐतदात्म्यमिदं सर्वम्" [छा० ६।८।४।] "यस्यात्मा शरीरम्" [बृ०।१।४।१०] "अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद" [बृ०-१।४।१०] इत्यादयः । तस्मादुपासितुरात्मतयैवोपास्यं ब्रह्मेति ॥३॥

इति श्रीरघुवरीयवृत्तावात्वोपासनाधिकारणम् ॥२॥

पक्षस्तत्वमस्यादि वेदभाग एवेति भवति संशयः । तत्र "ज्ञा ज्ञौ" "अधिकन्तु भेदनिर्देशात्"इत्यादि श्रुतिभिरुपासकस्य जीवस्य परमेश्वराद्भेद-प्रतिपादनेन भेदरूपेणैवोपास्योपासकभाव इतिपूर्वपक्षाशयः ।

एवं विधे सिद्धान्ती प्राह "आत्मेतीत्यादि" उपास्योपासकयोरभेदमादायैवोपासनं विधेयम्. यद्यपि ज्ञाज्ञावित्यादिनोभयोर्भेद एव सिद्धो भवति तथापि उपासनसमये "तत्वमस्यादि" वेदान्तवलेनाभेदपुरस्कृत्यैवोपासनं विधेयम् । यद्यपि स्वभावतः स्वरूपतो भिन्नमेवोपास्यस्तथापि उपासनाकालेऽभेद बुद्धिं कृत्वोपासना कर्त्तव्येत्याशयः । एवमेव पूर्वोपासकाः कुर्वन्तोऽभवन् । "त्वं वाऽहमस्मि अहं वै त्वमसि" इत्यादि श्रुतिजातोद्घोषयन्ति । इममेव सिद्धान्तम् "ऐतदात्म्यम्" "यस्यात्मा शरीरम्" इत्यादिवेदान्ताः प्रतिपादयन्ति । तस्मादुपासकेन उपास्येन सहाभेदमादायैवोपासनं कर्त्तव्यमिति ।

में भेद होने से भिन्नत्व रूप से ही उपासक ब्रह्म का उपासना करें । क्योंकि यदि कदाचित् जीव ब्रह्म में अभेद माना जाय तब उपासक भाव का ही विलोप हो जायगा । क्योंकि एक में कौन उपास्य होगा और कौन उपासक होगा । अतः उपास्य परम पुरुष को स्वसे भिन्न मान करके ही उपासन करें ऐसा पूर्वपक्षका अभिप्राय है ।अब इसमें सिद्धान्ती उत्तर करते हैं "अत्राभिधीयते" इत्यादि । यद्यपि यह सिद्ध है कि उपास्य परम पुरुष उपासक से भिन्न है अन्यथा उपास्य उपासक भाव का विलोप हो जायगा । तथापि उपासना के समय में

॥ प्रतिकाधिकरणम् ॥३॥

न प्रतिके न हि सः ।४।१।४।

उपनिषत्सु "मनो ब्रह्मेत्युपासीत" [छा० ३।१८।१।] इत्यादिप्रतीकोपासनमपि दृश्यते । तत्रायं संशयो यदत्राप्यात्मत्वेनोपासनं विधेयं नवा ? उपासितुरात्मतया ब्रह्मोपासनस्य पूर्वाधिकरणे निश्चितत्वात्तत्मा

यद्यपि अत्यन्ताभेदे उपास्योपासकभावो न संभवति लोकविरोधात् युक्तिविरोधाच्च तथापि नात्रैकान्तिकोऽभेदः किन्तु शरीरशरीरिभावेनैवातोऽविरोधः । भवति हि देवदत्तस्य स्वशरीरेण सहाभेदः सच न व्यवहारप्रतिबन्धकः । इत्यन्यत्रविस्तरः ॥३॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ
श्रीरघुवरीयवृत्तिविवरणे आत्मत्वोपासनाधिकरणम् ॥२॥

विवरणम्- वेदान्तशास्त्रे "मनोब्रह्मेत्युपासीत" इत्यादिकं प्रतीकोपासनं श्रूयते. तत्र मनः प्रभृतिके प्रतीके उपासकेन आत्मबुद्धिः कर्तव्या अथवा तत्रात्मबुद्धिर्नकर्त्तव्येति संशयो जायते । तत्र सर्वोपासनानां समत्वात् प्रतीके मनः प्रभृतिके आत्मबुद्धिरेव कर्त्तव्येति पूर्वपक्षः । प्रतीके स्वरूप से ही उपासक उपास्य की उपासना करें । क्योंकि पूर्वकालिक उपासक लोग इसी प्रकार से मानते हैं "हे भगवन ! आप हो मैं हूँ; मेरास्वरूप ही तुम्हारा स्वरूप है" इत्यादि इस बात को वेदान्त स्पष्ट रूप से प्रतिपादन करता है । "ऐतदात्म्यमिदं सर्वम्" 'यस्यात्मा शरीरम्"इत्यादि । इसलिए उपासक के आत्मा रूप से ही उपास्य ब्रह्म उपासनीय है यह सिद्ध होता है । जीव परमेश्वर में जो अभेद है वह शरीरशरीभाव से है नतु एकान्ततः अभेद । एकान्ताभेद ही उपास्योपासकभाव का विरोधी होता है । अभेद मात्र विरोधी नहीं होता है । विशेष विवरण अन्यत्र देखें ॥३॥

सम्बोधिनी—उपनिषत्-वेदान्त शास्त्र में "मनो ब्रह्मेत्युपासीत" मन का ब्रह्मरूप से उपासन करना चाहिए इत्यादि रूप से प्रतीकोपासना का विधान

मान्येनात्राप्यात्मतयैवोपासनं विधेयमिमि पूर्वः पक्षः। अत्राभिधीयते-प्रतिकेनात्मत्वेनोपासनं विधेयम्। यतः स प्रतिकोनोपासितुरात्मा। तद् मात्रतीके केवलं ब्रह्मदृष्टिः कर्त्तव्या। उपासनन्तु प्रतीकस्यैव ॥४॥

मनस्यादीनात्मबुद्धिः कर्त्तव्या यतः प्रतीकोनोपासकस्यात्मा। तस्मान्न तत्र प्रतीके आत्मबुद्धिरिति सिद्धान्तं दर्शयितुमुपक्रमते "उपनिषत्सु" इत्यादिवृत्तिः। उपनिषत्सुवेदान्तग्रन्थेषु "मनोब्रह्मेत्युपासीत" [मनसि ब्रह्मकार्यब्रह्मबुद्धिः कर्तव्येत्यर्थः] इत्यादि क्रमेण प्रतीकोपासना श्रूयते। तत्रोपासनस्य सर्वत्र समानरूपत्वेन अत्रापि उपासकेन स्वात्मरूपेणैवोपासनं कर्त्तव्यं भेदेनवोपासनमिति संशयः। तत्र यः उपासकः सः स्वात्मरूपेणैवोपासनं कुर्यादिति पूर्वाधिकरणे विनिश्चितत्वादत्रापि तेनैव रूपेणोपासनं कर्त्तव्यमिति पूर्वपक्षाशयः। प्रतीकस्य मनः प्रभृतिकस्योपासकभिन्नतया न तथात्वेनोपासनं किन्तु भेदेनैव यतः उपासकभिन्नत्वात्प्रतीकस्येति सिद्धान्तः। केवलमत्र प्रतीकस्यब्रह्मबुद्ध्योपासनं विधेयमिति संक्षेपः ॥४॥

देखने में आता है। उसमें यह संशय होता है कि यहां भी उपासक स्वात्म स्वरूप से उपासना करे अथवा स्वभिन्न रूप से मन प्रभृतिक में ब्रह्मोपासन करे इसमें उपासक स्वरूप से ब्रह्म का उपासन करे ऐसा पूर्व अधिकरण में निश्चित हुआ है। तो प्रकृत में उपासना का समत्व सिद्धर्थ प्रतीक में आत्म रूप से ही उपासना करना चाहिए। इस पूर्वपक्ष में सिद्धान्तवादी कहते हैं की मन आदिक प्रतीक में आत्म भिन्न स्वरूप से अर्थात् उपासक स्वभिन्न रूप से उपासन करें। क्योंकि वह मनः प्रभृतिक जो प्रतीक है वह उपासक का स्वरूप नहीं है किन्तु उपासक से भिन्न है। इसलिए प्रतीक मनः प्रभृतिक में केवल ब्रह्म बुद्धि का संपादन करें। उपासना तो यहाँ केवल मन का ही है। ॥४॥

ब्रह्मदृष्टिरुत्कर्षात् ।४।१।५

अत्रापकृष्टे मनसि ब्रह्मदृष्टिरेव कर्त्तव्या न तु ब्रह्मणि मनोदृष्टिः । अपकृष्टे ह्युत्कृष्टधीः साधीयसी ॥५॥

इति श्रीरघुवरीयवृत्तौ प्रतीकाधिकरणम् ॥३॥

विवरणम्– "मनोब्रह्मेत्युपासीत" इत्यत्रमनसो ब्रह्मणश्च समान विभक्तिनिर्देशान्मनसि ब्रह्मदृष्टिः कर्त्तव्या ब्रह्मणि वा मनोदृष्टिः कर्त्तव्येति संशयमपाकर्तुमुपक्रमते "अत्रापकृष्टे" इत्यादि । मनोब्रह्मण में ध्येमनोऽपकृष्टम्. ब्रह्मचोत्कृष्टमिति. अपकृष्टे उत्कृष्ट बुद्धिः कर्तव्येति लोकप्रवादात्. मनसिहीने उत्कृष्टस्य ब्रह्मण एव दृष्टिः कर्त्तव्या. न तु वैपरीत्येन दृष्टिः करणीयेति । दृश्यते राजामात्येराजदृष्टिः कृता फलाय भवति. न तु राजनि क्रियमाणा अमात्यबुद्धिः फलाय. किन्तु विपरीत फलप्रदैवेति. तथैव मनस्यपकृष्टे कृता ब्रह्मबुद्धिः श्रेयसे स्यात्. न तु ब्रह्मणि क्रियमाणमनोबुद्धिः फलवती स्यात् । अतोऽपकृष्टे मनसि ब्रह्मबुद्धिः करणीया. न तु ब्रह्मणि मनोदृष्टिः करणीयेति ।५॥

इति जगद्गुरुश्रीरामानन्दाचार्यगनप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणेप्रतीकाधिकरणम् ॥३॥

सारबोधिनी–पूर्व में "मनो ब्रह्मेत्युपासीत" [मन में ब्रह्मदृष्टि करनी चाहिए"] ऐसा कहा गया है। इसमें संदेह होता है कि मन में ब्रह्मदृष्टि करनी चाहिए अथवा ब्रह्म में मनोदृष्टि का संपादन करना चाहिए । एतादृश संशय के निराकरण करने के लिए कहते हैं "ब्रह्मदृष्टि रुत्कर्षात्" अर्थात् मन में ब्रह्म दृष्टि करना चाहिए । क्योंकि उत्कर्ष होने से हीन मन में उत्कृष्ट ब्रह्म का भावना करनी चाहिए । यहां अपकृष्ट हीन मन में उत्कृष्ट ब्रह्म दृष्टि ही उचित है नतु उत्कृष्ट ब्रह्म में अपकृष्ट मनोदृष्टि का विधान क्योंकि अपकृष्ट में उत्कृष्ट बुद्धि फलवती होती है । अभिप्राय यह है कि मन आदि की अपेक्षा ब्रह्म, उत्कृष्ट है । इसलिए मन आदिक में ब्रह्मदृष्टि का विधान उत्तम फलक होगा । नतु उत्कृष्ट ब्रह्म में हीन मनोदृष्टि फलद होगी । अतः मन आदि प्रतीक में ब्रह्मदृष्टि करना चाहिए नतु ब्रह्म में मनोदृष्टि का संपादन करना ॥५॥

आदित्यादिमत्यधिकरणम् ॥४॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ।४।१।६।

कर्माङ्गनिर्दिष्टेषूपासनेषु "य एवासौ तपति तमुद्गीथमुपासीत" [छा० १।३।१।] इत्यादिषु संशयः । किमादित्यादिषूद्गीथादिदृष्टिरुतोद्गीथादिष्वादित्यदृष्टिरिति । तत्र "फलवत्सन्निधावफल तदङ्गम्" इति न्यायादादीत्यादीनामपकृष्टत्वादुद्गीथादीनां फलित्वेनोत्कृष्टत्वादादित्यादिषूद्गीथादिदृष्टिर्विधेयेति पूर्वपक्षः । अत्राभिधीयते—उद्गीथादिष्वङ्गेष्वादित्यादिदृष्टिरेव विधेया । यतः कर्मभिस्समाराधिताया देवतायाः फलप्रदायित्वेनोत्कृष्टत्वात् ॥६॥

इति श्रीरघुरोयवृत्तावादित्यादिमत्यधिकरणम् ॥४॥

विवरणम्— ननु "य एवासौ तपतितमुद्गीथमुपासीत" इत्यादि कर्माङ्गोपासनायां संशयोभवति. किमत्रादित्ये उद्गीथदृष्टिः करणीयाः उद्गीथेऽआदित्यदृष्टिरिति । तत्रोद्गीथस्य कर्मरूपत्वेन फलवत्वात् "फलवत्संनिधावफलं तदङ्गमिति" न्यायात्. आदित्येउद्गीथदृष्टिः कर्तव्येति पूर्वपक्षः । तत्रादित्यादिदृष्ट्या संस्कृतोद्गीथस्याधिकता संपादनार्थमादित्यमतिरेव कर्माङ्गे कर्त्तव्येति सिद्धान्तं दर्शयितुमुपक्रमते "कर्माङ्गनिर्दिष्टेषू" इत्यादि । आदित्ये उद्गीथदृष्टिरथवोद्गीथे आदित्यदृष्टिरिति संशये फलवतोऽफलंतदङ्गमितिन्यायादादित्ये कर्मबुद्धिरेव कर्त्तव्येति पूर्वप-

सारबोधिनी—कर्म के अङ्ग भूत उपासना में "यएवासौतपति तमुद्गीथमुपासीत" [जो यह तपित हो रहा है उसका उद्गीथ रूप से उपासना करना चाहिए ।] इत्यादि स्थल में संशय होता है कि क्या आदित्य में उद्गीथ रूप कर्माङ्ग में आदित्यादि दृष्टि का संपादन करें । इसमें पूर्वपक्षवादी कहते है कि "फलवान् के समीप में जो अफलवान् रहता है वह अफलवान् फलवान् का अङ्ग होता है" इसन्याय से आदित्यादिक को अपकृष्ट होने से तथा उद्गीथ को उत्कृष्ट होने से हीन आदित्य में उत्कृष्ट उद्गीथ दृष्टि का ही विधान करना

आसीनाधिकरणम् ॥५॥

आसीनः सम्भवात् ।४।१।७॥

एतच्चोपासनं शयानो गच्छन्नासीनोवेत्यनियमेन यथा कथञ्चिद्विदध्यादासीन एव वेति संशयः। तत्रोपासनस्य मनोविधेयतया यथाकथञ्चिदप्यनुष्ठेयमिति पूर्वपक्षः। अत्राभिधीयते—चित्तैकाग्र्यमन्तरेणोपासनस्यासम्भवादासीनस्यैव तद्भूत्वादासीन एव ब्रह्मोपासनं विदध्यादिति ॥७॥

क्षाशयः। तत्रोद्गीथे आदित्यमतिरेवन्यायया, कर्मणा आराधिता देवता फलाधिक्याय भवतीति देवताया उत्कृष्टत्वेन तन्मतिरेव कर्माङ्गे कर्त्तव्येति सिद्धान्तः ।६॥

इति जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणे आदित्यादिमत्यधिकरणम् ॥४॥

विवरणम्— ननु मोक्षकारणीभूतमुपासनम्, तद्वेदनध्याननिदिध्यासनादिबोध्यम्। तदुपासनं तिष्ठन् कुर्यादासीनः शयानो वा कुर्यादिति संशयः। तत्रोपासनस्य मानसिकत्वात्, तत्र च स्थितेरनियम इति यथा-

चाहिए इसके उत्तर में सिद्धान्ती कहते है कि उद्गीथादिक कर्माङ्ग में आदित्य बुद्धि का ही संपादन करना चाहिए। क्योंकि कर्म से आराधीत जो देवता है वह फल का प्रदातृ होती है इसलिए वह उत्कृष्ट है, उत्कृष्ट दृष्टि अपकृष्ट में करनी चाहिए इसलिए उद्गीथ रूप कर्माङ्ग में आदित्य दृष्टि का विधान करना ही समुचित है ॥६॥

सारबोधिनी—मोक्ष का कारण वेदननिदिध्यासनाद्यपरपर्याय उपासन है ऐसा पूर्व में कहा गया है। एतदश जो उपासन उसका अनुष्ठान सोकरके करें बैठ के करें अथवा आसीन करें ऐसा संशय होता है। इसमें पूर्वपक्ष वादी कहते हैं कि ध्यान उपासनादिक जो हैं वे मन का धर्म है अर्थात मन से संपादित होते है तो उसमें मन की स्थिति आवश्यक है किन्तु शरीरादि स्थिती की कोई आवश्यकता नहीं होने से यथा कथंचित् उपासना करें समा-

ध्यानाच्च ।४।१।८।

"ततस्तु तं पश्यते निश्चलं ध्यायमानः" [मु०] इत्युपासनस्य ध्यानरूपत्वादासीनस्यैव निश्चलध्यानत्वादासीन एव तदनुतिष्ठेत् ।८।

कथञ्चिदुपासनं कुर्यान्नत्वासीन एवेत्याशङ्कामपनेतुमुपक्रमते "एतच्चोपासनम्" इत्यादि वृत्तिः । एतत् अर्थान्मोक्षकारणीभूतं ध्यानवेदनाद्यपरपर्यायमुपासनं शयानस्तिष्ठन्नासीनो वा कुर्यादिति संशयः । तत्र निधिध्यासनापरपर्यायस्योपासनस्य मनोधर्मतया मनसः स्थितिरेवान्वेषणीयाः शरीरस्थितेरनावश्यकत्वेन यथाकथञ्चिदेवोपासनं विधेयम्. न तु समासीन एव कुर्यादिति पूर्वपक्षाशयः ।

अत्रोत्तरम्-- आसीन इत्यादि । आसीनस्यैवोपासनं तथैव संभवादन्यथा विक्षेपापत्तेः । अयंभावः उपासनं चित्तैकाग्र्यमन्तरेणानुपपन्नम्. मनस एकाग्रताचासीनस्यैव भवति गमनादिकं कुर्वतश्चित्तविक्षेपस्य दर्शनात् । तस्मादासीन एव ब्रह्मण उपासनं कुर्यान्नतुतिष्ठन्शयानोवेति ।७

विवरणम्-"निदिध्यासितव्यः" "ततस्तु तं पश्यते निश्चलंध्यायमानः" इत्यादिश्रुतिभ्य उपासनं ध्यानमितिप्रतिपादितम् । निश्चलध्यानंचासीनस्यैव संभवति. अन्यथाविक्षेपस्यापि संभवात् । सजातीय सीन होकर के ही उपासना करे ऐसा कोई नियम नहीं है । इसके उत्तर में कहते हैं "आसीनः संभवात्" आसीन होकर के ही उपासना करे—क्योंकि ऐसा करने पर ही वह संभव हैं । अर्थात् चित्त की एकाग्रता के बिना उपासना असंभवित है और एकाग्रता आसीन पुरुष को ही होती है । सोनेवाले को निद्रा ग्रस्त होना स्वाभाविक है । चलने फिरने से चित्त में चंचलता होती है । इसलिए आसीन होकर के ही ब्रह्मोपासन करना चाहिए । अतएव आसनादि के नियम का आगे प्रतिपादन करेगें वह भी संगत होता हैं । ।।७।।

सारबोधिनी—"निदिध्यासितव्यः" "ततस्तुतं पश्यते निश्चलं ध्यायमानः" [उस परमात्मा का श्रवण मननोत्तर काल में निदिध्यासन अर्थात्

अचलत्वं चापेक्ष्य ।४।१।९।

ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षम् (छा० ७।६।१) इत्यादिषु पृथिव्यादेरचलत्व चापेक्ष्य ध्यानमुक्तम् । ध्यानोपासनयोश्चैकार्थ्यादचलत्वमुपासनेऽप्यावश्यकम् तच्चासीनस्यैवेत्यासीनः ॥९॥

प्रत्ययप्रवाहरूपस्य विजातीय प्रत्ययप्रवाहरहितत्वसंभवोन सचलस्यापितु निश्चलस्यैव स्यात् । नैश्चल्यं चासीनस्यैव न तु चलतः शयानस्य वा तस्मादासीन एव ब्रह्मोपासनं कुर्यादिति ॥८॥

विवरणम्– "ध्यायतीवपृथिवीत्यादि" इत्यादिस्थले निश्चलत्वात्पृथिवीपर्वतादिस्थिराणां ध्यानं प्रतिपादनं कृतम्. तच्चध्यानं नत्वचलत्वापेक्षमिति तदन्यत्रापिध्यायमानत्वं निश्चलस्यैव । अतो निश्चलस्यैवध्यानमिति सिद्धं ततश्च यदिदमुपासनं तदासीनस्यैव न तु चलतः तिष्ठतोवेति हृदयम् ॥९॥

ध्यान करना "] [निश्चल होकर के परमात्मा का ध्यान करनेवाला उपासक उस परमात्मा को देखता है अर्थात् परमात्मा का साक्षात्कार करता है ।] इत्यादि स्थल में उपासना को ध्यान रूपता का प्रतिपादन किया गया है । और आसीन व्यक्ति को ही निश्चल ध्यान हो सकता है । इसलिए आसीन जो व्यक्ति है । वही मोक्ष प्रयोजनक ध्यानोपासना का अनुष्ठान करे ॥८॥

सारबोधिनी–"ध्यायतीव पृथिवीत्यादि" पृथिवी ध्यान करती है । पर्वत ध्यान करता है ,,इत्यादि वेदस्थल में तथा "ध्यायतिबकः" इत्यादि लौकिक स्थल में जो ध्यान का कथन है वह निश्चल पृथिव्यादिक में अचलत्वापेक्ष ध्यान कहा गया है । ध्यान तथा उपासक समानार्थक है । इसलिए उपासना में भी अचलत्व आवश्यक है । अतः समासीन उपासक ही ब्रह्म का उपासन करे यह सिद्ध होता है । न तु चलता हुआ शयन करता हुआ वा पुरुष उपासना करे; क्योंकि आसीन व्यतिरिक्त में अचलत्व सर्वथा असंभवित है ॥९॥

स्मरन्ति च ।४।१।१०।

"उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये" [गी० ६।१२] इति स्मरन्ति च तत्वविदस्समासीनस्यैव ध्यानम् ॥१०॥

यत्रैकाग्रता तत्राविशेषात् ।४।१।११।

यस्मिन् देशे काले वा चित्तैकाग्र्यं तस्मिन्नेव देशे काले चोपासनमनुतिष्ठेत् । यतोऽत्र देशकालयोर्विशेषाश्रुतत्वात् ॥११॥

इति श्रीरघुवरीयवृत्तावासीनाधिकरणम् ॥५॥

विवरणम्– गीतादिस्मृतिषु आसीनपुरुषस्यैवध्यानमुपासनापरपर्यायं विधेयमिति प्रतिपादयन्ति-शुचौदेशे प्रतिष्ठाप्य." "तत्रैकाग्रंमनः कृत्वा इत्यादिना । यदि नियमविशेषो न स्यादनियमेनैवध्यानमभिलषितं भवेत्तदागीतादिस्मृतिवाक्यानांस्पष्टमेव वैयर्थ्यं भवेत् । तदाहुरानन्दभाष्यकाराः– तत्रासने सुसुख सिद्धासनाद्यासन प्रभेदेष्वन्यतमेन चिरस्थितिसाधनयोग्येन उपविश्यैव न पुनरुत्थाय शयित्वा वा तिष्ठतश्चित्तवैयग्रचधौव्याच्छयानस्य च निन्द्रातन्द्रादिसम्भवात्" इति । तस्मादासीनस्यैवोपासनविधानं न तु चलतः शयानस्यवेति भावः ॥१०॥

विवरणम्– ननु मोक्षसाधनमुपासनमुपासकेन कर्त्तव्यम्, तदुपासनं कस्मिन् देशे कस्मिन् काले वा कर्त्तव्यम् इति जिज्ञासायामाह "यत्रै-

सारबोधिनी–[पवित्र देश में वस्त्र मृगचर्म कुशादिकासन अत्यन्त उन्नत तथा अत्यन्त नीचस्थिर आसन को प्रतिष्ठित करके उस आसन पर एकाग्र मनका करके कायिक वाचिक मानसिक क्रिया को संयत करके मनके पवित्रता के लिए योगाभ्यास करें"] इत्यादि स्थल में तत्ववेत्ताओं ने कहा है कि आसीन पुरुष योगाभ्यास करे । इससे सिद्ध होता है कि ध्यान लक्षण जो ब्रह्मोपासन है उसको आसीन व्यक्ति ही करे । न तु चलते फिरते अथवा सोते हुये चलते फिरते सोते हुए व्यक्ति से ध्यान असंभवित भी है । अतः बैठकर ही ध्यानोपासन करें ॥१०॥

आप्रयाणाधिकरणम् ॥६॥

आप्रयाणात्तत्रापि हि दृष्टम् ।४।१।१२।

एतद्ब्रह्मोपासनमेकस्मिन्नहन्यसकृद्विधेयमाप्रयाणादनुदिनं वेति

काग्रतेत्यादि" सूत्रम् । यत्र यस्मिन् देशे यत्र काले वा चित्तस्यमनस-उपास्योन्मुखता भवेत्. तस्मिन्नेव काले ध्यानानुष्ठानं कर्त्तव्यम्, न तु अमुकदेशेऽमुकब्राह्ममुहूर्त्तादिकाले वा तदनुष्ठानमिति । यतोदेशकालादि विधाने विशेषस्याश्रवणात् । यद्यपि "समेशुचौशर्करावन्हिबालुका विवर्जिते" इत्यादिनादेशकालयोर्विशेषतः कथनं कृतं तथापि एतद्वचन मनस एकाग्रता प्रयोजकदेशकालमेव कथयति. न तु देशविशेषस्य कालविशेषस्य वाग्रहं करोति । तस्माद्यत्र देशे काले वा मनस एकाग्रताभवेत्तत्रैव देशे काले वा ध्यानलक्षणमुपासन विधेयमिति भावः ॥११॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ श्रीरघुवर्य वृत्ति विवरणे आसीनाधिकरणम् ॥५॥

विवरणम्-यदिदं मोक्षसाधनं ध्यानापरपर्यायमुपासनं तत् यदाकदाचिदेकदिनमेवानुष्ठेयमथवा यावज्जीवनप्रतिदिनं तादृशमुपासनं विधे-

सारबोधिनी-उपासक पुरुष बैठ करके मोक्ष कारण ध्यान लक्षण उपासना का अनुष्ठान करें ऐसा पूर्वपक्ष में कहा है । परन्तु अनुष्ठान मात्र देश काल सापेक्ष होता है तो किस देश में तथा किस काल में बैठ करके उपासना का अनुष्ठान करें । एतादृश जिज्ञासा के उत्तर में कहते हैं "यत्रैकाग्रता" इत्यादि सूत्रम् । जिस देश में तथा जिस काल में मन की एकाग्रता सम्पन्न हो उसी देश में उसी काल में उपासनानुष्ठान करे उपवेशन के समान कोई देश काल में विशेष नियम नहीं है । क्योंकि देशकाल के विषय में कोई विशेषता का श्रवण नहीं है । यद्यपि " समेशुचौशर्करावह्निवालुका विवर्जिते " इत्यादिस्थल में देश विशेष का श्रवण है तथापि वह बचन मन की एकाग्रता मात्र का विधानपरक है । देश काल विशेषता का विधान परक नहीं है ॥११॥

सारबोधनी- मोक्ष का कारण रूप जो ब्रह्मोपासन है वह एक ही दिन में वारंवार करना चाहिए अथवा प्रयाण पर्यन्त. अर्थात् यावज्जीवन प्रतिदिन

-संशयः । तत्रैकवासरेऽप्यसकृदनुष्ठिते शास्त्रस्य चारितार्थ्यान्नानवरतमिति पूर्वःपक्षः । अत्राभिधीयते-"स खल्वेवं वर्तयन् यावदायुषम् [छा० ८।१५।१।] इत्यादि श्रुतिष्वा देहस्थितिदृष्टत्वादामरणमहर्दिवमुपासनं विधेयम् ॥१२॥

इति श्रीरघुवरीयवृत्तावाप्रयाणाधिकरणम् ॥६॥

यमिति संशयः । तत्र पूर्वपक्षस्तु यदाकदाचित् कियत्कालमेवानुष्ठेयं नतु यावज्जीवनं तावतैवशास्त्रार्थस्य संपादितत्वात्प्रयाजादिवदिति । सिद्धान्तस्तु " स खल्वेवं वर्तयन्" इत्यादि श्रुतेः प्रयाणपर्यन्तं प्रतिदिनमेवोपासनमनुष्ठेयम् । तथा आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तयेति वृद्धस्मरणादपि तथानुष्ठेयमिति दर्शयितुमुपक्रमते "एतद्ब्रह्मोपासनमित्यादि" एतद्ब्रह्मोपासनम्=मोक्षकारणीभूतं ब्रह्मध्यानमेकदिवसे एवानुष्ठेयम्, अथवा प्रयाणपर्यन्तं यावज्जीवनं प्रतिदिनमनुष्ठेयमितिसंशयः। तत्रैकदिनेवारंवारानुष्ठाने कृते उपासना प्रतिपादकशास्त्रस्य प्रयाजादिवच्चरितार्थत्वान्नमुहुर्मुहुर्विधेयमुपासनमिति पूर्वपक्षाशयः । अत्रोत्तरम् "स उपासको यावदायुषमुपासनमावर्तयेदित्यर्थक श्रुत्यादौ यावत् कालं शरीरस्थितिस्तावत्कालपर्यन्तम् मरणपर्यन्तमित्यर्थः । अहर्दिवं प्रतिदिनं ब्रह्मोपासनं कर्त्तव्यमेव । नत्वनेकवारमेकदिने एव कर्त्तव्यं "सर्वज्ञस्य सर्वशक्तेर्वात्सल्यजलधेर्भगवतः श्रीरामस्यस्वभाव एवैष यत् स प्रार्थित एव ब्रह्मोपासन करना चाहिए—ऐसा संदेह होता है । इसमें पूर्वपक्षवादी कहते हैं कि एक ही दिन वारम्वार उपासना का अनुष्ठान करने से भी जब उपासना विधायक शास्त्र की चरितार्थता हो जाती है तब यावज्जीवन प्रतिदिन तादृशोपासन का अनुष्ठान निरर्थक है । जैसे एक बार एक दिन में प्रयाजानुष्ठान करने से ही स्वर्गादि फल की सिद्धी की संभावना होने से प्रतिदिन प्रयाजानुष्ठान नहीं किया जाता है उसी तरह प्रकृत में भी समझना चाहिए । एतादृश पूर्वपक्ष के उत्तर में कहते हैं कि "आप्रयाणात्" इत्यादि सूत्र । जो यह ब्रह्मोपासन है वह प्रयाण पर्यन्त=यावज्जीवन प्रतिदिन अनुष्ठेय है । क्योंकि शास्त्र में याव-

॥ तदधिगमाधिकरणम् ॥७॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ।४।१।१३।

अथोपासनफले विचिन्त्यमाने संशयः । किमुपासनरूपविद्ययाघनाशो भवति न वेति । तत्रानिष्टफलजनकस्य "नाभुक्तं क्षीयते कर्म"

मत्रं करोतीत्युपायत्वप्रार्थनाऽवश्यकर्तव्येत्यपि ध्येयम् । सेयमुपायत्वप्रार्थनैव प्रपत्तिः । प्रारब्धातिरिक्तकर्मनिवर्तकोऽसकृदाप्रयाणादनुष्ठेयश्च भक्तियोगः 'अन्त काले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति मद्भावं याति नास्त्यत्र संशयः । "इत्यादिभगवद्वचनप्रामाण्यादन्तिमस्मृतिमपेक्षते " । (गीतानन्दभाष्यम् १८।६६) इत्याचार्योक्तेः अस्मत्तन्त्रे भक्तिप्रपत्युपासनादिकाः समपर्याया इतिनविस्मर्त्तव्यमितिदिक् ॥१२॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ श्रीरघुवरीयवृत्ति विवरणे आप्रयाणाधिकरणम् ॥६॥

विवरणम्—एतावता प्रबन्धेनावशिष्टः विद्यायाः स्वरूपमेव विचारितम्, ततः परं विद्यायाः फलं किमिति तद्विषये विचारः प्रस्तूयते ।

ज्जोवन प्रतिदिन अनुष्ठान करना चाहिए ऐसा देखने में आता है । "सखल्वेवम्" इत्यादि, वह उपासक याज्जीवन उपासना का आवर्तन करता हुआ" इत्यादि श्रुति में यावद्देह धारण है तावत् काल पर्यन्त उपाना का आवर्तन देखने में आया है । ईसलिए याज्जीवन उपासना का प्रतिदिन अनुष्ठान करना चाहिए । अदृष्ट फलक प्रयाजादिक का अनुष्ठान एक बार करने पर भी शास्त्र की चरितार्थता हो सकती है । किन्तु दृष्टफलक उपासन में तो यथा शास्त्र प्रतिदिन यावज्जीवन अनुष्ठान होना चाहिए ऐसा शास्त्र तथा आचार्य का मत है ॥१२॥

सारबोधनी— ब्रह्मोपासना का क्या फल है इसका विचार करने पर संशय होता है कि यह जो ब्रह्मोपासना रूप ब्रह्म विद्या है तादृश विद्या से

इत्यादिशास्त्रबलादुपासनेन विनाशासम्भवाद्भोक्तव्यत्वमापततीतिपूर्वः पक्षः। अत्राभिधीयते "एवं विदिपापं कर्म नश्लिष्यते" [छा० ४।१४।३।] "एवं हास्य सर्वे पाप्मानः विदूयन्ते" [छा०५ २४।३।] 'क्षीयन्ते चास्य

तत्र ब्रह्मज्ञानिनां विद्या फलस्य विरुद्धं यत् पापलक्षणं तस्य विनाशो भवति नवेतिसंशयः। अर्थाद् ब्रह्मविद्ययापापस्य विनाशो भवति नवेति संशयः। तत्र विद्यया पापस्य विनाशो न भवति. यतः 'नामुक्तं क्षीयते कर्मकल्पकोटिशतैरपि" 'कदाचित्स्वकृतं कर्मकूटस्थमिह तिष्ठति। मज्जमानस्य संसारे यावद्दुःखातिगो भवेत्' [यावत् कालं कर्मणां भोगो न जायते तावत्काल किं बहुना कल्पकोटि शतैरपि तस्य विनाशो न जायते अर्थात् भोगानन्तरमेव कर्मणां विनाशो भवति 'इत्यादि श्रुत्याफलभोगादेवकृतकर्मणां विनाश इति पूर्वपक्षः। उत्तरं तु कृतमपिकर्म ब्रह्मविद्ययाविनश्यत्येव 'सर्वे पाप्मानः प्रदूयन्ते" इत्यादिश्रुतिबलादिति दर्शयितुमुपक्रमते "अथोपासन फले" इत्यादि। उपासनाया यत्फलं ब्रह्मावाप्तिस्तद्विचारे प्रस्तुते संशयो जायते। उपासनलक्षणविद्यया ब्रह्मविन्निष्ठस्य पापकर्मणो विनाशोभवति नवेति। तत्र शास्त्राविहितब्रह्महननसुरापानादिजनि-

ब्रह्मज्ञानी में जो पाप कर्म है उसका विनाश होता है अथवा नहीं होता है। अनिष्टकर्म ब्राह्मण हनन सुरापानादिक उससे संपादित जोपाप, उसका "नाभुक्तं क्षीयते कर्म" इत्यादि शास्त्र के बल से यह सिद्ध होता है कि ब्रह्मोपासना से विनाश नहीं होता है अवश्य भोक्तव्यत्व ही तादृश कर्म में है। इस पूर्व पक्ष के उत्तर में कहते हैं कि "तदधिगमे" इत्यादि सूत्रम्। तदधिगमे=अर्थात् ब्रह्मविद्या की प्राप्ति हो जाने से "उत्तरपूर्वयोः" उत्तर तथा पूर्व अघ पाप का अश्लेष सम्बन्धाभाव तथा विनाश हो जाता है। उत्तर ब्रह्मविद्या के बाद होने वाला तथा पूर्व अर्थात् ब्रह्मविद्योत्पत्ति के पूर्व कालिक संचितदुष्कृत का सम्बन्धाभाव तथा विनाश हो जाता है। उत्तर कर्म

कर्माणि" [मु०२।२।८।] इति व्यपदेशाद्विद्याधिगमेनतन्महिम्नोत्तरपूर्वाघयोरश्लेषविनाशौ विदुषोऽवश्यम्भवतः "नाभुक्तमितिवचनन्तु प्रारब्धपरमिति न तेन कश्चिद्विरोधः ॥१३॥

इति श्रीरघुवरीयवृत्तौ तदधिगमाधिकरणम् ॥७॥

तपापकर्मणांविद्यया विनाशोभवति. "नाभुक्तंक्षीयते कर्मकल्पकोटिशतैरपि" इत्यादिशास्त्रेण कृतकर्मणां फलभोगादेव विनाशश्रवणादकृतभोगस्य पापकर्मणोविद्याविनाशासंभवादितिपूर्वपक्षः।

तत्रोत्तरमाह "तदधिगमे" इत्यादि. तदधिगमे ब्रह्मविद्यायाः प्राप्त्यनन्तरं विद्याबलात्, उत्तरकालिकपापकर्मणामश्लेषः संबन्धाभावः। पूर्वकर्मणामर्थात् तत्वज्ञानात् पूर्वकालेजातानां पापकर्मणां विनाशो जायते एव। कुतः ? तद्व्यपदेशात् शास्त्रे तथैव प्रतिपादनादिति सूत्रार्थः। एतदेव विभज्यदर्शयति "अत्राभिधीयते" इति। शास्त्रमेवोदाहरति "एवंविदीत्यादि" यथा इषिकातूलं वह्नौप्रक्षिप्तं समूलं विनश्यति. तथैव एवं विदि ब्रह्मज्ञानिनि यानि कर्माणि सन्तितानिविद्यारूपवह्निबलाद्विनष्टानि भवन्तीत्यर्थः

तथा "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्यादि पूर्वसञ्चितकर्मणां विनाशं प्रतिपादयन्ति श्रुतयः। एवं पुष्करपलाशः कमलपत्रं जले यथा श्लिष्टं न

का सदा प्रागभाव ही रहता है और पूर्व कर्म का तत्व ज्ञान से विनाश हो जाता है। क्यों ऐसा होता है ? इसके उत्तर में कहते हैं' 'तद्व्यपदेशात्'' वेदान्तशास्त्र में ऐसा ही प्रतीपादन किया गया है। तादृश श्रुति को बतलाते है "यथा पुष्कर पलाश आपोनश्लिष्यन्त एवमेवविदि कर्मनश्लिष्यते" "तद्यथेषिकांतूलमग्नौ प्रोतं प्रदूयेतैवंह्यस्य सर्वे पाप्मानः प्रदूयन्ते" "क्षीयन्ते चास्यकर्माणि" इत्यादि [जैसे कमल में जल का श्लेष नहीं होता है। उसी तरह तत्त्वज्ञानियो में पापकर्म का श्लेष नहीं होता है। ईषीकातूल अग्नि

भवति तथैव. ब्रह्मज्ञानिनि पापकर्माश्लिष्टं भवतीति. उत्तरपापकर्मणः संश्लेषाभावं दर्शयन्ति। यद्यपि "नामुक्तं क्षीयते" इत्यादि वचन विरोधः स्यात्. तथापि समुदाहृतवचनस्य तद् दृढतायामेवतात्पर्यम्। अश्लेषविनाशप्रतिपादकवचनानि तु कर्मणि या फलोत्पादकता शक्तिर्विद्यते. तादृशशक्तेर्विनाशसामर्थ्यं तथोत्पत्तिनिवारकसामर्थ्यञ्चब्रह्मविद्यायां विद्यते इत्यभिप्रायकानि। ततश्चोभयोर्भिन्नविषयत्वेन प्रतिवध्यप्रतिप्रतिबन्धकभावो न भवति. हिंसा अहिंसा प्रतिपादकवचनवदिति। केचन "ना भुक्तम्" इति वचनंप्रारब्धकर्मपरकत्वं तस्य च भोगादेव क्षय इत्यर्थं प्रतिपादयन्ति तद्भाष्यकाराशयविरोधादुपेक्ष्यम् तथाहि तत्राचार्याः "अत्र दुरितकर्मणां फलानुकूलाशक्तिश्च

में देने पर जैसे नष्ट हो जाता है। उसी तरह तत्वज्ञान रूप अग्नि से पाप नष्ट हो जाता है। अर्थात् स्वकीय फल का उत्पादन करने में असमर्थ हो जाता है भंजित चणकादि बीज की तरह"। जिसने उस परमात्मा का साक्षत्कार कर लिया उसको हृदय ग्रन्थी टूट जाती हैं। तथा सभी प्रकार के मनोगत संशय विकल्प विनष्ट हो जाते हैं और सभी कर्म भी विनष्ट हो जाते हैं तत्वज्ञानसे इत्यादि व्यपदेश से सिद्ध होता है विद्या की प्राप्ति होने से विद्या बल से उत्तर पूर्व पाप कर्म का विनाश हो जाता है यह विनाश अवश्य भावी है। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" [अभुक्तकर्म का करोड़ो वर्ष में विनाश नहीं होता है'] यह जो वचन है वह प्रारब्ध कर्म परक है अर्थात कर्म तीन प्रकार का होता है सञ्चित, क्रियमाण तथा प्रारब्ध। इसमें तत्वज्ञान होने से प्रथम दो कर्म तो नष्ट हो जाते हैं। परन्तु तृतीय जो प्रारब्ध कर्म है उसका विनाश तो फल भोग करने से ही होता है अतएव प्रारब्ध कर्म का भोग करने के लिए तत्वज्ञानी का शरीरावस्थान तथा कायव्यूहादिक आवश्यक होता है तो "नाभुक्तम्" इत्यादि जो वचन है वह मात्र प्रारब्ध कर्म परक है। इसलिए पूर्वापर वचनों में विरोध नहीं होता हैं। भगवदनुकम्पादी कर्मबन्धन है वह

इतराधिकरणम् ॥८॥

इतरस्याप्येवमसंश्लेषः पाते तु ।४।१।१४।

अथेतरस्य सुकृतस्याप्येवमसंश्लेषविनाशावुपपद्येते नवेति संशये सुकृतकर्मणो विदुष इष्टत्वेनाश्लेषविनाशाविति पूर्वः पक्षः। सिद्धान्तस्तु–

भगवदनुकम्पयैव। तस्याश्च भगवद्भजनादिरूपया भगवत्प्रियतमया विद्यया निवारणमुत्पत्तेरवरोधश्च" इति ॥१३॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ श्रीरघुवरीयवृत्तिविवरणे तदधिगमाधिकरणम् ॥७॥

विवरणम्—समुत्पन्नब्रह्मविद्यस्य विदुषो ब्रह्मविद्याबलात् पापकर्मणामश्लेषविनाशौ भवत इति पूर्वं प्रतिपादितम् तत्र यथा पापकर्मणः संसारजनकत्वेन तद्विनाश आवष्यक एवं पुण्य कर्मणामपि संसारजनकत्वेन पापवत् पुण्यस्यापि विनाशो भवति नवेति संशयः तत्र पुण्यकर्मणां सुखजनकत्वेन तत्त्वज्ञानिनामपि तस्यावश्यकत्वान्न पुण्यकर्मविनाश इति पूर्वपक्षः। उत्तरंतु यथापापं कर्ममोक्षविरोधितया तदीयहानमावश्यकं अनन्य निष्ठ ज्ञानि भक्तों के लिये यत्किञ्चित्कर होता है भगवदनुकम्पा प्राप्त जन सब कर्म बन्धन रहित होते है अतः प्रकृत प्रसङ्ग में कोई विरोधाभास नहीं है ॥१३॥

सारबोधिनी–तत्व ज्ञानियों का जो पाप कर्म है वह तत्व ज्ञान के बल से विनष्ट हो जाता है। ऐसा पूर्व में कहा है। यदि पाप कर्म मोक्ष प्रतिबन्धक है तो पुण्य कर्म भी मोक्ष प्रतिबन्धक है। तो इस पुण्यकर्म का तत्वज्ञान से विनाश होता है अथवा नहीं ऐसा संशय होता है। इसमें पूर्वपक्षवादि कहते हैं कि पाप कर्म तो मोक्ष का विरोधी है इसलिए तत्व ज्ञान से भले ही उसका विनाश हो किन्तु सुकृत कर्म तो मोक्ष का प्रतिकूल नही है। अपितु सहायक ही है। तब तत्त्वज्ञानियों का जो पुण्यकर्म है उसका विनाश नहीं होता है।

विद्याफलमोक्षविरोधितया सुकृतकर्मणोऽप्यश्लेषविनाशावघवदेवोपपद्येते। "तत्सुकृतदुष्कृते धुनुते" [कौ० १।४।] इति सुकृतेऽप्यघवद्ध्व

तथा पुण्य कर्मणामपि सुखात्मकसंसारजनकत्वेन मोक्षप्रतिकुलत्वात्त स्यापीपापवद्विनाश: आवश्यक एवेत्याशयेन सूत्रव्याख्यानायोपक्रमते "अथेतरस्य सुकृतस्याप्येवमेवमित्यादि" अथेतरस्य पापकर्मभिन्नस्य सुकृताख्यकर्मण: पापवदेव अश्लेषविनाशौ भवतो न वा अर्थात् तत्वज्ञानिनां विद्यावलाद् यथा पापकर्मविनश्यति तथा तेषां यत् सुकृमं पुण्याख्यं सुखजनकं कर्म तस्य तत्त्वज्ञानाग्निनाविनाशो जायते नवेति पूर्व पक्षाशय:। सिद्धान्तयति "इतरस्याप्येवमित्यादि" सूत्रम्। एवं यथा तत्त्वज्ञानिनां तत्त्वज्ञानेन पापं कर्मापगतं विनष्टं भवति एवमेव इतरस्य पापेतरस्य पापभिन्नस्य सुखजनकस्यापि पुण्यकर्मणोऽश्लेषोविनाशश्च भवत्येव। यथा पापं कर्मदु:खसंवलितसंसारजनकतया मोक्षं प्रतिबध्नन् मोक्षविरोधि भवति ततश्चमोक्षविरोधित्वात्पापस्याश्लेषविनाशावावश्यकावेव तथैव सुकृतकर्मापि सुखात्मकसंसारजनकतया मोक्ष प्रतिकूलत्वात्तदीयविनाशोप्यावश्यक एवेति। एतावानेव विशेषो यदेकं दु:खात्मकसंसारजनकतयामोक्ष प्रतिबन्धकम् अपरं तु सुखात्मकसंसार जनकतयाकोक्षप्रतिबन्धकम्। प्रतिबन्धकत्वमुभययो: सममेव लौह

इसके उत्तर में कहते हैं कि "इतरस्यापीत्यादि" सुत्रम्। जिस तरह तत्त्व ज्ञान से मोक्ष बाधक कर्म का विनाश होता है उसी तरह पुण्य कर्म का भी विनाश होता है। क्योंकि "सुकृत दुष्कृते धुनुते" इस श्रुति में पापकर्म के समान पुण्य कर्म का विनाश प्रतिपादन किया गया है। इसी वस्तु को बतलाने के लिए कहते है " विद्या फल मोक्ष विरोधितयेत्यादि" ब्रह्म विद्या का फल है मोक्ष तादृश मोक्ष का विरोधि होने से पाप की तरह तत्त्वज्ञानि निष्ठ सुकृत कर्म का जो कि स्वर्गादि फल का जनक है उसका भी पापवत् अश्लेष निवाश होता ही है। क्योंकि "तत्सुकृतदुष्कृते धुनुते" [तत्त्वज्ञानिनिष्ठ पुण्य

पदेशाविद्यानुगुणवृष्टयन्नफलस्य सुकृतस्य तु तदानीमविनष्टत्वेन शरीरपातानन्तरमसंश्लेषो भवति ॥१४॥

इति श्री रघुवरीयवृत्ताावितराधिकरणम् ॥८॥

सुवर्णनिर्मितश्रृङ्खलेतिवत् । यथालोहमयीशृङ्खला लोकान् प्रतिबन्धाति तथैव स्वर्णशृङ्खलापितान् प्रतिबध्नात्येव बन्धकर्तृत्वयोरुभयत्रापिसमानत्वात् । तदुक्तम् "कामं कुलकलङ्काय कुलजातापिकामिनी । श्रृङ्खला स्वर्णजातापि बन्धनाय न संशयः" इति । तस्मात् पापकर्मवत् पुण्यकर्मणामपि अश्लेषविनाशौ भवत एव । श्रुतिरपि द्वयोर्विनाशं प्रतिपादयति "तत्सुकृतदुष्कृते धुनुते" इति । ननु यदि तत्त्वज्ञानिनां सुकृतदुष्कृतयोरुभयोरपिविनाशस्तदा शरीरधारणं कथं स्यादित्यत आह "पातेतु" तत्वज्ञानादनन्तरमपि विद्यानुगुणफलकस्य सुकृतस्य तदानींसत्वं विद्यत एव यदातु शरीरपातो जायते तदैव सुकृतकर्मणाश्लेषविनाशौ भवतः । अतो न भवति कोऽपि विरोधः पूर्वापरप्रकरणयोरिति । यद्यपि बन्धजनकत्वेनोभयोः समत्वं तथापि एकस्य तावदवस्थानं यावत् देहपातोन भवति देहपाते तु सुकृतस्याप्यश्लेषविनाशौ भवत एव तत्त्वज्ञानिनामिति भावः ॥१४॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृत्तौ श्रीरघुवरीयवृत्ति विवरणे इतराधिकारणम् ॥८॥

पाप दोनों का विनाश होता है"] इस श्रुति से पाप को तरह सुकृत का भी विनाश का प्रतिपादन किया गया है । परन्तु ब्रह्मविद्या का अनुगुण अर्थात् सहायक जो सुवृष्टि तथा अन्नादि फलक जो सुकृत उसका उस समय में विनाश न होकर शरीर पात के बाद में अश्लेष और विनाश होता है । अर्थात् दुःख जनक जो पाप उसका तो विनाश शरीरावस्थान काल में ही हो जाता है । और विद्या सहायक जो सुकृत कर्म हैं । उसका अश्लेष विनाश तो शरीर पात के अनन्तर में होता है ॥१४॥

॥ अनारब्धकार्याधिकरणम् ॥९॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ।४।१।१५।

विद्याधिगमेनाखिलसुकृतदुष्कृतयोर्विनाशो भवत्युतानारब्धकार्ययोरिति संशये "सर्वे पाप्मानः प्रदूयन्ते" "क्षीयन्ते चास्य कर्माणि"

विवरणम्= इतः पूर्वप्रकरणे ब्रह्मोपासकानां यानि पूर्वकर्माणि तानि सर्वाण्यपि ब्रह्मविद्यया गतानि भवन्तीति प्रतिपादितम् । तत्र प्रारब्धकर्मसहितानां सर्वेषां विनाशो भवति । अथवा प्रारब्धेतरकर्मणामेव विनाशो जायते इति संशयो भवति तत्र क्षीयन्ते चास्यकर्माणीत्यादिश्रुतिबलात्सर्वेषां विनाश इति पूर्वपक्षे सिद्धान्तं द्योतयितुमाह "अनारब्धकार्ये" इत्यादि सूत्रम् । प्रारब्धकर्मव्यतिरिक्तकर्मणामेव विद्यया विनाशः । "तस्य तावदेव चिरम्" इत्यादि श्रुत्या विनाशक शास्त्रे संकोचादित्याशयं परिष्कर्तुमुपक्रमते "विद्याधिगमेन ब्रह्मविद्यायाः प्राप्तौसत्यां सर्वेषामारब्धकार्याणामनारब्धकार्याणां सुकृतदुष्कृतानां कर्मणां विनाशो जायते अथवा अनारब्धकार्याणामेव विनाशो जायते इति

सारबोधनी—"क्षीयन्तेचास्य कर्माणितस्मिन् दृष्टे परावरे" इत्याद श्रुति से सिद्ध हुवाकि उपासक को ब्रह्मविद्या की प्राप्ति होने से कर्म का विनाश है । परन्तु इसमें संशय होता है कि कर्म तीन प्रकार के होते है । एक संचित क्रियमाण तथा प्रारब्ध कर्म तो इन सब कर्मो का बिना विद्या से होता है । कथवा प्रारब्धेतर कर्म का विनाश होता है । इसमें पूर्वपक्ष वादो कहते हैं कि "सर्वेपाप्मानः प्रदूयन्ते" "क्षीयन्तेचास्य कर्माणि [इस विद्यावान पुरुष का पुण्यपाप लक्षण कर्म प्रनष्ट हो जाता हैं। उस परपात्मा का साक्षात्कार जिस को हो गया है उस उपासक का सकल कर्म विनष्ट हो जाता है ।] इत्यादि श्रुति वचन से सिद्ध होता है कि तत्वज्ञानी का अशेष कर्म का क्षय हो जाता हैं विद्या के वल से सिद्धान्तस्तु "तस्य तावदेवचिरं यावन्नविमोक्ष्येऽथसंपत्स्ये" [उसविद्यावान को भी मोक्ष होने में विलंब रहता है जब तक कि शरीरपात नहीं होता है जब इस शरीर का पतन हो जाता है तब मोक्ष प्राप्त होता

इत्यादिवचनैरशेषकर्मक्षय इति पूर्वः पक्षः। सिद्धान्तस्तु–विदुषोऽपि "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" [छा०६।१४।२।] इति देहपातावधिविशेषश्रवणाद्विद्योत्पत्तेः प्राचीने अनारब्धकार्ये सुकृतदुष्कृते एव विनश्यतः ॥१५॥

इति श्रीरघुवरीयवृत्तावनारब्धकार्याधिकरणम् ॥९॥

संशयः। तत्र "सर्वे पाप्मानः प्रदूयन्ते" "क्षीयन्ते चास्य कर्माणि" [अस्यब्रह्मज्ञानिनो यानि कर्माणि तानि सर्वाण्यपि विद्यावलेन विनष्टानि भवन्ति"] इत्यादि वचनेषु सर्वपदसमभिव्याहृतकर्मपदसमभिहारात् विदुषां सर्वकर्मणामेव क्षयो जायते इति पूर्वपक्षाशयः।

सिद्धान्तस्तु' 'अनारब्धकार्ये" इत्यादि सूत्रम्। अनारब्धकार्यकसञ्चितपुण्यपापयोरेव विद्यया विनाशो जायते नतु प्रारब्धकार्ययो विद्यया विनाशो भवति। कुत ? तदवधेः आरब्धकार्यकयो पुण्यपापयोः शरीर पातपर्यन्तावधेः "तस्यतावदेव चिरम्" इत्यादि श्रुत्या प्रतिपादनात्। तस्माद्विद्यया सञ्चितकर्मणामेव विनाशो नत्वितरस्य ॥१५॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ श्रीरघुवरीय वृत्ति विवरणे अनारब्धकार्याधिकरणम् ॥९॥

है"] इत्यादि वचनों से शरीरपात का अवधिरूप विशेष का श्रवण होने से विद्या उत्पत्ति के पूर्व कालिक अनारब्धकार्यक जो पुण्य पाप रूप कर्म है उन्हीं का विद्या बल से विनाश होता है। किन्तु प्रारब्ध कर्म का नहीं यद्यपिशास्त्र में सुनने में आता है कि विद्वान् का अशेष कर्म विनष्ट हो जाता है। तथापि प्रारब्धेतर कर्म का विनाश होता है ऐसा मानना चाहिए। अन्यथा विद्योत्तर काल में शरीर धारक कर्म का अभाव होने से "तस्यतावदेव चिरम्" इत्यादि श्रुति से शरीरपात का जो अवधि श्रुत है वह असंगत हो जायगा। अतः ब्रह्मविद्या से संचित क्रियमाण कर्म का ही विनाश होता है प्रारब्ध कर्म का नहीं अन्यथा "नाभुक्तं क्षीयते कर्म" इत्यादि श्रुति का बाध तथा शरीरक कर्म का अभाव होने से शरीरपात का अवधि श्रवण भी असंगत हो जायगा। तथैव सूत्रोक्त कथन भी समंजस होता है। ॥१५॥

॥ अग्निहोत्राद्यधिकरणम् ॥१०॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ।४।१।१६।

पुण्यस्याप्यसंश्लेषविनाशावभिहितावितरस्येति सूत्रेण । एवञ्चाग्निहोत्रादीनामपि पुण्यत्वाविशेषादिह विचिन्त्यते । नित्यनैमित्तिकरूपाणि-अग्निहोत्रादीन्याश्रमकर्माणि ब्रह्मविदानुष्ठेयानि न वेति संशयः ।

विवरणम्= अनारब्धशरीरेन्द्रियादिकार्थाणां विद्याया विनाशो जायते इति पूर्वं प्रतिपादितम् । तत्राग्निहोत्रादिनित्यनैमित्तिकाश्रम कर्मणां कर्मत्वाविशेषात् तेषामपि विद्यया विनाशो भवति नवेति संशयः । अग्निहोत्रादीनामपि कर्मत्वाविशेषाद्विनाशो भवत्येवेति न तदाचरणं ब्रह्मविदाकर्त्तव्यमिति पूर्वः पक्षः ।

सिद्धान्तस्तु अग्निहोत्रादिकंतु कर्मकर्त्तव्यमेव तादृशंकर्मतु विद्या कार्याय इति दर्शयितुमुपक्रमते "पुण्यस्याप्यसंश्लेषविनाशावित्यादि" पुण्यस्यापि कर्मणोऽऽश्लेषविनाशौ विद्यावलेन भवतीति प्रतिपादितम् "इतरस्याप्येवमसंश्लेष" इत्यादि सूत्रे । तत्राग्निहोत्रादिनित्यनैमित्तिकाणां पुण्यकर्मत्वाविशेषात् तस्यापि विनाशो भवति न वेति विचार्य्यते ।

सारबोधिनी—ब्रह्मविद्यावान का जो पुण्य कर्म है उसका भी अश्लेष तथा विनाश हो जाता है ऐसा "इतरस्याप्येवमश्लेषः" इत्यादि सूत्रमें प्रतिपादन किया है । ऐसा हुआ तव तो नित्य नैमित्तिक जो वर्णाश्रम विहित अग्निहोत्रादिक कर्म हैं वे भी तो पुण्य कर्म है तो उनके विषय में यहाँ विचार करते है । नित्य नैमित्तिक लक्षण जो अग्नि होत्रादिक वर्णाश्रम विहित कर्म हैं उनका अनुष्ठानब्रह्मज्ञानी करें अथवा न करें ऐसा संशय होता है ।

इसमें पूर्वपक्षवादी कहते हैं कि अनारब्ध कार्यक जो पुण्य तथा पाप कर्म इन दोनों का विनाश विद्या से होता है ऐसा "अनारब्ध कार्ये" इत्यादिक सूत्र में प्रतिपादन किया । तो नित्य कर्म भी तो अनारब्ध कार्यक है नित्याग्नि होत्रादिक कर्म का भी विनाश हो तो तदनुष्ठान ब्रह्मज्ञानीको नहीं करना चाहिए

अनारब्धकार्ययो सुकृतदुष्कृतयोरुभयोरपि विनाशवचनान्नानुष्ठेयानीति पूर्वः पक्षः। अत्राभिधीयते—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" [बृ०४।४।२२।] इत्यादि श्रुतिषु तदनुष्ठितिदर्शनादवश्यमनुष्ठेयानि। यतस्तेषां विद्योन्नतिकरत्वेन तदानुगुण्यम् ॥१६॥

तत्र नित्यनैमित्तिकान्यग्निहोत्रादि वर्णाश्रमकर्माणि ब्रह्मविदा अनुष्ठेयानिनवेति संशयः। तत्र यदा सर्वकर्मविनष्टं भवति तदाकर्मत्वस्याग्निहोत्रादावपि सत्वेन ब्रह्मविदा नित्यान्यपि आश्रमकर्माणि नानुष्ठेयानीति पूर्वः पक्षः। तमिमं पूर्वपक्षं निराकर्तुमाह "अत्राभिधीयते" इत्यादि। अग्निहोत्रादिवन्नित्यमाश्रमकर्म तत् विद्याया यत्कार्यं तादृशकारित्वादनुष्ठेयमेव कुतः! तद्दर्शनात् तमेतमित्यादिना तदनुष्ठेयताया प्रतिपादनात्। तथाहि "तमेतमित्यादि" ["तमेतं परमात्मानं ब्राह्मणाः वेदानुवचनेन स्वाध्याय कर्मणायज्ञेन दानेन तथा शरीराविरोधितपसावेदितुमिच्छान्ति"] इत्यादि श्रुतिषु यज्ञादीनामनुष्ठानकर्त्तव्यतायाः प्रतिपादनात् विद्या सहकारिभूतानि कर्माण्यवश्यमेवानुष्ठेयानीति। यत एतेषामग्निहोत्रादीनां विद्या सहकारितया विद्यानुगुण्यमेव। तस्मात्पूर्वोदितानि नित्यनैमित्तिकाश्रमकर्माणि विद्यावतापि नहेयानि किन्तु

इस प्रश्न का उत्तर करने के तथा सूत्र व्याख्यान करने के लिए कहते है "अत्राभिधीयते" इत्यादि। "तमेतमित्यादि" [जड़चेतन शरीरी उस परमात्मा को ब्राह्मण लोग वेदानुवचन स्वाध्याय से यज्ञदान और शरीराविरोध तपस्या के द्वारा जानने की इच्छा करते है"] इत्यादिक श्रुति में अग्नि होत्रादिक विद्या सहायक कर्मों का अनुष्ठान देखने में आता है। इसलिए इन कर्मों का अनुष्ठान ब्रह्मज्ञानी को भी अवश्यमेव करना चाहिए। क्योंकि ये सब नित्य नैमित्तिक आश्रम कर्म जो है वे विद्या के उन्नति में सहायक हैं। इसलिए ये विद्या के अनुगुण ही है विरोधि नहीं। प्राचीनाचार्यों ने भी कहा है "नित्य-

अतोऽन्यापि ह्येकेषामुभयोः ।४।१।१७।

अग्निहोत्रादेः सुकृतस्य विद्योन्नतिफलार्थमनुष्ठेयताचेत् "तस्य पुत्राः दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" इति वचनस्य क्व प्रसर इत्यभिधीयते—अग्निहोत्रादि रूपायाः साधुकृत्यायाः अन्यापि साधुकृत्याविदुषोऽस्त्येव। यस्याश्च विनियोजकमेकेषां शाखिनां सुहृदः साधुकृत्यामिति वचनम्। बलवत्कमविरुद्धफलयोर्विद्योत्पत्तेः पूर्वोत्तरवर्त्तिनोरुभयोरपि सुकृतदुष्कृतयोः सुहृद्द्विषत्सूपयानं सूपपादम् ॥१७॥

अहरहः कर्त्तव्यान्येव। यदपि केचनानाकलितशास्त्रहृदया नैतानि कर्त्तव्यानि किन्तु ज्ञानादिमात्रं पुरष्कृत्यैतानि त्यजन्ति ते प्रकृतविषयेमुग्धा एवेति ध्येयम्—"विद्योत्पत्त्यर्थमहरहरप्यग्निहोत्रादिकर्मानुष्ठेयमन्यथावर्णाश्रमधर्मविलोपे कल्मषमानसस्य विद्योत्पत्तिरेव नस्यादतो विद्यार्थत्वेन तदनुष्ठानमावश्यकम्" इत्याचार्योक्तेः ॥१६॥

विवरणम्—ननु नित्यनैमित्तिकाग्निहोत्रादिकं यदि विद्योन्नतौ सहायकं तदा "तस्य पुत्रा दायमुपयान्ति" इत्यादिवचनानां कुत्रावसर इत्याशङ्कायां सूत्रोपन्यासायोपक्रमते "अग्निहोत्रादेः सुकृतस्य" इत्यादि। यदि नित्याग्निहोत्रादेः कर्मणोर्विद्याया उन्नत्यै अनुष्ठानमानैमित्तिकैरेव कुर्वाणो दुरितक्षयम्। ज्ञानं च विमलीकुर्वन्नभ्यासेन तुयाचयेदिति अन्यथा प्रात्यहिक क्रियमाणदुरितादिकर्म से प्रतिबन्ध होने से कदाचित् विद्या का विनाश हो जायगा अथवा ह्रास तो होगा ही। इसलिए वर्णाश्रम विहित नित्यनैमित्तिक अग्नि होत्रादिक कर्म तो अवश्यानुष्ठेय हैं विद्वानों से भी ॥१६॥

सारबोधिनी—यदि अग्नि होत्रादिक जो सुकृत कर्म है उनको विद्योन्नति में प्रयोजन मानते हैं तब उस ब्रह्मवेत्ता का पुत्र उसके धनादिक को लेता है मित्र वर्ग सत्कर्म को लेते हैं और दुस्कर्म को शत्रु वर्ग ले लेते हैं।" इत्यादि

यदेव विद्ययेति हि ।४।१।१८।

"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" [छा० १।१।१०।] इति ह्युद्गीथविद्यायाः प्रबलकर्मान्तराप्रतिबद्धफलत्वमुक्तम् ।।१८।।

इति श्रीरघुवरीयवृत्तावग्निहोत्राद्यधिकरणम् ।।१०।।

वश्यकं तदा "तत्र पुत्रादायम्" इत्यादि वचनानां का गतिरित्यत आह "अत" इत्यादि । अतः अग्निहोत्रादि साधुकृत्यायाः अपेक्षया तदन्यापि साधुकृत्याविदुषामस्त्येव अग्निहोत्रादिकर्मणां तदन्योपलक्षकत्वात् । यस्या अन्यायाः साधुकृत्यायाविनियोजकं वचनम् "साधुकृत्येत्यादिकमन्येषांशाखिनामिति । विद्यापूर्वकालिकयोरुभयोरपि सुकृत दुष्कृतयोः सुहृदादौ गमनं भवतीति न पूर्वापरयोः कश्चिद्विरोधः ।।१७।।

विवरणम्—ननु यत् किमपिकर्मतत्सर्वमपि प्रतिबन्धकाभावे सत्येव फलं जनयति नतु प्रतिबन्धकसद्भावे । यथा प्रतिबन्धकसत्वे वह्निर्नदाहात्मककार्यमुत्पादयति यदातु प्रतिबन्धकचन्द्रकान्तमणेरभावो भवति अथवा प्रतिबन्धकसद्भावेऽपि समुत्तेजकसूर्यकान्तमणिमन्त्रादीनां सम्बन्धो भवति तथा कार्यं दाहात्मकं जनयति तथैव प्रकृते उद्गीथादिकं कर्म तदैवफलं जनयति यदा कश्चित्प्रतिबन्धकोन भवेत् अथवा

वचन का समर्थन किस तरह से होगा ? इस शङ्का के समाधान में कहते है कि अग्नि होत्रादि रूप जो साधु कृत्य है उनके अतिरिक्त भी साधुकृत्य ब्रह्मवेत्ता में हैं । जिनका विनियोजक वचन "तस्य पुत्रादायम्" इत्यादि एक शाखाध्यायी का है । बलवान् कर्म से अवरुद्धफलक विद्योत्पत्ति से पूर्वकालिक सुकृत दुष्कृत का गमन मित्र शत्रु में होता है ।।१७।।

सारबोधनी—"जो कर्म विद्या श्रद्धा और उपनिषद सहकार से किया जाता है वह कर्म वीर्यवत्तर होता है । स्वाभाविक जो कार्य जनक सामर्थ्य है उससे अत्यधिक कार्य कारित्व हो जाता है । जैसे पारदमिश्रित काष्ठौषधि

इतरक्षपणाधिकरणम् ॥११॥

भोगेनत्वितरे क्षपयित्वाथ सम्पद्यते ।४।१।१९।

अनारब्धकार्ययोः पुण्यापुण्ययोर्गतिरुक्ता । ताभ्यामितरे प्रारब्धकार्ये पुण्यापुण्ये किं विद्यानिदानदेहान्ते अथवा वर्तमानदेहान्ते देहान्तरान्ते

कस्यचित्सहकारकस्य सद्भावो भवेत । "यदेव विद्यया करोति" इत्यादि श्रुतिरुद्गीथकर्मणि प्रतिबन्धकसद्भावेऽपि प्रतिबन्धकं बलहीनं कुर्वन्ती समुत्तेजयति फलदानायोद्गीथकर्मादिकम् । अतः कर्मप्रकरणेऽपि विद्याया उपयोगं दर्शयितुमुपक्रमते "यदेवविद्ययेत्यादि" यद्यत् कर्म करोति तत्तत्कर्म यद्विद्यया विद्या सहकारेण श्रद्धादिसहकारेण वा संपादितं भवति तदा तदेवाल्पफलकमपि बहुफलकं भवतीत्यर्थः । इत्यादिना उद्गीथप्रकरणे कथितविद्यायाः प्रबलकर्मान्तरेण प्रतिबद्धफलकत्वमुक्तं भवति । अयमाशयः कर्म तु स्वकार्यसर्वमपि करोति परन्तु यदि केनचित् कारणेन कर्मप्रतिबद्धं भवति तदातत्कर्मस्वफलेन जनयति तत्र प्रतिबन्धकाभावं संपादयति विद्या अथवा कर्मसमुत्तेजिका भवति विद्या सूर्यकान्तमणिर्यथा चन्द्रकान्तमणिसद्भावेपिदाहाय वह्निं समुत्तेजयति । तथैव प्रकृते विद्यायाः प्रबलकर्मान्तरप्रतिबद्धकर्मणः सहायकत्वं भवति अथवा प्रतिबन्धकापनयने हेतुर्भवतीति ॥१८॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ श्रीरघुवरीयवृत्तिविवरणे अग्निहोत्राधिकरणम् ॥१०॥

में होता है" । इस छान्दोग्य श्रुति में उद्गीथ विद्या को प्रबल कर्मान्तर से अतिप्रतिबद्धफलकत्व कहा गया है । अर्थात् विद्या कर्म में जो प्रतिबन्धक कर्मान्तर है उसका निरास करती है अथवा प्रकृत कर्म को सहकार करके उत्तेजिका होती है । जैसे सूर्यकान्त मणि दाहक कार्य में होता है ॥१८॥

सारबोधिनी—अनारब्ध कार्यक जो संचित क्रियमाण शुभाशुभ कर्म है उनका ब्रह्मविद्या से अश्लेष विनाश हो जाता है ऐसा पूर्वरस में प्रतिपादन

चेत्यनियम इति संशयः । "तस्य तावदेवचिरम्" इत्यभिधानाद्वर्तमान-देहान्ते एवेति नियम इति पूर्वः पक्षः । सिद्धान्तस्तु—इतरे—प्रारब्धकार्ये पुण्यापुण्ये उभे भोगेन क्षपयित्वाऽनन्तरमेव ब्रह्मसम्पद्यते । फलाय परिणते ते वर्तमानैकदेहभोग्ये स्यातां तदा तदन्ते ब्रह्मसम्पत्तिरनेकदेहभोग्ये चेदनेकदेहान्ते ब्रह्मसम्पत्तिरित्यनियमः । प्रारब्धफले पुण्यापुण्ये

विवरणम्—अनारब्धफलकयोः सञ्चितक्रियमाणयोः शुभाशुभकर्मणोरश्लेषविनाशौ इति चिन्तितम् । अतः परमारब्धकार्ययोः शुभाशुभकर्मणोर्गतिचिन्तनोपक्रमते "अनारब्धकार्ययोरित्यादि" अनारब्धकार्ययोः अनुत्पादितशरीरफलकयोः सञ्चितक्रियमाणशुभाशुभकर्मणोब्रह्मविद्ययाऽश्लेषविनाशौ भवत इति पूर्वप्रकरणे तद्गतिं कथयित्वा ताभ्यां कर्मभ्यामितरे प्रारब्धशरीरकार्ये शुभाशुभकर्मणी विद्यमानशरीरेजायेते, अथवा वर्तमानदेहस्यावसाने शरीरान्तरेवा जायेते इत्यनियमे इत्येवमेव संशयः ।

तत्र "तस्यतावदेवचिरंयावन्नविमोक्ष्ये" एवं क्रमेण कथनात् वर्तमान शरीरस्यावसाने एव भवतीत्येव नियम इति पूर्वपक्षाशयः । एतादृश पूर्व पक्षनिरासायाह, "भोगेनत्वितरे" इत्यादि सूत्रम् । इतरे अनारब्धकार्य क्रिया गया है । इसके बाद पूर्वोक्त कर्म से भिन्न जो आरब्ध कार्यक पुण्यापुण्य का फलोदय विद्या का निदान जो देह उसके अन्त में होता हैं अथवा वर्तमान देहान्त में या देहान्तर में होता है एतादृश अनियम है, ऐसा संशय होता है । "उसके लिए उपासक का तब तक ही विलंब होता है जब तक प्रारब्धकर्म का भोग से नाश नहीं होता है उसके बाद ब्रह्म संपन्न हो जाता है" इस प्रकार से श्रुति में कहा गया । अतः वर्तमान देह के अवसान में मोक्ष होता है यही नियम है ऐसा पूर्वपक्ष वादी कहते हैं । इसके उत्तर में सिद्धान्त वादी कहते है कि "भोगेन" इत्यादि सूत्रम् संचित क्रियमाण कर्म से भिन्न जो प्रारब्ध कार्यक शुभा-शुभ कर्म उसका भोग से विनाश करके उसके बाद

भोगेनैव क्षयं नेये इत्येव नियमः। "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" [छा० ६।१४।२।] इति श्रुयेः ॥१९॥

इति श्रीमद्भगवद्रामानन्दाचार्यान्वयप्रतिष्ठित श्रीमदनुभवानन्दाचार्य स्वामी द्वारकेण ब्रह्मवित्स्वामि श्रीरघुवराचार्येण विरचितायां श्रीरघुवरीय वृत्तौ चतुर्थाध्यायस्य प्रथमः पादः ॥

ककर्मापेक्षयातिरिक्ते प्रारब्धकार्यकपुण्यापुण्यात्मकशुभाशुभकर्मणी ते उभेऽपि भोगेन क्षपयित्वा तदनन्तरं ब्रह्मसंपद्यते मुक्तो भवतीत्यर्थः। फलदानाय प्रवर्तमानयोस्तयोः पुण्यापुण्ययोर्यदि वर्तमानशरीरावच्छेदेनैव भोगः स्यात्तदा तादृशशरीरस्यैवावसाने मोक्षो भवति। अथ यद्यनेक शरीरेणोपभोगयोग्येतादृशकर्मणो तदाऽनेकशरीरान्तरे एव मोक्ष इत्येतस्मिन् न नियमः। प्रारब्धफलकयोः शुभाशुभकर्मणो भोगेनैवक्षयो जायते इत्येव नियमः "तस्यतावदेवचिरमिति" श्रुतेः। विशेषस्तुमोक्ष प्रस्तावे द्रष्टव्यः ॥१९॥

इतीतरक्षपणाधिकरणम् ॥११॥

इत्यानन्दभाष्कार जगद्गुरु श्रीरामानन्दाचार्यपीठाचार्य जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य योगीन्द्र कृतौ श्रीरघुवरीयवृत्ति विवरणेचतुर्थाध्यायस्य प्रथमः पादः।

तुरन्त ब्रह्म संपत्ति अर्थात् मोक्ष प्राप्त हो जाता है। क्योंकि प्रारब्ध कर्म जो कि फल के लिए परिणत है वह यदि वर्तमान शरीर से ही उपभोग योग्य हो तब तो उस शरीर के अन्त में ब्रह्म संपत्ति होती है। अथ यदि वह कर्म अनेक देह से भोग करने के योग्य हो तब तो अनेक देह के अवसान में ही मोक्ष होता है। इस प्रकार से अनियम ही है ऐसा जानना चाहिए। पर प्रारब्धफलक पुण्यापुण्य के उपभोग से ही क्षय होता है यही नियम है। क्योंकि "तस्यतादेव चिरम्" ऐसा श्रुति कहती है ॥१९॥

इति स्वामीरामेश्वरानन्दाचार्यकृत सारबोधिनी टीका के चतुर्थाध्याय में प्रथमपाद

श्रीसीतारामार्पणमस्तु

॥ अथ चतुर्थाध्यायस्य द्वितीयः पादः ॥

वागधिकरणम् ॥१॥

वाङ्मनसि दर्शनाच्छब्दाच्च ।४।२।१।

ब्रह्मविदः समुत्क्रान्तिरिदानीमुच्यते । "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्" [छा०६।८।६] श्रुतिरियं वाग्वृत्तेर्मनसि सम्पत्तिमभिधत्तेऽथवा वागिन्द्रि-

---

विवरणम्-इदमीयप्रथमपादे ब्रह्मज्ञानेनानारब्धकार्याणां कर्मणां क्षयो भवति आरब्धकार्याणां कर्मणाञ्चभोगेन विनाशं कृत्वा चरमशरीर मपहायोपासको मोक्षमधिगच्छतीति प्रतिपादितम् । तत्र मोक्षं कथं भवतीत्यपेक्षायां देवयानेन पथागत्वामुक्तो भवतीति कथयितुं प्रथमत उत्क्रान्ति प्रकारदर्शनायोपक्रमते "ब्रह्मविदः समुत्क्रान्तिः" इत्यादि । कर्मक्षपणानन्तरं ब्रह्मविदोऽस्माच्छरीरात्समुत्क्रान्तिर्भवति उत्क्रान्तिं कृत्वा-गत्वाच साकेतं मुक्तपदभाग् भवतीति । तत्र तादृशोत्क्रान्तेः क्रमः प्रदर्शितश्रुतौतदर्शयति "अस्य सोम्य पुरुषस्य" इत्यादि । हे सोम्य प्रियदर्शन ! प्रयतो म्रियमाणस्य पुरुषस्य मरन्मुखस्यजीवस्येत्यर्थः । वागि-

सारबोधिनी—चतुर्थ अध्याय के प्रथम पाद में ब्रह्म विद्या तथा भोग में संचित क्रियमाण तथा प्रारब्ध कर्म का विनाश करके देहपात के बाद ब्रह्मज्ञानी मोक्ष प्राप्त करता है ऐसा कहा गया है । उसमें मोक्ष किस प्रकार से होता है इस जिज्ञासा के उत्तर में कहेंगे कि देवयान मार्ग से परम पद को प्राप्त करके मुक्त होते हैं इस बात को कहने के लिए द्वितीयपाद के आदि में उत्क्रमण प्रकार के बतलाने के लिए उपक्रम करते हैं "ब्रह्मविदः सत्मुक्रान्तिरित्यादि" जो ब्रह्म ज्ञानी हैं उनका इस शरीरसे उत्क्रमण किस तरह होता है ! इस बात को अब बतलाते हैं "अस्यसोम्य" इत्यादि । हे सोम्य ! मरने के समय में पुरुष का वागिन्द्रिय मन में संपद्यमान होता है । अर्थात् वागिन्द्रिय का प्रलय [विलक्षण संयोग] मन में होता है । मन का प्रलय प्राण में होता है । और

यस्येति संशयः। वाचोऽनुपादाने मनसि वाग्वृत्तिरेव सम्पद्यत इति पूर्वः पक्षः। सिद्धान्तस्तु वागिन्द्रियमेव मनसि सम्पद्यते। उपरतायामपि वाचि मनोव्यापारस्य दर्शनात्। "वाङ्मनसि सम्पद्यते" इति साक्षाच्छब्दाच्च। अत्र वाचोमनः सम्पत्तिर्विलक्षणसंयोग एवेतिज्ञेयम् ॥१॥

न्द्रियं मनसि सम्पन्नं भवति मनश्चप्राणे सम्पन्नं भवति प्राणश्च पर देवतायां संपन्नो भवति" इत्येव छान्दोग्यश्रुतौ श्रूयते। तत्र वाग्वृत्तेर्मनसि लयः संपत्तिर्भवति अथवा वागिन्द्रियस्यैव मनसिसंपत्तिरिति संशयः तत्रोपादानकारणे एव कार्यस्यलयो भवति नत्वनुपादानेकस्यापिलयः। न भवति मनो वागिन्द्रियस्योपादानं तस्मान्न मनसि वाचोलयः किन्तु वाक्पदमत्रलक्षणयावाग्वृत्तेरुपलक्षकमितिवाग्वृत्तेरेवमनसि गमनमिति पूर्वपक्षाशयः।

सिद्धान्तस्तु "वाङ्मनसीत्यादि" नवाग्वृत्तेर्मनसि लयः किन्तु वागिन्द्रियस्यैव मनसि संपत्तिर्भवति। कुतः! दर्शनात् शब्दाच्च वागेवमनसिसंयुज्यतिष्ठतीति दर्शनात् स्वापादिकाले उपरतेपि वागिन्द्रिये मनसः प्रवृत्तिर्दृश्यते तत्राह शब्दादिति। "वाङ्मनसि संपद्यते" इति-

प्राण का प्रलय पर देवता में होता है। यह श्रुति वाणी की वृत्ति का मन में प्रलय कहती है अथवा वागिन्द्रिय का मन में प्रलय होता है ऐसा संशय होता है, "उपादान कारण में कार्य का लय होता है" ऐसा नियम है तो वागिन्द्रिय का उपादान तो मन नहीं है तब मन में वागिन्द्रिय का प्रलय नहीं होता है किन्तु वागिन्द्रिय की जो वृत्ति है उसका ही मन में प्रलय होता है ऐसा पूर्वपक्ष का अभिप्राय हैं इसमें सिद्धान्ती कहते हैं कि वागिन्द्रिय का ही मन में प्रलय होता हैं। क्योंकि वाणी के उपरत होने पर भी मन का व्यापार देखने में आता है। और वाणी की संपत्ति मनमें होती हैं ऐसा साक्षात् शब्द कहता है। वागिन्द्रिय का उपादान कारण तो मन नहीं है तब वागिन्द्रिय का प्रलय मन में नहीं होगा। इस शङ्का का निराकरण करने के लिए कहते है "अत्र

अत एव सर्वाण्यनु ।४।२।२।

यतो मनसि वाचो विलक्षणसंयोगो नतु लयः । अत एव मनसोऽनुपादानत्वेऽपि वाचमनु सर्वाणीन्द्रियाणि सम्पद्यते । तथा च श्रुतिः "इन्द्रियैर्मनसि सम्पद्यमानैरिति" ॥२॥

इति श्रीरघुवरीयवृत्तौ वागधिकरणम् ॥१॥

श्रुतौ वागिन्द्रियस्यैव संपत्तिरभिधीयते नतु वृत्तिमात्रस्य लयः स्वरूपेण वागिन्द्रियस्य सद्भावे प्रमाणाभावान्नवृत्तिमात्रलय इति । यद्यपि उपादानकारणे एवकार्यस्य लय इति नियमः तथापि अत्र संपत्तिशब्दस्य लय इत्यर्थो न किन्तु विलक्षणसंयोगात्मक एव लयः तथा चैतादृशलयस्याकारणेपि संभवान्नकोपिदोषपदमादधाति । तस्माद्वागिन्द्रियस्य स्वरूपत एव मनसि विलयो जायते समुत्क्रमणसमये नतुवाग् वृत्तिमात्रस्येति संक्षेपः ॥१॥

विवरणम्—यतोवागिन्द्रियस्य न प्रलयोऽपितु विलक्षणसंयोग एव भवति अतएव वागिन्द्रियप्रलयानन्तरं सर्वेषां तदतिरिक्तानामपीन्द्रियाणां मनसि प्रलयप्रतिपादनं श्रुतिसमर्थितं सङ्गच्छते । अन्यथा श्रुति प्रतिपादितं तदसङ्गतं स्यादित्याशयेन सूत्रव्याख्यातुमुपक्रमते "यतोमवाचो मनः संपत्तिरित्यादि" यहाँ वागिन्द्रिय का मन में संपत्ति होती हैं इसका अर्थ यह हैं कि मन के साथ वागिन्द्रिय का विलक्षण संयोग होता है । एतादृश विलक्षण संयोग स्वरूप प्रलय उपादानेतर पदार्थ के साथ होने में कोई आपत्ति नहीं हैं । इसलिए लक्षण वृत्ति से वागिन्द्रिय वृत्ति परकत्व मानने में गौरव होता है अतः वागवृत्ति का मन में प्रलय होता हैं यह पक्ष ठीक नहींहैं किन्तु विलक्षण संयोग लक्षण प्रलय मन में वागिन्द्रिय का होता है यही पक्ष उचित है ॥१॥

सारबोधिनी—वागिन्द्रिय का अनुपादान रूपमन में विलक्षण संयोग होता है ऐसा मान लिया गया अतएव वागिन्द्रिय के संयोगानन्तर तदतिरिक्त सब

मनोऽधिकरणम् ॥२॥

तन्मनः प्राण उत्तरात् ।४।२।३।

सर्वेन्द्रियसंयुक्तस्य मनसः प्राणे लयः संयोगो वेति संशयः । तत्रा- "न्नमयं हि सोम्यमनः" [छा०] इत्यन्नकार्यत्वान्मनसोऽन्नस्यच 'ताः अन्नमसृजन्त" इत्यप्कार्यत्वात् "आपो मयः प्राणः" इति प्राणस्याप्य-

---

नसित्राचः" इत्यादि । मनसि वागिन्द्रियस्यविलक्षणसंयोग एव लयस्ता- दृशसंयोगार्थक एव संपत्तिशब्दः अतएव वागिन्द्रियानन्तरं सर्वेन्द्रि- याणां तत्र मनसि विलक्षणसंयोगलक्षणप्रलयकथनं श्रुतिसमर्थितं सङ्गतं भवतीति ॥२॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ श्रीरघुवरीयवृत्ति विवरणे वागधिकारणम् ॥१॥

विवरणम्–सर्वेषामिन्द्रियाणां संपत्त्याधारभूतस्य मनसः प्राणे लयः संयोगमात्रंवेति संशयः । तत्र मनसः पृथिवीकार्यत्वात्पृथिव्याश्चजलज- न्यत्वात् प्राणस्यापिजलात्मकत्वेन जलपरिणामेप्राणेमनसोलय एव न संयोग इति पूर्वपक्षः। सिद्धान्तस्तु अत्रापि संयोग एव नतुलयोमनसोऽह ङ्कारजन्यत्वेन जलादिजन्यत्वाभावात् कारणे एव कार्यस्य लय इतिनिय- मात्तत्र लक्षणायां गौरवाच्चेत्यादिकं दर्शयितुमुपक्रमते "सर्वेन्द्रियसंयुक्त स्य" इत्यादि । सर्वैरेव वागादीन्द्रियैः सह विलक्षणसंयोगशालिनोमनसः इन्द्रियों का संयोग लक्षण प्रलय जो श्रुति में कहा गया है वह भी संगत होता है । यदि प्रलयशब्द का यथा श्रुत प्रलय रूप ही अर्थमानें तव तो प्रलय नहीं होने से तद्बोधक श्रुति व्याहतार्थक हो जाती । अतः विलक्षण संयोग मन प्रभृति में होता है ऐसा मानना ही ठीक है । किन्तु वागूवृत्ति का प्रलय कथन उचित नहीं ॥२॥

सारबोधनी—सर्व वागादिक इन्द्रिय से संयुक्त जो मन है उनका प्राण में लय होता है अथवा संयोगमात्र होता है ऐसा संशय होता हैं । इसमें पूर्व पक्षवादी कहते है कि "अन्नमयं हि सोम्य मनः" इत्यादि श्रुति से अन्न कार्यत्व

स्वश्रवणात्प्राणप्रकृतिकाप्सुपरम्परया मनोलय इति पूर्वः पक्षः। सिद्धान्तस्तु—मनसः प्राणे विलक्षणसंयोगमात्रं न लयः। यतस्तस्याहंकारिकत्वात्। अबाप्यायितप्राणस्य भौतिकत्वान्न तत्रलयः सम्भवति। स्वकारण एव लय इति सिद्धान्तात् ॥३॥

इति रघुवरीयवृत्तौ मनोधिकरणम् ॥२॥

"मनः प्राणे" इत्युत्तरवाक्येनप्राणेऽलयः संयोगोवेति संशयः। तत्र "अन्नमयंमोऽम्यमनः" इत्यादिना मनसोऽन्नविकारत्वादन्नस्य च जलप्रकृतिकत्वेन प्राणस्यापितत्प्रकृतिकत्वेन परपरया स्वकारणे प्राणे मनसोलय एव न तु संयोग इति पूर्वपक्षाशयः। तमिमं पक्षं निराकर्तुं सूत्रंव्याख्यातुं चोपक्रमते सिद्धान्ती तन्मनः प्राण उत्तरादितिसूत्रम्। तस्य मनसः प्राणे संयोगमात्रं भवति नतु लयः कुतः? कारणे एव कार्यस्य लयदर्शनात्. न तु मनसः कारणं जलादिकमहङ्कारजन्यत्वात्तस्य। अकारणे लयार्थं लक्षणाश्रयणे गौरवात्। जलादिना प्राणस्याप्यायनमात्रं भवति प्राणस्तु भौतिकोऽतोन तत्र मनसोलय इति ॥३॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणे मनोऽधिकरणम् ॥२॥

मन में अवगत होता है और अन्न जो है उसमें "ताः अन्नमसृजन्त" इत्यादि श्रुति से जल कार्यत्व है। और "आपोमयः प्राण" इस श्रुति से प्राण में जलीयत्व का श्रवण है। अतः प्राण का कारण जल में परंपरया मन का लय होता है किन्तु संयोग मात्र नहीं इसमें सिद्धान्ती कहते है इस मनका प्राणमें संयोग मात्र होता है लय नहीं क्योंकि मन जो है वह अहंकार प्रकृतिक है। और जलाप्यायित प्राणतो भौतिक है तो भौतिक प्राणमें अभौतिक मनका लय नहीं हो सकता है। कार्यमात्र स्वकीयोपादान कारणमेंही लीयमान होता है अकारण में उनका लय नहीं होता है। किन्तु यथा कथंचित् संयोगमात्र होता है। और पूर्वपक्षी के कथनानुसार मन में लक्षणा का आश्रयणा करने से गौरव भी

अध्यक्षाधिकरणम् ॥३॥

सोऽध्यक्षे तदुपगमादिभ्यः ।४।२।४।

"प्राणस्तेजसि" इत्युत्तरवाक्ये स प्राणस्तेजसि सम्पद्यतेऽथवा जीव इति संशयः । "प्राणस्तेजसीति व्यवदेशात्तेजस्येवेति पूर्वः पक्षः। सिद्धान्तस्तु–सः सर्वेन्द्रियमनोविशिष्टः प्राणोऽध्यक्षेऽखिलकरणाध्यक्षे जीवे सम्पद्यते ।"एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायान्ति"

विवरणम्–"प्राणस्तेजसि तेजः परस्यामिति" श्रुतेः समस्तेन्द्रिय विशिष्टस्य प्राणस्य तेजसि सम्पत्तिर्भवति, अथवा तादृशस्यप्राणस्य करणकलेवराध्यक्षे संपत्तिर्भवतीति संशयः । तत्र "प्राणस्तेज सीति" साक्षात् श्रवणात् तेजस्येव प्राणस्य संपत्तिरिति पूर्वपक्षाशयः। तमियं पूर्वपक्षं निरसितुं सूत्रव्याख्यानाय चोपक्रमते "प्राणस्तेजसी-त्युत्तरवाक्ये" इत्यादि । योयं वागादीन्द्रियसंयुक्तप्राणः स किं तेजसि संपन्नोभवत्यथवा करणकलेवराध्यक्षे जीवात्मनि संपद्यते इति संशयः। तत्र "प्राणस्तेजसीति श्रुत्या प्रतिपादनात्तेजस्येव प्राणस्य लय इति । होता है। इसलिए सर्वेन्द्रिय संयुक्त मन का प्राण में संयोग मात्र होता है लय नहीं । लय मानने में अनेक दोष होते हैं ॥३॥

सारबोधिनी–वागादि इन्द्रिय संयुक्त जो प्राण है वह संपन्न होता है अग्रिम तत्व में मिलता है इत्यादि वाक्य से जाना जाता है । अब यहाँ संशय होता है कि वह प्राण तेज में सम्पन्न हो जाता है अथवा शरीरेन्द्रियादिक का अध्यक्ष जो जीव है उसमें सम्पन्न होता है । इसमें पूर्वपक्षवादी कहते हैं कि "प्राणस्तेजसि" ऐसा श्रुति वाक्य होने से प्राण का तेज में ही प्रलय होता है नतु शरीराध्यक्ष जीव में। एतादृश शङ्का का समाधान में कहते हैं कि "सोध्यक्षे" इत्यादि सूत्रम् । सर्व इन्द्रिय तथा मन से संयुक्त जो प्राण है वह अध्यक्ष में अर्थात् समस्त इन्द्रियादिकरण का अध्यक्ष स्वामी जीव में संपद्यमान होता है । अर्थात् जीव में प्राण का लय होता है किन्तु तेज में नहीं । तेज में

[बृ०४।३।३८।] "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" [बृ०४।४।२।] "कस्मिन् वा प्रतिष्ठास्यामि" [प्र०६।३।] इत्यादिश्रुतिभिः प्राणस्य जीव एवोपगमोत्क्रान्तिप्रतिष्ठादीनामभिधानात्। "मनःप्राणे" इतिश्रौत वाक्यानन्तरं "प्राणस्तेजसीति" वाक्यस्य सङ्गतिस्त्वनेकप्रमाणानुरोधात् प्राणः स्वाध्यक्षे जीवे संयुज्य तेजसि संयुज्यत इत्येवं क्रमेण बोध्या ॥४॥

श्रीरघुवरीयवृत्तावध्यक्षाधिकरणम् ॥३॥

तमियं पूर्वपक्षं निरसितुमाह सोध्यक्षे इत्यादि सः सर्ववागादीन्द्रियमनोभ्यां विशिष्टः प्राणः अध्यक्षे सकलकरणकलेवरस्वामिनि संपन्नोभवति कुतः ? तदुपगमादिभ्यः। अर्थात् "एवमेवमात्मानमन्तकाले" इत्यादि श्रुतिः प्राणस्य जीवे एव संपत्तिर्दर्शयति। न च यदि प्राणस्य जीवेलय स्तदाः प्राणस्तेजसीति वचनस्य का गतिरिति वाच्यम् परंपरयापितत्समन्वयसंभवात्। यथा गङ्गया संयुज्य यमुनाया गङ्गाद्वारेण सागरगमनेऽपि यमुनया सागरं गम्यते इति तथैव प्रकृते जीवद्वारेणपरे संपद्यमानः प्राणस्तेजसीति वाक्यस्य समन्वयसंभवात्। तस्मादिन्द्रियादिसंयुतस्य

लय क्यों नहीं होता है ? क्यों जीव में ही लय होता है। इस जिज्ञासा के उत्तर में कहतेहैं "एवमेव" इत्यादि "इस प्रकार इस जीवात्मा में अन्त काल में सब प्राण संपन्न हो जाते हैं"। उस जीव के इस शरीर से निकलते प्राण भी शरीर से निकल जाता है।" "किसके इस शरोर में प्रतिष्ठित रहने से मैं प्रतिष्ठित हूँगा" इत्यादि श्रुतियों से जीव में ही प्राण का गमन उत्क्रमण प्रतिष्ठादिक का कथन किया गया है। इससे सिद्ध होता है कि प्राण का लय जीव में होता है किन्तु तेज में नहीं॥ "मनः प्राणे" "मन प्राण में अभि संपन्न होता है"इस प्रकार का जो श्रुति वाक्य है तादृश वाक्य के अनन्तर में "प्राणस्तेजसि"इस वाक्य की संगति अनेक प्रमाण के अनुरोध से प्राण स्वकीय अध्यक्ष जीवात्मामें संयुक्त होकरके तेज में संयुक्त होता है इस क्रम से उसका

भूताधिकरणम् ॥४॥

भूतेषु तच्छ्रुते ।४।२।५।

"प्राणस्तेजसि" इति जीवसंयुक्तस्य प्राणस्य तेजोमात्रे संयोगोऽभिधीयते उत समस्तेषु भूतेष्विति संशये—तेजसीति विशेषाभिधानात्तेजोमात्र इति पूर्वः पक्षः। सिद्धान्तस्तु "पृथिवीमयः" [बृ०४।४।५।] इत्यादिश्रुते र्जीवस्य भूतमयत्वव्यपदेशात् तासां त्रिवृतमित्यादिश्रुतेश्च तेजः प्रभृतिभूतानां त्रिवृत्कृतत्वेन केवलस्य तेजसोऽनवस्थानात्समस्तेष्वेव भूतेषु संयोगः ॥५॥

प्राणस्यजीवे करणकलेवराध्यक्षे एव संपत्तिर्भवति न तु साक्षात्तेजसीति बोध्यम् ॥४॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्यं कृतौ
श्री रघुवरीयवृत्तिविवरणेऽध्यक्षाधिकरणम् ॥३॥

विवरणम्—जीवसंपरिष्वक्तप्राणस्य तेजसि संपत्तिर्भवतीति पूर्व सूत्रे प्रतिपादितम् सेयं संपत्ति स्तेजसि केवले भवति अथवा तेजोपलक्षितसर्व भूतेषु भवतीति संशयः। तत्र तेजसीति श्रुतत्वात्केवले तेजसीति पूर्व पक्षः। श्रुतिषुश्रुतत्वात् सर्वभूतेष्वेवेति सिद्धान्तं दर्शयितुमुपक्रमते "प्राणस्तेजसि" इति जीवसंयुक्तस्येत्यादि । प्राणस्तेजसीति व्वाक्यात् जीव सहकृतस्य प्राणस्य तेजसि संपत्तिर्भवतीति श्रूयते । तत्र संशयो जायते तादृशप्राणस्य तेजोमात्रे संपत्तिर्भवति. अथवा तेजः प्रभृतिकसर्वभूतेषु समन्वय होता है ऐसा समझना चाहिए। इससे यह सिद्धहोता है कि साक्षात् योग तो प्राण का जीव में होता है अन्य द्वारा तेज में संयोग होता है। अतः श्रुति में कोई भी विरोध नहीं होता है ॥४॥

सारबोधिनी—"प्राणस्तेजसि" इस वाक्य में कहा गया कि जीव संयुक्त प्राण का तेजमें लय होता है अथवा भूत समूह में प्राण का लय होता है। इसमें पूर्वपक्षवादी कहते हैं कि "प्राणस्तेजसि" यहाँ विशेष रूपसे तेज का प्रति-

नैकस्मिन् दर्शयतो हि ।४।२।६।

एकस्मिन्नपि सम्पत्तौ "पृथिवीमयः" इत्यादिश्रुतेरुपपत्तिस्तु न सम्भवति । एकस्य भूतस्य कार्याक्षमत्वात् "पञ्चो कृतैश्च भूतैश्च रामश्चाण्डं ससर्जहि" इत्याद्याचार्योक्तेः त्रिवृत्कृतस्यैव कार्योपयोगित्वात् ।

संपत्तिर्जायत इति संशयः । तत्र तेजसीति विशेषरूपेण तेजसः कथना तेजोमात्रे एव संपत्तिरिति पूर्वपक्षाशयः । "पृथिवीमय आपोमयः" इत्यादिश्रुतौ जीवस्य सर्वभूयत्वस्य सर्वभूतमयत्वप्रतिपादनात् त्रिवृत्करणश्रुतेश्च एकैकमात्रस्य कार्यकारणासामर्थ्यस्य "प्रत्येकस्य च भूतस्य रामेणार्धद्वयं कृतम् । एकैकार्धचतुर्थांशाः स्वेतरार्धेषुयोजिताः । पञ्चीकृतेषु भूतेषु यदर्धं तस्य नामतत् । पञ्चीकृतैश्च भूतैश्च रामश्चाण्ड ससर्ज हि ॥" (श्रौतप्रमेयचन्द्रिकायाः प्रकृतिपरिच्छेदे १५६–१५७) इत्याद्याचार्यदिव्यप्रबन्धेपुराणादौ च प्रतिपादनात्सर्वभूतेष्वेव संयोगो जायते इति सिद्धान्तः । वृत्तेरक्षरार्थस्त्वतिरोहित एवेति नप्रपञ्च्यते ॥५॥

विवरणम्–ननु क्रमशः सत्संपत्ति संभवेऽपि, "पृथिवीमय" इत्यादि श्रुतेरुपपत्तिसंभवे कथं तत्परित्याग इत्याशङ्कामपनेतुमुपक्रमते "एक

पादक शब्द है अन्य भूतोंका उपस्थापक तो कोई है नहीं इसलिए तेजोमात्र में प्राण का प्रलय होता है । किंतु सर्व भूतोंमें प्राणका लय नहीं ऐसा पूर्वपक्षका आशय है । इस पूर्वपक्ष के निराकरण में कहते है "भूतेषुतच्छ्रुतेः" '-सर्वभूतों में प्राण का लय होता है । क्योंकि श्रुति में ऐसा ही प्रतिपादन किया गया है । तथाहि "यह आत्मा पृथिवीमय, जलमय, तेजोमय है" और "तासांत्रिवृतं त्रिवृतंकरवाणि" इत्यादि श्रुति से तेज प्रभृतिक भूतों का त्रिवृत्करण होने से और केवल तेज का अनवस्थान होने से सर्वभूतो में ही जीव संयुक्त प्राण का विलक्षण संयोग रूपलय होता है ॥५॥

सारबोधनी–क्रमिक–एक–एक भूत में संपत्ति [लय] मानने पर भी तो "पृथिवीमयः आपोमयः" इत्यादि श्रुति का समन्वय होने की संभावना जब हो

तृवृत्करणञ्च पञ्चीकरणस्याप्युपलक्षणमिति तत्वम् श्रुतिस्मृतीममर्थं दर्शयत "तासां त्रिवृतं त्रिवृतमेकैकस्य करवाणि" [छा० ६।३।३।] समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः" [वि. पु. १।२।६२।] अतो भूतविशिष्टस्यैव तेजसोऽत्रग्रहणम् ॥६॥

इति श्रीरघुरीयवृत्तौभूताधिकरणम् ॥४॥

स्मिन्नपीत्यादि" एकैकभूते संपत्तेः स्वीकारे पृथिवीमय इत्यादि श्रुतेरुपपत्तिर्न समर्थिता स्यात्. यतः त्रिवृत्करणरहितस्यभूतस्यातिसूक्ष्मत्वेन-विशिष्यकार्योत्पादनसामर्थ्यस्यासंभवात् यथाखलुभूतंत्रिवृतंकृतंभवति तदैव तस्य कार्योत्पादकत्वं भवति नान्यथा। इममेवार्थं विशिष्यश्रुति स्मृतीसमर्थयतः "तासांत्रिवृतमित्यादि" समेत्यान्योन्यसंयोगंपरस्परेत्यादि. नाभावीया अपिते भूतनिकराः पृथक् भूता एकैकशः संहतिं विना-कार्योत्पादनेऽसमर्थाः परस्परसंयोगमादायैव सृष्टिलक्षणं कार्यं कुर्वन्ति।

सकती है तब समस्त भूत में संपत्ति मानने की क्या आवश्यकता है। इस शङ्का का निराकरण करने के लिए उपक्रम करते हैं "एकस्मिन्नपि संपत्तौ" इत्यादि वृत्तिः। सूत्रमुदाहरति "नैकस्मिन्निति" एक एकभूत में संपत्ती नही हो सकती है इस बात को श्रुतिस्मृति प्रतिपादन करती है। प्रत्येक भूतों में संपत्तिलय मनाने पर "पृथिवो मय आपोमयः" इत्यादि श्रुति की उपपत्ति नही हो सकती है क्योंयि अत्रिवृतकृत प्रत्येक भूत में कार्य की क्षमता नहीं है। अत्रिवृत प्रत्येक भूत अतिसूक्ष्म है अतः त्रिवृत्कृत पञ्चीकृत भूत में ही कार्यजनकत्व हैं। "तासांत्रिवृतमिति"। "इन पृथिवी जलतेज में से एक एक को त्रिवृत त्रिवृत करता हूँ" अनेक प्रकारक वीर्य संयुक्त भी पृथक् पृथक् रूप से व्यवस्थित होने से संहति परस्पर सहकार के विना प्रजा की सृष्टि में समर्थ नहीं हो सके तब "पञ्ची कृतैश्च भूतैश्च रामश्चाण्डं ससर्ज हि" इत्यादि रूपसे जगद्गुरु श्री श्रियानन्दाचार्योक्त प्रकार से भगवान श्रीरामचन्द्र जी ने पञ्चीकृत भूतों के परस्पर संयोग से ब्रह्माण्ड की सर्जना की। इसलिए भूतान्तर विशिष्ट

आसृत्युपक्रमाधिकरणम् ।।५।।

समाना चासृत्युपक्रमादमृतत्वञ्चानुपोष्य ।४।२।७।

किमियमुत्क्रान्तिरविदुष एवाहोस्विद्विद्वदविदुषोरुभयोः समानेति संशयः। तत्र "अत्र ब्रह्म समश्नुते" [का० २।६।१४] इति ब्रह्मविदोऽत्रैव ब्रह्मप्राप्तिश्रवणादविदुष एवेयमुत्क्रान्तिरिति पूर्वः पक्षः। सिद्धान्तस्तु–गत्युपक्रमात्प्राक्–नाडीप्रवेशात्प्राक्विद्वदविदुषोः समानेयमुत्-

---

तस्मादत्रसर्वभूतविशिष्टतेज एव प्रकृते ग्रहणं नतु विशिष्यैकस्य इति ।।६।।

इति जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणे भूताधिकरणम् ।।४।।

विवरणम्–ननु यदिदमुत्क्रमणं तत् अविदुषामेव भवति अथवा विदुषामुभयोः साम्यमिति संशयः। तत्र "अत्र ब्रह्म समश्नुते" इत्यादि वचनात् विदुषस्तत्प्रतिषेधेनाविदुष एवोत्क्रमणं भवति नतु विदुष इति पूर्वपक्षः। सिद्धान्तस्तु "शतंचैकेत्यादि" वचनात् विदुषामपि नाडीप्रवेशश्रवणेन विदुषोऽपिनाडीद्वारा समुत्क्रमणं भवत्येवेति दर्शयितुमुपक्रमते "किमियमुत्क्रान्ति रित्यादि" यदिदमुत्क्रमणं शरीराद्भवतीति श्रुतं तद विदुष एव अथवोभयो रपि समानेति संशयः।

तेज का ही यहाँ ग्रहण होता है। अर्थात् भूतान्तर विशिष्ट तेज में ही प्राण का परंपरया विलक्षण संयोग रूपलय होता है ।।६।।

सरबोधिनी—शरीर प्रापण समय में करणग्राम जो उत्क्रमण का प्रतिपादन किया गया है वह केवल अज्ञानी का होता है। अथवा ब्रह्मज्ञानी तथा अज्ञानी दोनों का समान रूप से होता है एतादृश संशय होता है। उसमें पूर्वपक्षवादी कहते हैं कि "अत्रब्रह्म समश्नुते" [ब्रह्मज्ञानीय हीं ब्रह्म को प्राप्त कर जाता है।] इत्यादि श्रुति से ब्रह्मज्ञानी को यहां ब्रह्मप्राप्ति का श्रवण होने से यह उत्क्रमण केवल अविद्वान् का ही होता है किन्तु ब्रह्मज्ञानी का नहीं। इस

क्रान्तिः विदुषोऽपि मूर्धन्यनाडीप्रवेशस्य श्रुतत्वात् "शतं चैका" [का०-२।६।१६।] "अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते" (का. २।६।१४) इतिश्रुतिस्तु ब्रह्मविदोऽत्रैवामृतप्राप्तिं नाभिधत्ते। किन्तूपासनसमये शरीरेन्द्रियसम्बन्धसत्व एव। विद्यासामर्थ्यादुत्तरपूर्वाघविनाशे दुःखाननुभवादमृतत्वसाम्यम् । अयमर्थो "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिताः" [का० २।६।१४।] इति प्रकृतश्रुतेः पूर्वार्धपर्यालोचनया निश्चीयते ॥७॥

पूर्वपक्षाशयस्तु "अत्र ब्रह्म समश्नुतेः" इत्यादिना ब्रह्मज्ञानिनामत्रैवामृतत्वप्राप्तिश्रवणेनेयमुत्क्रान्तिर्ब्रह्मज्ञानिभिन्नानामेवनतुब्रह्मज्ञानिनामिति। तत्र सिद्धान्तयति समाना चेयमिति सूत्रम्। ब्रह्मज्ञानिनामपि आसृत्युपक्रमात्समानैवोत्क्रान्तिर्नत्वविदुष एव। शतं चेकेत्यादि वचनेन मूर्धन्यनाडीप्रवेशस्य विदुषामपि श्रवणात् । उत्क्रान्तेरभावेनाड़ीप्रवेशस्यनैरर्थक्यप्रसंगात्। देहवतोऽमृतत्वश्रवणं तु दुःखहेतुभूतकर्मणोविनाशेनामृतत्वप्रतिपादनेनौपचारिकमेव। एतदेवाक्षेपसमाधानाभ्यां वृत्तिकारः स्पष्टयति "अथमर्त्योऽमृतोभवतीत्यादिना" "अत्र ब्रह्म समश्नुते" इत्यादिश्रुतिरत्रैवविदुषोब्रह्मप्राप्तिं न प्रतिपादयति. किन्तु समुपासन समये करणकलेवरसम्बन्धसमये दुःखकारणपापनिवृत्या दुःखस्यान-

पूर्वपक्ष के उत्तर में लिखते हैं कि "समानावेत्यादि" विद्वान तथा अविद्वान् को समान ही उत्क्रान्ति होती है। इसीका स्पष्टीकरण करते हैं। सिद्धान्तस्तु—इस प्रकरण से-नाड़ी प्रवेश से पूर्व में विद्वान् तथा अविद्वान् को समान ही उत्क्रमण होता है। क्योंकि मूर्धन्य नाड़ी में प्रवेश विद्वान् का भी 'शतञ्चैका' इत्यादि स्थल में प्रतिपादान किया गया है। अतः विद्वान् अविद्वान् दोनों का समान ही उत्क्रमण होता है ऐसा निश्चित होता है "अथमर्त्योऽमृतोभवत्यत्रब्रह्म समश्नुते" इत्याति श्रुति ब्रह्मज्ञानी को यहीं अमृत प्राप्ति का प्रतिपादन नहीं करती है। किन्तु उपासना काल में शरीरेन्द्रिय के सम्बन्ध सद्भाव में ही

तदापीतेः संसारव्यपदेशात् ।४।२।८।

अर्चिरादिगत्या ब्रह्मलोकप्राप्तिरपीतिस्तावत्पर्यन्तं संसारस्याभिधानात् "तस्य तावदेव" "धूत्वाशरीरमकृतं कृतात्मा" [छा०८।१६।१] इति । अतस्तदमृतत्वं शरीरसम्बन्धसत्व एव ॥८॥

नुभवादमृतत्वसमतामेव दर्शयति. दुःखाभावस्यामृतत्वे उपचारादभावस्याधिकरणात्मकत्वात् । नायमर्थकपोलकल्पितः किन्तु "यदा सर्वे प्रमुच्यन्त" इत्यादिश्रुत्यर्थपर्यालोचनया प्राप्तोभवति । तस्मात् प्रकृतमिदमुत्क्रमणं ब्रह्मज्ञानिनां तद्भिन्नानां च समानमेव भवति, उपपत्तेः श्रुतेः "नाड्या मूर्धन्यया चाथोत्क्रामति हृदयात्किल । शरीरान्निर्गतो भक्त ऊर्ध्वं याति च रश्मिभिः" इत्यादिरूपेण जगद्गुरु श्रीरामेश्वरानन्दाचार्योक्तप्रकारेण स्मृतश्च तत्र तत्र प्रदर्शितत्वादिति संक्षेपो विस्तरोऽन्यत्रानुसंधातव्यः ॥७॥

विवरणम्– "अत्र ब्रह्मसमश्नुते" इत्यत्र. त्रल् प्रत्ययान्त इदं पद समानाभिहारात्. यदमृतत्वं न तत्साकेतप्राप्तिलक्षणं किन्तु उपासनाधिकरणशरीरसम्बन्धकालिकं दुःखाभावात्मकमौपचारिकमेव एतादृशममृतत्वं

विद्या के बल से उत्तर पूर्वपाप का विनाश हो जाने से दुःख का अनुभव नहीं होते से अमृतत्व के समता का प्रतिपादन करती है । अभाव अधिकरण स्वरूप होता है ऐसा नियम होने से दुःखाभाव सुख में उपचरित है । यह अर्थ "यदा सर्वे प्रमुच्यन्ते" इस श्रुत्यर्थ का विचार करने से निश्चित होता है । अतः विद्वान् तथा ब्रह्मज्ञानी भिन्न सभी व्यक्ति का शरीर से उत्क्रमण समान रूप से ही होता है । इस विषय पर तात्विक विचार सारस्वत सार्वभौम जगद्गुरु श्रीरामेश्वरानन्दाचार्य प्रणीत श्रीरामप्राप्तिपद्धति तथा उसके विवरण में देखें ॥७॥

सारबोधिनी—वास्तविक अमृतत्व की प्राप्ति परित्यक्त देह संबन्ध व्यक्ति को ही होती है । ब्रह्मलोक पर्यन्त में जो अमृतत्व है वह तो आपेक्षिक औप–

देह संबन्धमेव सूचयतीति दर्शयितुमुपक्रमते "अर्चिरादिगत्येत्यादि" अर्चिरादिगत्या देवयानमार्गेण यावत्पर्यन्तं ब्रह्मप्राप्तिरूपा अपीतिस्तावत्कालपर्यन्तं शरीरसंबन्धलक्षणसंसारस्याभिधानात् संसारसंबन्धस्य वर्तमानत्वमेव । यतः "तस्य तावदेवचिरंयावन्न विमोक्ष्येऽथ संपत्स्यते" तथा "धूत्वाशरीरमकृतं कृतात्मा" इत्यादि श्रुतेः । तस्मादेतादृशं यद मृतत्वं न तत् वास्तविकममृतत्वं किन्तु शरीरसम्बन्धकालिकमेव । परममृतलाभस्य संसारगतेः उत्तरकाले एव श्रुतिस्मृतियुक्त्यादिभिर्विनिश्चितत्वादितिदिक् ॥८॥

चारिक अमृतत्व है । क्योंकि ब्रह्मलोक पर्यन्त संसारावस्था ही है । इस बात को बतलाने के लिए उपक्रम करते हैं "अर्चिरादि गत्येत्यादि" अर्चिरादि गति अर्थात् देवयान मार्ग से ब्रह्मलोक प्राप्ति लक्षण अपीति यावत्कालपर्यं होती है तावत्काल पर्यन्त संसार का ही कथन किया गया है । अर्थात् ब्रह्मलोक पर्यन्त संसार है । एतावत्काल पर्यन्त जो अमृतत्व का श्रवण है वह आपेक्षिक औपचारिक है । वास्तविक अमृतत्व तो देहपातकालिक है । क्योकि "उसको तावत् काल पर्यन्त ही विलंब है । यावत् काल पर्यन्त शरीरपात नहीं होता है । और शरीरपात के अनन्तर वास्तविक शान्ति को प्राप्त करता है । "प्राकृत शरीर का विनाश करके कृतात्मा पुरुष अकृत अनौपचारिक वास्तविक अमृतत्व मोक्ष को प्राप्त करता है । इत्यादि क्रम से श्रुति कहती है । श्रीराम प्राप्ति पद्धति आदि स्मृतिभी विरजास्नानान्त दिव्य देह प्राप्ति अनन्तर अमृतत्वरूप मोक्ष का निरूपण करती हैं तथैव अन्य आचार्यो की अनेक युक्तियां भी प्रकृत मत पोषक हैं अतस्तादृश ब्रह्मलोक पर्यन्त का जो अमृतत्व हैं शरीर सम्बन्ध कालिक ही हैं नतु परममोक्ष लक्षण अमृतत्व स्वरूप यह सिद्ध होता हैं प्रकृत विषय में जगद्गुरु श्री हनुमदाचार्य प्रसादित परमगति मीमांसा अनुसन्धेय है ॥८॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ।४।२।९।

ब्रह्मविदोऽप्यर्चिरादिमार्गेण गमनरूपात्प्रमाणतः "तम्प्रति ब्रूयात् [कौ०] इति चन्द्रमसा संवादेन करणकलेवरवत्त्वस्योपलब्धेश्च सूक्ष्मशरीरसम्बन्धो विद्यत एव ।।९।।

नोपमर्देनातः ।४।२।१०।

अतो "यदा सर्वे प्रमुच्यन्ते" इति काठक वचः शरीरसम्बन्धस्य विनाशे नामृतत्वं नाभिधत्ते ।।१०।।

विवरणम्– ननु ब्रह्मलोकगतानां शरीरेन्द्रियादि संबन्धसत्वेनास्ति किमपि प्रमाणम्, ततश्च प्रमाणाभावान्नास्ति तेषां शरीरसंबन्ध इत्याशङ्कामपाकर्तुमुपक्रमते "ब्रह्मविदोऽप्यर्चिरादिमार्गे". इत्यादि ब्रह्मविदामपि क्रमिकमुक्तौ. सूक्ष्मशरीरस्य संबन्धो भवत्येव. यतः प्रमाणेन तथोपलभ्यमानत्वात् । देवयानपथागमनकाले चन्द्रलोकगतानां ब्रह्मविदां चन्द्रेण सह संवादः श्रूयते "तं प्रति ब्रूयादिति" प्रकरणेन प्रमाणजातं भवति ब्रह्मविदां सूक्ष्मशरीरसद्भावे । ततश्च तेषां सूक्ष्मशरीरसंबन्धे प्रमाणाभावोनेतिदिक् ।।९।।

सारबोधिनी–ब्रह्मलोक प्राप्त ज्ञानियों का शरी सम्बन्ध होने में कोई प्रमाण नहीं होने से सूक्ष्मादि शरीर की स्थिति किस तरह से माने इस शङ्का का समाधान करने के लिए उपक्रम करते हैं "ब्रह्मविदोपीत्यादि" ब्रह्मज्ञानी का अर्चिरादि–उत्तर मार्ग से गमन होता है यह गमन रूप प्रमाण से कर्थात् उस ब्रह्मज्ञानी का चन्द्रलोक में चन्द्रमा के साथ परस्पर वार्तालाप-संवाद श्रुति श्रुत है उससे यह सिद्ध होता है कि ब्रह्मज्ञानी का सुक्ष्म शरीर संबन्ध अवश्य है अतः शरीर संबन्ध में प्रमाणाभाव का कथन स्वरूपासिद्ध है । किन्तु प्रमाणतः सूक्ष्म शरीर का सम्बन्द व्यवस्थित होता है ।।९।।

सारबोधिनी="जब हृदय में रहने वाली कामनायें निवृत्ति हो जाती है तब वह मर्त्य अमृत हो जाता है । और यहीं ब्रह्म को प्राप्त कर जाता

अस्यैव चोपपत्तेरूष्मा ।४।२।११।

अस्य सूक्ष्मदेहस्यैवोष्णरूपो धर्मो न स्थूलदेहस्य सचायं कदाचिन्मुमुर्षोर्विदुषशरीर उपलभ्यते । अष्मादुष्मणोऽवगम्यते यत्सूक्ष्मशरीरविशिष्ट एव विद्वानुत्क्रामति ॥११॥

विवरणम्—ननु "यदा सर्वे प्रमुच्यन्ते कामायस्य हृदिश्रिताः । अथमर्त्योऽमृतोभवति. अत्र ब्रह्मसमश्नुते" इत्यादिवचनं ब्रह्मविदां शरीर संबन्धमयोह्यब्रह्मविदोऽमृतत्वप्राप्तिं प्रतिपादयति तत्कथमुच्यते यत्. ब्रह्मविदोऽपि शरीरसम्बन्धोस्तीति शङ्कांनिराशायोपक्रमते "अतो यदा इत्यादि । अर्चिरादि मार्गेण प्रस्थितब्रह्मविदांमध्ये चन्द्रलोके चन्द्रमसा संवादः दर्शनरूपप्रमाणेन यदा शरीरसम्बन्धो ज्ञायते तदा तादृशप्रमाणादेव. काठकश्रुतिः शरीरसम्बन्धं विनाश्यामृतत्वं न प्रतिपादयति किन्तु ब्रह्मलोकप्राप्तानां दुःखाभावेनामृतत्वसादृश्यमात्रमेव प्रतिपादयति । अतो न कोपि दोषः । सूत्रार्थस्तु. अतोगमनरूपप्रमाणात् काठकं वचः शरीरविनाशपूर्वकममृतत्वं नाभिदधाति किन्तु तत्सादृश्यमात्रं गमयतीति ॥१०॥

है" यह जो वचन है वह ब्रह्म शरीर सम्बन्ध का अभाव प्रतिपादन करता है तब शरीर सम्बन्ध है ऐसा आप किस तरह कहते हैं । इस शङ्का का निराकरण करने के लिए कहते हैं "चन्द्रलोक में चन्द्रमा के साथ ज्ञानि का संवाद होता है तादृश प्रमाण से सिद्ध होता है कि ब्रह्मज्ञानी का सूक्ष्म शरीर सम्बन्ध है । तब यह जो काठक वचन "अथमर्त्योऽमृतोभवति" शरीर विनाश पूर्वक अमृतत्व का प्रतिपादन नहीं करता है । किन्तु सूक्ष्मादि शरीर सम्बन्ध काल में पापकर्म के अभाव होने से दुःखाभावानुभवरूप अमृतत्व की समानता मात्र का प्रतिपादन करता है ॥१०॥

सारबोधिनी— उत्क्रमण के समय में विद्वान् का सूक्ष्म शरीर के साथ संबन्ध रहता है इस बात को बतलाने के लिए कहते है "अस्यैवच" इत्यादि

प्रतिषेधादिति चेन्न शारीरात्स्पष्टोह्येकेषाम् ।४।२।१२।

ननु ब्रह्मविदउत्क्रान्तिर्न सम्भवति "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामोन तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" [बृ०४।४।६।] इत्यादिभिः प्रतिषेधादिति चेन्न, शारीरात्प्राणोत्क्रान्तेरयं प्रतिषेधो न तु शरीरात् । यतश्चायमर्थ एकेषां माध्यन्दिनानामाम्नाये स्पष्ट एवाभिधीयते "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति" [बृ०४।४।६।] अत्र तच्छब्देन शरीरमभिधाय तस्मात्प्राणोत्क्रान्तेः प्रतिषेधः स्पष्ट एव ॥१२॥

विवरणम्—ननु उत्क्रमणसमये विदुषां सूक्ष्मशरीरसम्बन्धो विद्यते तत्र किं प्रमाणमिति शङ्कानिराशायाह "अस्यैवचेत्यादि" अस्य सूक्ष्मदेहस्यैव. उष्मारूपोधर्म उपलभ्यते, स्थूलदेहस्य नायं धर्मः सूक्ष्मदेहाभावे स्थूलदेहे उष्मणोऽनुपलब्धेः । इत्यन्वय व्यतिरेकाभ्यां न स्थूलस्य धर्मः किन्तु सूक्ष्मस्यैव । इत्थं भूत उष्मा कदाचिन्मरणसमयेमुमुर्षोः ब्रह्मविदः शरीरे समुपलभ्यते तस्मात्सूक्ष्मशरीरविशिष्ट एव विद्वानुत्क्रामतीति समानमेवोत्क्रमणं विदुषामविदुषां चेति सिद्धम् ॥११॥

इस सूक्ष्म शरीर का ही उष्मा रूप धर्म है किन्तु वह स्थूल देह का धर्म नहीं ऐसा अन्वय व्यतिरेक से सिद्ध होता है । क्योंकि सूक्ष्म देह की सत्ता में उष्मा की उपलब्धि नहीं होती है । एतादश सूक्ष्म शरीर का धर्म रूप जो उष्मा है वह कदाचित् मरणोन्मुख विद्वान् के शरीर में उपलब्ध होता है । तो इस उष्मा की उपलब्धि से सिद्ध होता है कि सूक्ष्म शरीर से विशिष्ट ही विद्वान् का उत्क्रमण होता है । इससे यह भी सिद्ध होता है विद्वान् तथा अविद्वान् का उत्क्रमण समान रूप से ही होता है इसमें भेद नहीं ॥११॥

सारबोधिनी—जो ब्रह्मज्ञानी है उसका उत्क्रमण नहीं हो सकता है क्यों कि "जो कामनावान् नहीं है निष्काम आप्तकाम है उसका उत्क्रमण नही होता है किन्तु ब्रह्मसदृश होकर के ब्रह्म में लीयमान हो जाता है" इत्यादि शास्त्र

स्मर्यते च ।४।२।१३।

ब्रह्म विदो मूर्धन्यया नाड्यागमनं "ऊर्ध्वमेकस्थितस्तेषां यो भित्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परांगतिम्" [याज्ञ०१६७]

नाड्या मूर्धन्यया चाथोत्क्रामति हृदयात्किल ।
शरीरान्निर्गतो भक्त ऊर्ध्वं यात्यर्करश्मिभिः ॥
निदाघे चोष्मतासत्वान्निशायाश्चापि रश्मयः ।
अर्चयन्त्यर्चिरादिस्थं पुमांसमातिवाहिकाः ॥

विवरणम्–ब्रह्मविदामिदमुत्क्रमणं न संभवतीत्याशङ्क्य तन्निराकरणायोपक्रमते "ननु ब्रह्मविदउत्क्रान्तिरित्यादि" पूर्वशरीराज्जीवस्योत्क्रान्तिर्भवतीत्यभिधाय. ब्रह्मज्ञानिनस्तादृशमुत्क्रमणं न भवति "नतस्य प्रणा उत्क्रामन्ति" इत्यादिना समुत्क्रमणाभावस्य प्रतिपादनादितिचेन्न. योयमुत्क्रमणप्रतिषेधः स शारीरात् नतु शरीरात् शरीरादुत्क्रमणं जीवस्य भवति. यदि ब्रह्मविदोमरणसमये शरीरादुत्क्रमणं तदा मरणसंभवेन ब्रह्मलोकपर्यन्तगमनं मोक्षोवा न संभवेदतः शरीरादुक्रमणं न संभवति अयमर्थ "योऽकामो निष्काम" इत्यादौ स्पष्ट रूपेण प्रतिपादितः । तस्माद् शरीरेन्द्रियाध्यक्षाज्जीवादेवोत्क्रमण प्रतिषेधो न तु शरीरादिति विदुषामविदुषां समानमेवोत्क्रमणं न तत्राल्पीयानप्युभयोर्भेदः ॥१२॥

से ब्रह्मज्ञानी के उत्क्रमण का प्रतिषेध किया गया है । इस शंका के समाधानमें कहते है " शारीरादित्यादि " "नतस्य प्राणा उत्क्रामन्ति" यह जो निषेध करता है वह शारीर शरीरेन्द्रियाध्यक्ष जीव से उत्क्रमण का निषेध है । किन्तु शरीर से उत्क्रमण का प्रतिषेध नहीं किया गया है । यह अर्थ माध्यदिन शाखा में स्पष्ट रूप से कहा है । " जो अकाम निष्काम आप्तकाम आत्मकामनावान् है उसके प्राण का उत्क्रमण नहीं होता है । इसश्रुति में 'तत्' शब्द से शरीर का कथन करके उस शारीर से प्राणोत्क्रमण का प्रतिषेध स्पष्ट रूप से किया गया है ॥१२॥

दिनं तत्रार्चिषोऽहश्च शुक्लं पक्षं च गच्छति ।
समेति शुक्लपक्षात्स उत्तरायणमेव हि ॥
तस्मात् संवत्सरं तस्माद् वायुं वायोश्च भास्करम् ।
सूर्याद्विधु विधोश्चाथ विद्युतं वरुणं ततः ॥
ततश्चेन्द्रं ततो धातृलोकं गच्छत्युपासकः ।
अतिक्रामति पश्चाद् भूम्याद्यावरणसप्तकम् ॥

विवरणम्—यो हि ब्रह्मज्ञानी तस्यापि मूर्धन्यनाडी द्वारागमनं भवति इति स्मृतिषु बहुलतुपलभ्यत एव तथाहि "ऊर्ध्वमेकः स्थित" इत्यादि तेषामुत्क्रमणकर्तृणां मध्ये एको महाप्रभावशाली समुपासक ऊर्ध्वं सर्वत उपरिस्थितो यो हि सूर्यस्य मण्डलं भित्वा सूर्यमण्डलस्य भेदनं कृत्वा तत ऊर्ध्वं गतः सन् ब्रह्मलोकमतिक्रम्य हिरण्यगर्भलोकं संमतिक्रम्य पराङ्गतिं साकेतनिवासलक्षणां गतिं मोक्षरूपां याति प्राप्नोतीत्यर्थः ।

सम्प्राप्नोती ततश्चायं प्राकृतेतरगोपुरम् ।
वैकुण्ठनगरस्याप्तिर्भवत्यस्य ततः परम् ॥
भवत्ययं च तत्र श्रीनारायणाभिनन्दितः ।
गोलोकस्याथ सम्प्राप्तिर्भवत्यस्य महात्मनः ॥
भवत्यसौ हि तत्राथ श्रीकृष्णेनानुमोदितः ।
ततः साकेतलोकस्य प्राप्नोत्ययञ्च गोपुरम् ॥

सारबोधिनी—जो ब्रह्मज्ञानी है उनका भी गमन मूर्धन्यनाड़ी द्वारा होता है जैसे अविद्वान् व्यक्तियों का उत्क्रमण होता है उसी तरह यह विषय विष्णुपुराण श्रीरामप्राप्तिपद्धति आदि पूर्वाचार्य प्रबन्धों में प्रसिद्ध है । "ऊर्ध्वमेक स्थितम्" इत्यादि "तेषाम्" उत्क्रमण करनेवालों के मध्य में एक का उपासक सूर्यमण्डल का भेदन करके ब्रह्मलोक को प्राप्त कर पुनः ब्रह्मलोक का भी

उल्लङ्घ्य प्रकृतिं सोऽथ विरजामवगाहते ।
ततः सूक्ष्माच्छरीराद्धि विश्लिष्टश्च भवत्यसौ ॥
प्रादुर्भवत्यथो चास्यानघत्वादिगुणाष्टकम् ।
अमानवकरस्पर्शो भवत्यस्य ततः परम् ॥
श्रीमद्रामस्य सङ्कल्पाद् दिव्यदेहो भवत्यसौ ।
कालकाल्येतरे दिव्ये देशे प्राप्तो भवत्यथ ॥

(श्रीबोधायनमतादर्शः ९२८-९३५) इत्यादिरूपेण स्मर्यते एव ॥१३॥

इति श्रीरघुवरीयवृत्तावासृत्युपक्रमाधिकरणम् ॥५॥

ब्रह्मविष्णुमहेशाद्यैर्देवैः स्तुत च वन्दितम् ।
वेदैर्निवेदितं चाथ श्रीरामेणाभिनन्दितम् ॥
समृद्धं परमं दीप्तं सर्वथा चाथ सर्वदा ।
परात्परमयोध्यं च सुषमासागरं शुभम् ॥
अयोध्यानगरं चासौ सम्प्राप्नोति ततः परम् ।
(श्रीरामप्राप्तिपद्धतिः)

इत्यादि स्मृत्या ज्ञायते यत् ब्रह्मविदां गमनं भवत्येवेति । अविद्वानिवविदुषोऽपि नाडीद्वारागमनदर्शनेनोभयोरपि समानमेवोत्क्रमणमिति भावः ॥१३॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ श्रीरघुवरीयवृत्तिविवरणे आसृत्युपक्रमाधिकरणम् ॥५॥

अतिक्रमण करके साकेत प्राप्ति लक्षण परमगति को प्राप्त करता है । इस प्रकार से स्मृतियों में श्रवण होता हैं इसलिए अविद्वान् की तरह विद्वान् ब्रह्मज्ञानी का उत्क्रमण होता हैं । इससे सिद्ध हुआ कि उत्क्रमण विद्वान् अविद्वान् दोनों का होता हैं ॥१३॥

इत्यासृत्युपक्रमाधिकरणम् ॥

परसम्पत्त्यधिकरणम् ॥८॥

तानि परे तथाह्याह ।४।२।१४।

तानि प्राणेन्द्रियजीवसहितानि भूतसूक्ष्माणि किं स्वफलभोगाय यथास्थानं यथाकर्मोपयान्ति आहोस्वित्परे ब्रह्मणि सम्पद्यन्त इति संशये कर्मफलभोगाय तदनुगुणस्थानं लोकान्तरं गच्छन्तीति पूर्वपक्षः। सिद्धान्तस्तु–उत्क्रममाणस्य विदुषस्तानि परे ब्रह्मणि सम्पद्यन्ते तथा श्रुतिरप्याह "तेजः परस्यां देवतायाम्" [छा० ६।८।६। इति]॥६॥

इति रघुवरीयवृत्तो परसम्पत्त्यधिकरणम् ॥६॥

विवरणम्–यानीमानि प्राणेन्द्रियजीवसहितानि सूक्ष्मभूतानि विदुष उत्क्रममाणानि भवन्ति तान्युत्क्रम्य पुनः कर्मफलोपभोगाय लोकान्तरं गच्छन्ति अथवा परे ब्रह्मणि संपद्यमानानि भवन्तीति संशयः। कर्मबलात्तानि तथा विधानि सूक्ष्मभूतानि कर्मफलभोगाय लोकान्तरमेव गच्छन्ति नतु परे ब्रह्मणि संपद्यमानानि भवन्तीति पूर्वपक्षः। सिद्धान्तस्तु "तेजः परस्यां देवताया" मित्यादि श्रुतौ श्रुतानि भूतानि विदुषो ब्रह्मण्येव संपद्यमानानि भवन्तीति दर्शयितुमाह "तानिप्राणेन्द्रियजीवसहितानी त्यादि" पूर्वप्रकरणे इन्द्रियप्राणसहितजीवस्योत्क्रमण समये सूक्ष्म भूतेषु संपत्तिः कथिता तानि तथा विधानि कर्मफलोपभोगाय लोकान्तरं गच्छन्ति अथवा परब्रह्मणि समनुगतानि भवन्तीति संशये। तत्र पूर्वोपार्जित कर्मबलात्तानि तथा विधानि सूक्ष्मभूतानि कर्मफलभोग करणाय लोकान्तरमेव गच्छन्ति, अन्यथा फलभोगासंभवेनाकृतभोगस्य

सारबोधिनी–करण प्राण सहित जीव का उत्क्रमण समय से तेजः प्रभृतिक सूक्ष्मभूतों में संपत्ति होती है ऐसा पूर्वमें कहा गया है। वे जीव सहित सूक्ष्म भूत क्या फल भोग करने के लिए लोकान्तर में कर्म केवल से जाते हैं अथवा परम ब्रह्म परमात्मा में संपन्न हो जाते हैं ऐसा संशय होता है। इसमें पूर्वपक्षवादी कहते हैं कि वे सब सूक्ष्मभूत कर्मफल का भोग करने

अविभागधिकरणम् ॥७॥

अविभागो वचनात् ।४।२।१५।

साचेयं परदेवता सम्पत्तिः स्वकारणे लय उताविभाग रुपैवेति संशये ॥ परमात्मनः परमकारणतया तत्रोक्ता सम्पत्तिस्तस्मिल्लय एवस्यादिति

विनाशासंभवादिति पूर्वपक्षाशयः। तमिमं पूर्वपक्षं निराकर्तुं सिद्धान्तं दर्शयितुश्चाह "तानिपरे" इत्यादि उत्क्रमणं कुर्वतो विदुषस्तानि सूक्ष्म भूतानि परे ब्रह्मण्येव सम्पद्यमानानि भवंति नतु कर्मफलोपभोगाय लोकान्तरं गच्छन्ति श्रुत्या तथैव प्रतिपादनात्। तथाहि "लयप्रवाहे सर्वस्यान्ते प्रतिपादितं "तेजः परस्यां देवतायाम्" प्राणेन्द्रियजीव समनुगतानि सूक्ष्मभूतानि परस्यां देवतायां संपद्यमानानि भवन्तीति। अर्थात् यानि पूर्वोक्तनि सूक्ष्मभूतानि तानि सर्वाणि पर ब्रह्मण्ये वलीयमानानि भवन्ति पर ब्रह्मविदःकिश्च तानि कर्मफलभोगाय नालं ब्रह्मविद्यया-भर्जितशक्तिकत्वात् "न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिता क्वथिताधाना प्रायो वीजामनेष्यते" इति भगवदुक्तेः। तस्माच्च तेषां सूक्ष्म भूतानामन्यफलकत्वामिति दिक् ॥१४॥

इति जगद्गुरुश्रीरामनन्दाचार्य रामप्रपन्नाचार्य कृतौ
श्रीरघुवरीयवृत्तिविवरणे परसम्पत्त्यधिकरणम् ॥६॥

के लिए कर्मानुकूल लोकान्तर में जाते है। इस प्रश्न के उत्तर में कहते हैं कि "तानि परे" इत्यादि। वे भूतसूक्ष्म सब परम पुरुष सर्वेश्वर श्रीरामचन्द्र में संपद्यमान हो जाते हैं। क्योंकि "तेजः परस्यां देवतायाम्" इस श्रुति में ऐसा ही कहा है इसी बात को कहते है—"सिद्धान्तः" इत्यादि। उत्क्रमण करनेवाले जो ब्रह्मज्ञानी हैं उनका संबन्धी जो भूत सूक्ष्म है वे पर देवता परम पुरुष में संपद्यमान हो जाते है ऐसा ही श्रुति कहती है। तेज भूत सूक्ष्म पर देवता में संपन्न हो जाते है।" इत्यादि छान्दोग्य में ॥१४॥

इति परसंपत्यधिकरणम् ॥

पूर्वपक्षः। सिद्धान्तस्तु—"तेजः परस्यां देवतायां" इति वाक्येऽपि "सम्पद्यते" इत्यस्यान्वयः। तथा चात्र सम्पत्तिर्विलक्षण संयोग एवेति प्राङ्निर्णीतम्। स एव संयोगविशेषः प्रकृते भवतीति ॥१५॥

इति श्रीरघुवरीयवृत्तावविभागाधिकरणम् ॥७॥

विवरणम्—यं यं परदेवतायां सूक्ष्मभूतानां संपत्तिः साकारेण कार्यस्य लयरूपा अथवा वाङ्मनसीतिवत् विलक्षण संयोगरूपैवेति संशयः। तत्र परमपुरुषस्य सकल कारणत्वात्तत्र भूतानामन्तर्भावः कार्यस्य कारणापत्तिरेव न तु विलक्षण संयोग इति पूर्वपक्षः। तमियं पूर्वपक्षं निरसितुमुपक्रमते "साचे यं परदेवता संपत्तिरित्यादि। याचेयं सूक्ष्मभूतानां परदेवतायां संपत्तिः सा किं कारणे कार्यस्य लयरूपा अथवा वाङ्मनसीतिवद विभागरूपेति संशयः। तत्र परमात्मनः सकलकारणत्वात् कारणे कार्याणां लयरूपैवेति पूर्वपक्षः। सिद्धान्तस्तु" अविभागः इत्यादि। परदेवतायां सूक्ष्मभूतानामविभागो विलक्षण संयोगोवाङ्मन सीतिवत्। कुतः? तेजः परस्योदेवतायामीति वचनात्। अस्मिन् छान्दोग्य वाक्ये संपद्यते इत्यस्यान्वयः करणीयः ततश्च संपत्तिरिति वचनेन विलक्षण संयोग एव प्रतिपादितो भवति नतु लयापत्तिरिति पूर्व

सारबोधिनी—इन्द्रिय प्राण सहित जीव का भूत सूक्ष्म में लय होता है तादृश सूक्ष्मभूतों का परादेवता में संपत्ति होती है ऐसा पूर्वमें कहा गया है। इसमें यह संशय होता है कि इन सूक्ष्मभूतों का जो सत् परादेवता में संपत्ति है वह कारण में कार्य के लय समान लयरूप है अथवा परादेवता में संयोग रूप संपत्ति है। इसमें पूर्वपक्षवादो कहते है कि यह परादेवता परम कारण अर्थात सब पदार्थ का निदान कारण है। इसलिए पृथिव्यादि कार्य का जैसे स्वकारण जलादिक में लय होता है। उसी तरह सूक्ष्म भूतों का परादेवता में लयरूप ही संपति होती है। इसके उत्तर में सिद्धान्तवादी कहते है "अविभाग" इत्यादि सूक्ष्म भूतों का परादेवता में अविभाग विभागा रूप विलक्षण संयोग

तदोकोऽधिकरणम् ॥८॥

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतः शताधिकया ।४।२।१६।

नाडीप्रवेशात्प्राग्विद्वदविदुषोः समानैवेयमुत्क्रान्तिरित्यवधारितम् ।

निर्णीतत्वात् । 'वैलक्षण्यञ्चात्र पृथग्व्यवहारानर्हत्वमेव' इत्याचार्योक्तेर्नामरूप विभागानर्हत्वलक्षणमिति ध्येयम् । तस्मान्न कारणे कार्यस्य लयः संपत्तिरपितु विलक्षण संयोग एव ॥१५॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ
श्रीरघुवरीयवृत्तिविवरणेऽविभागाधिकरणम् ॥७॥

विवरणम्--विदुषोऽविदुश्चनाडी प्रवेशात्पूर्वमुत्क्रान्तिरुभयोः समानैवेति "समानाचेत्यादि" सूत्रे प्रतिपादितमिति तत्रैव किंचिद्विचार्यते । तत्र "शतं चक्रा हृदयस्य" इत्यादि श्रुतिर्विदुषामविदुषां च समानमेवोत्क्रमणं विदधाति अथवा सुषुम्नानाड्याविदुषां तदन्ययाचनाड्याऽविदुषामुत्क्रमणं भवतीति संशयः । तत्र सुषुम्नानाड्या अतिसूक्ष्माया

ही होता है । "तेजः परस्यां देवतायाम्" इस वाक्य में संपद्यते इसका अन्वय किया जाता है तब यह अर्थ होता है कि संपत्ति शब्द का अर्थ विलक्षण संयोग हैं यहां विलक्षण संयोग "पृथग् व्यवहारानर्हत्वरूप ही है" इसका पूर्व में ही निश्चय किया गया है । तादृश विलक्षण संयोग विशेष रूप ही सत्संपत्ति विवक्षित है किन्तु कारण में कार्य काल रूप नहीं ॥१५॥

इत्यविभागधिकरणम् ॥

सारबोधिनी—नाडी प्रवेश से पूर्व में ब्रह्मज्ञानी इन दोनों का समान ही उत्क्रमण होता है ऐसा "समानाचासृत्युपक्रमादित्याधि" सूत्र में निश्चय किया गया है किन्तु इन दोनों को नाडी प्रवेश करने कोई विशेष है उस विशेषता का विचार करते हैं । [एक सौ एक इन हृदय प्रदेश नाडीयां है उनमें से

किन्तु नाडीप्रवेशेऽस्तिकश्चिद्विशेषः स इदानीं विचिन्त्यते । "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" [का० २।६।१६] इतीयं श्रुतिर्विद्वदविदुषोरुत्क्रान्ति यया कयापि नाड्याभिधत्तेऽत विदुषः शताधिकया

असर्वज्ञ दुर्विज्ञेयत्वेन यया कयाचिदेव सर्वेषां गमनमिति पूर्वपक्षः । उपासको हि भगवत्कृपानुगृहीतो ब्रह्मविद्याबलात्सुषुम्नां नाडीं सूक्ष्मा सुविविच्य प्रकाशित द्वारो मूर्धन्यनाडी द्वारेणोत्क्रमणं करोतीति सिद्धान्तं दर्शयितुमुपक्रमते "नाडीप्रवेशादित्यादि" समानैवोत्क्रान्तिर्भवति तत्वज्ञानिनां तद्भिन्नानामपीति समानाचासृत्युप इत्यादि सूत्रेषु विचिन्तितम् । तत्र "शतं चैकमित्यादि" [हृदयमध्ये एकाधिकं नाडीशतं भवति तासां नाडीनामेकाधिक शतानां मध्यादेका सुषुम्ना नाडी मूर्धानं विदार्य्य परिगता तयैकया उर्ध्वगच्छन्नुपासकोऽमृतत्वं श्रीसाकेताख्यं दिव्यधामं प्राएक को छोड़ करके पुनः उन नाडीयों में से प्रत्येक का सौ सौ शाखानाडी है । पुनः शाखा नाड़ियों का प्रतिशाखानाडी अनेक है] उन एक सौ एक नाडियों में से एक सुषुम्नानाडी मस्तक के ऊपर से निकली हुई । उस एक नाडी से ऊपर उत्क्रमण करनेवाला परमेश्वर कृपानुगृहीत उपासक अमृतत्व श्री साकेत प्राप्तिरूप परम पद को प्राप्त करता है । और उस प्रधान से अतिरिक्त जो सौ नाडी हैं उनके द्वारा उत्क्रमण करनेवाला अविद्वान् अनेक प्रकारक संसारगति को प्राप्त करता है"] यह श्रुति ब्रह्मज्ञानी तथा तदन्य इन दोनों के उत्क्रमण का जिस किसी नाडी से होने का प्रतिपादन करती है । अथवा विद्वान् को तो शताधिक मूर्धन्य नाडी से ही उत्क्रमण बतलाती है और अविद्वान् के उत्क्रमण को तदन्य नाडी के द्वारा नियमित बतलाती है ऐसा संशय होता है । इसमें पूर्वपक्षवादी कहते हैं कि अति सूक्ष्म अनेक नाड़ी के समुदाय में से मूर्धन्यातिसूक्ष्म नाडी का विवेक असर्वज्ञदुर्विज्ञेय होने से जिस किसी नाडीयों से उत्क्रमण होता है । अतः कोई नियम नहीं है कि विद्वान् का

मूर्धन्याख्यया नाड्यैवाविदुषस्त्वन्याभिरेवेति नियमेनेति संशयः। अति सूक्ष्मानेकनाडीसमवाये मूर्धन्यनाडी विवेकस्यासम्भवाद्यया कयापि नाड्योत्क्रान्तिरित्यनियम इति पूर्वपक्षः। अत्राभिधीयते- ब्रह्मविदस्तु शताधिकया मूर्धन्ययानाड्यैवोत्क्रान्तिस्ततोऽन्यस्यान्याभिरेवेति निय-

---

म्नोति तदन्ययागच्छन्नविद्वान् उत्क्रमण मात्रमिति] इयंश्रुति येनकेनापि- नाडीद्वारेणोभयोरुत्क्रान्ति प्रतिपादयति अथवा विदुषां मूर्धन्ययासमुत्क्रा- न्तिदर्शयति तद्भिन्नानां तु तदन्यनाड्योत्क्रमणं प्रतिपादयतीति संशयः। पूर्वपक्षस्तु सर्वासामेव सूक्ष्मत्वात् सुषुम्नायास्ततोऽप्यतिसूक्ष्मत्वेना सर्वज्ञ- दुर्विज्ञेयत्वेन यया कया चिदेवनाड्या सर्वेषामुत्क्रमणं भवतीति। तत्र सिद्धान्तमित्थम् ब्रह्मविदां मूर्धन्य नाड्यासमुत्क्रमणं भवति तदन्येषा- मुत्क्रमतां तदन्याभिर्नाडीभिरुत्क्रमणमिति। न चाति सूक्ष्मनाडीषु सूक्ष्मातिसूक्ष्मायाः प्रथमनाड्या स्ततोऽप्यति सूक्ष्मत्वेना सर्वज्ञदुर्विज्ञेयत्वेन

अमुक नाडी से उत्क्रमण होता है और अविद्वान् का अमुक नाडी से ही होता है।

इसमें सिद्धान्तवादी कहते है कि जो ब्रह्मज्ञानी परम पुरुष के उपासक है उनका उत्क्रमण परमात्मा का अनुग्रह सहकृत ब्रह्मविद्या केवल से शताधिक मूर्धन्य नाडी के द्वारा ही होता है। और जो ब्रह्मज्ञानी से भिन्न है उनका उत्क्रमण मूर्धन्य नाडी से भिन्न जो नाडी तादृश नाडियों के द्वारा होता है ऐसा ही नियम है। क्यों कि ब्रह्मविद्या के सामर्थ्य से तथा "मैं परमात्मा का शेष हूँ" इत्याकारक अनुस्मरण से अति प्रसन्न परम पुरुष से अनुगृहीत उपा- सक को हृदय प्रदेश के अग्रिम भाग में एक प्रकार का प्रकाश होता है। तादृश प्रकाश से प्रकाशित द्वार होकर के विद्वान् ब्रह्मज्ञानी पुरुष शताधिक मूर्धन्य नाडी का विवेचन करके उस विवेचित सुषुम्ना द्वारा उत्क्रमण करता है। अवि- द्वान् पुरुष तो परमात्मा का अनुग्रह तथा ब्रह्मविद्या बल के अभाव होने के

म्यते। ब्रह्मविद्यासामर्थ्यात्परमात्मनः शेषत्वानुस्मरणाच्च प्रीतेन हार्देन परमपुरुषेणानुगृहीतस्योपासकस्य हृदयाग्रप्रकाशनं जायते। तथा च तत्प्रकाशितद्वारो विद्वान् शताधिकां मूर्धन्यनाडीं विविच्य तयैवोत्क्रामति ॥१६॥

इति श्रीरघुवरीयवृत्तौ तदोकोऽधिकरणम् ॥८॥

कथं तया गमनमिति वाच्यम् विद्यासामर्थ्यात् भगवत् कृपानुगृहीत उपासको विद्यामाहात्म्येन सूक्ष्मामपि तां ता सुविविच्यावगत्य मूर्धन्यया प्रकाशितद्वारो गच्छतीति। एवं च परमपुरुषस्यानुग्रहेण जीवस्य निवासस्थान हृदयं तदग्रे प्रकाशो जायते तेन प्रकाशितद्वारो जीव उपासको मूर्धन्यामवगत्य तया गमनं करोति। अविद्वांस्तु भगवत्कृपा विरहितोऽप्राप्तविद्यासामर्थ्यश्चमूर्धन्यभिन्ननाडी द्वारा गच्छन् न आप्नोति परंपदमतः संसारभागेव भवतीति ॥१६॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ श्रीरघुवरीयवृत्तिविवरणे तदोकोऽधिकरणम् ॥८॥

कारण सूक्ष्म नाडियों का विवेचन तथा प्रकाश के अभाव होने से यदा कर्म जिस किसी नाडी के द्वारा गमन होता है प्रधान नाडी से गमन नहीं तदन्य नाड़ियों से गमन होने के कारण विभिन्न योनि प्राप्ति लक्षण स्थावरान्त अधोगति ही होती। किन्तु परमपद की प्राप्ति रूप मोक्ष नहीं होता है। सूत्रार्थस्तु ब्रह्मज्ञानी को शताधिक मूर्धन्य नाडी से उत्क्रमण होता है और अविद्वान् को तादतर नाडीं द्वारा उत्क्रमण होता है यद्यपि सूक्ष्म शताधिक नाडी असर्वज्ञदुर्विज्ञेय है। तथापि परमात्मा के उपासनारूप विद्या के सामर्थ्य से तथा परमात्मा के अनुग्रह से जीव का निवासस्थान हृदय के अग्रभाग में एक प्रकार का विलक्षण प्रकाश होता है। उस प्रकाश से प्रकाशित द्वार ब्रह्मज्ञानी सुषुम्ना नाडी को जानकर उसके द्वारा गमन करता है। इसलिए कोई क्षति नहीं होती है ॥१६॥

इति तदोकोऽधिकरणम् ॥८॥

❁ रश्म्यनुसाराधिकरणम ॥९॥ ❁

रश्म्यनुसारी ।४।२।१७।

"अथ यत्रैतस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" [छा० ८।६।५।] इत्यत्रप्रकाशमन्तरेणाप्युत्क्रान्तिरुतरश्म्यनुसारेणैवेति संशयः। प्रकृतश्रुतेः पक्षान्तरे चारितार्थ्येन प्रकाराणान्तरेणाप्युत्क्रान्तिः सम्भवतीति पूर्वपक्षः। अत्राभिधीयते "एतैरैव रश्मिभिः" इत्यवधारणाद्रश्म्यनुसार्येव विद्वानुत्क्रामति ॥१७॥

विवरणम्– शताधिकया नाड्या शरीरान्निर्गतो ब्रह्मज्ञानी ब्रह्मलोकात्मकोर्ध्वस्थानमुपगच्छतीति श्रूयते "अथ यत्रै तस्मात् शरीरात्" इति श्रूतेः। अत्र प्रकारान्तरेणापि गतिर्भवति अथवा रश्म्यनुसारेणैवेति संशयः। तत्र रश्म्यनुसारेणैव भवतीति नियमाभावात्प्रकारान्तरेणापि संभविष्यतीति पूर्वपक्षकर्तुराशयः। सिद्धान्तस्तुरश्म्यनुसारेणैव भवति. एव शब्द सामर्थ्यात् यदि प्रकारान्तरेणापि गमनं भवेत्तदा श्रुतावेव शब्दोपादानं नतरामसङ्गतं भवेदित्याशयेन सूत्रं व्याख्यातुमुपक्रमते "अथ यत्रैतस्मादित्यादि" "अथ यदेत्यादि" [अथ यदा यस्मिन्काले अयं जीवः शरीरादुत्क्रामति शरीरं परित्यजोर्ध्वं गच्छति. तदा एतैरैवरश्मिभिः अर्थात् रश्मिद्वारेणैव तत ऊर्ध्वं गच्छतीत्यर्थः] अत्र प्रकाशं विनापि गमनं भवति. अथवा रश्म्यनुसारेणैवगमनं भवतीति संशयः। तत्र समुदाहृतश्रुतेः पक्षान्तरे चारितार्थ्येनः अर्थात् प्रकाशन्तरेणापि प्रकृतः श्रुतेः समन्वय संभवात्. प्रकाशमन्तरेणापि गमनं संभवतीति पूर्वपक्षाशयः।

सारबोधिनी—जब उपासक इस शरीर से उत्क्रान्त होता है तब इन रश्मियों के द्वारा ही इस शरीर से ऊपर जाता है। यहाँ प्रकाश के अभाव में ही उत्क्रमण करता है अथवा रश्मि के अनुसार से ही ऊर्ध्व गमन करता है ऐसा संशय होता है। इसमें पूर्वपक्षवादी कहते हैं कि "अथ यत्रै तस्मात्" यह जो प्रकृत श्रुति है उसका पक्षान्तर में चरितार्थ होने से प्रकारान्तर से भी

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ।४।२।१८।

ननु नाडीरश्मिसम्बन्धस्याहन्येव सत्वादहनिमृतस्य रश्म्यनुसारित्वं निशि नेति चेन्न नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात् । तथा च दर्शयति श्रुतिः "आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता

सिद्धान्तस्तु रश्म्यनुसारी एव भवतीति । कुतः ? एतैरेवरश्मिभिः" इत्यत्र एव पदोपदानात् रश्म्यनुसारेणैव यदा तदा गमनं भवति न तु प्रकाशमन्तरेण गमनं भवति विदुषः । अर्थात् यदा विद्वानुत्क्रामति तदा प्रकाशसाहाय्यमादायैव गच्छति. न तु प्रकाशमन्तरेण तदीयं गमनं भवति. एतत् श्रुतिस्थैवकारेण विदितं भवतीति सुष्ठूक्तंरश्म्यनुसारीति हृदयम् ॥१७॥

विवरणम्—नतु दिवसे नाड्या सह सम्बन्धो भवति तदा दिने यस्य मरणं तस्यैव नाडीरश्मिसम्बन्धः स्यात् तद्द्वारा चोर्ध्वगमनम्, परन्तु यस्तु रात्रौ मृतः तत्र रश्मीनामभावात्. न स्यान्नाडीरश्मि संबन्धस्तदभावात् कथं रात्रौ मृतस्य तथाविधमुत्क्रमणमित्याशङ्कायां अपनोदनाय सूत्रव्याख्यानमुखेनोपक्रमते "नतु नाडीरश्मि संबन्धस्येत्यादि" ननु उत्क्रमण संभवित है । इसके सिद्धान्त में कहते है "रश्मम्यनुसारीति" प्रकृतश्रुति में " अथैतैरेवरश्मिभिः इस प्रकार अब धारणार्थक एव पद का उपादान होने से विद्वान् रश्म्यनुसारी ही उत्क्रमण कहता है प्रकारान्तर से नहिं । यदि प्रकारान्तर से भी उत्क्रमण अभिमत होता तब तो प्रकृत श्रुति में एव पद का उपादान निरर्थक हो जाता । अतः रश्म्यनुसारी ही विद्वान् का उत्क्रमण होता है ऐसा सिद्ध हुआ । विशेष विवरण अन्यत्र देखें ॥१७॥

सारबोधिनी—नाडी तथा रश्मि का जो सम्बन्ध है वह तो दिन में ही रहता है । तो जिसका मरण दिन में होता है उसी को रश्म्यनुसारित्व हो

रात्रावप्यादित्यरश्मयो भवन्त्येव । ग्रीष्मर्तुशर्वर्यामुष्मोपलब्धेस्तदानीमपि-रश्मिसद्भावः शक्यत एव निश्चेतुम् ॥१८॥

इति श्रीरघुवरीयवृत्तौरश्म्यनुसाराधिकरणम् ॥९॥

नाडीरश्मिसंबन्धस्यादिबसे एव सद्भाव तत्र मृतस्य रश्म्यनुसारित्वं भवतु नाम परन्तु रात्रौ मृतस्य रश्मिसंबन्धाभावेन कथमूर्ध्वंगमनं स्यादिति चेन्न नाडीरश्मिसंबन्धस्य यावद्देहभावित्वात् अर्थात् यावत्कालं देहस्तावत्पर्यन्तं रश्मि संबन्धो भवत्येव । अतो तादृश संबन्धाभावो नैव ज्ञातुं शक्नोति । श्रुतिरपि तथा प्रतिपादयति "आभ्यो नाडीभ्य इत्यादि" ननु रात्रौ नास्ति रश्मिरिति कथं तत्संबन्धः स्यादिति वाच्यम्. तत्रापि तस्य सद्भावात् निदाघीयनिशायां रश्मिगुणस्यौष्ण्यस्य सर्वानुभवसिद्धत्वेन गुणिनोऽभावे गुणसद्भावस्यानुपपत्तेरिति तत्रापि रश्मिसद्भावः, तत्सद्भावे च नाडीरश्मिसंबन्धस्तस्तद्द्वारोर्ध्वगमनमिति सर्वं समञ्जसम् ॥१८

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृत्तौ श्रीरघुवरीयवृत्तिविवरणे
रश्म्यानुसाराधिकरणम् ॥९॥

सकता है परजो रात में मरता है उसका तो रश्म्यनुसारित्व कैसे होगा ! इस शंका के उत्तर में कहते हैं कि नाडी रश्मि का जो संबन्ध है वह यावत् देहभावी है । अर्थात् यावत् पर्यन्त शरीर का सद्भाव है तावत्पर्यन्त रश्मि संबन्ध रहता है । इस बात को श्रुति भी कहती है "आभ्यो नाडीभ्य इत्यादि" । रात में तो सूर्य का किरण हीं यही होता हैं । तब रश्म्यनुसारित्वेन गमन किस तरह होगा ! निदाघकालिक रात्रि में गरमी की उपलब्धि होने से रश्मि का सद्भाव सिद्ध होता है । । कहीं शीताधिक्य से उष्णता की उपलब्धि नही होती है तो भी सर्वदा सर्वत्र किरण का सद्भाव सिद्ध होता है । इसलिए रश्म्यनुसारि ही विद्वान् का गमन होता है यह सिद्ध हुआ ॥१८॥

इति रश्म्यनुसारादिकरणम् ॥९॥

दक्षिणायनाधिकरणम् ॥१०॥

अतश्चायनेऽपि दक्षिणे ।४।२।१९।

ब्रह्मविदो दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्भवति न वेति संशयः । "अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छति" [तै० ना०] इतीयं श्रुतिर्दक्षिणायने मृतस्य चन्द्रलोकावाप्ति-

---

विवरणम्– ननु मरणेन कस्यापि प्रतिनियतं यदमुकस्यमरणममुकायने एव भवेदिति. ततश्च यदि कश्चिद् ब्रह्मज्ञानी दक्षिणायने मरणमवाप्नोति तदा तादृश ब्रह्मविदो प्राप्तिर्भवति ब्रह्मणो न वेति संशयः । तत्र दक्षिणायने मृतस्य पितृयाणपथागतस्य चन्द्रलोके यावत्पुण्यं विभूतिमनुभूयपुण्य समाप्तौ पुनरावर्तनं भवतीति श्रूयते ततश्च दक्षिणायने मृतो ब्रह्मज्ञानी चन्द्रमण्डलमवाप्य तत्रैव विभूत्यनुभवं करिष्यति ततश्च पुनः संसारमण्डलमेवायास्यति. न तु तस्य ब्रह्मविदोमोक्ष प्राप्तिर्भविष्यतीति पूर्वपक्षः । सिद्धान्तस्तु संसारजनक पुण्यपापकर्मणां तत्वज्ञानेन विनाशित्वात् कारणाभावादेव न भवति संसार प्राप्तिरपितु "मामुपेत्य पुनर्जन्मदुःखालयम शाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धि परमां गता" इत्यादि वचनप्रमाणात् ब्रह्मज्ञानि महोदयानां ब्रह्मप्राप्तिरेव भवति न तु संसारगमनमिति सिद्धान्तं दर्शयितुमुपक्रमते "ब्रह्मविदो दक्षिणायने" इत्यादि ।

सारबोधिनी–जो ब्रह्मज्ञानी दक्षिणायन में मरता है उसको परमपद प्राप्त होता है अथवा नहीं ऐसा सन्देह होता है । "अथ यो दक्षिणो" जो पुरुष दक्षिणायन में मरता है वह पितृयाण अर्थात् दक्षिण मार्ग को प्राप्त करके चन्द्र सायुज्य को प्राप्त करता है । अर्थात् चन्दमण्डल को प्राप्त करके तत्रत्य विभूतियों का अनुभव करता है" और कर्म भोग करने के बाद पुनः उसका पुनरावर्तन होता है ऐसा सुनने में आता है । अतएव ब्रह्मोपासनावान् भीष्म प्रभृति

माह । तत्र गतानाञ्च पुनरावृत्तिरस्त्येवेति न ब्रह्मप्राप्तिरिति पूर्वपक्षः । अत्राभिधीयते– संसृतिप्राप्तिहेत्वभावादेव दक्षिणायनमृतस्यापि ब्रह्मप्राप्तिर्भवत्येव ॥१९॥

दक्षिणायने कर्कादारभ्य धनुः संक्रान्तिलक्षणकाल विशेषेमृर्ति प्राप्तस्य ब्रह्मज्ञानिनो ब्रह्मप्राप्तिर्भवति नवेति संशयः । तत्र "यः कश्चित्पुरुषो दक्षिणायने मरणमवाप्नोति स पितृयाणमार्गेण । चन्द्रमण्डले तत्रत्यां विभूतिमनुभवितुं चन्द्रमण्डलमवाप्नोति" इयं श्रुतिर्दक्षिणायने गतस्य चन्द्रलोकप्राप्तिं प्रतिपादयति । स चन्द्रमण्डले यावत्संपातमुषित्वा पापपुण्ययोर्भोगेन विनाशे संसारमधिगच्छतीति न दक्षिणायने मृतस्य ब्रह्मज्ञानिनो मोक्षप्राप्तिर्भवतीति पूर्वपक्षाशयः । सिद्धान्तयति "अतश्चायनेऽपि दक्षिणे" इति. संसारप्रापकधर्माधर्मयोरभावाद्दक्षिणायने मृतस्यापि ब्रह्मज्ञानिनो मोक्षप्राप्तिर्भवत्येवेति । कदाचिद्दक्षिणायने मृतस्यापि ब्रह्मज्ञानिनः पितृयाणेन यथा चन्द्रमण्डलं भवेदपि तथापि चन्द्रमण्डलगतानामविदुषामेव ततः पुनरावर्तनं भवति न तु ब्रह्मज्ञानिनामपि चन्द्रमण्डलादागमनम् । तस्माद् ब्रह्मणो महिमानमवाप्नोतीति श्रुतिबलेन. तत्र गतो ब्रह्मज्ञानी कियत्कालं विश्रम्यार्चिरादिमार्गेण गच्छन् परमपदमेवाप्नोति यतः संसारकारणधर्मादीनामभावात् । यद्यपि ब्रह्मज्ञानिनामपि भीष्मादीनामुत्तरमार्गस्य प्रतीक्षणं श्रुतम् । तथापि तस्य प्राशस्त्यमात्रबोधकत्वम् । ततश्च ब्रह्मज्ञानी दक्षिणायने उत्तरायणे वा यत्र कुत्रापि मरणं को उत्तरायण का प्रतीक्षण करना पड़ा हैं । इसलिए दक्षिणायन में मृत ब्रह्मज्ञानी को मोक्ष नहीं होता है ऐसा पूर्वपक्ष का अभिप्राय है ।

इसके उत्तर में कहते हैं "अतश्चायनेपीति" दक्षिणायन में मृत को ब्रह्मज्ञानी उसको भी मोक्ष प्राप्त होता ही है । दक्षिणमार्ग से चन्दमण्डल को प्राप्त किया हुआ अविद्वान् का ही पुनरावर्तन होता है । आत्मज्ञानी का पुनरावर्तन नहीं होता है । क्योंकि संसार का कारण जो कर्म उसका विनास हो जाने से अर्चिरादि मार्ग से जा करके परम पद को प्राप्त करता है । भीष्मादिक ने जो उत्तरायण का प्रतीक्षण किया था वह केवल उत्तरायण का प्रशंसन मात्र है । अतः दक्षिणायन में मृत ब्रह्मज्ञानी को मोक्ष अवश्य होता है ॥१९॥

योगिनः प्रति स्मर्यते स्मार्ते चैते ।४।२।२०।

"यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः" [गी०८] इत्यादिभिर्वाक्यैस्तु ब्रह्मविदः प्रत्यनुदिनमेते उभे स्मृति स्मर्तव्ये स्मर्यते न तु मरणकालविशेषं व्यवस्थाप्यते ॥२०॥

इति श्री रघुवरीयवृत्तौ दक्षिणायनाधिकरणम् ॥१०॥

श्रीमद्भगवद्रामानन्दाचार्यान्वयप्रतिष्ठित श्रीमदनुभवानन्दाचार्य स्वामी द्वारकेण ब्रह्मवित्स्वामि श्रीरघुवराचार्येण विरचितायाँ श्रीरघुवरीय वृत्तौ चतुर्थाध्यायस्य द्वितीयः पादः ॥

प्राप्नोतु नाम तथापि तस्य ब्रह्मप्राप्तिरवश्यमेव भवतीति न तत्र संशयावकाशः ॥१९॥

विवरणम्—ननु स्मृतिषु उत्तरकालस्यानावृत्तौ कारणता प्रतिपादिता तस्याः संगतिः मुमूक्षुणां दक्षिणायनेनापि गतिलाभे कथं स्यादित्यत आह "यत्रकाले" इत्यादि । यत्रकाले आवृत्तिमनावृत्तिं च गच्छन्तीति वाक्यं न कालबोधकमपितु तदभिमानिदेवतापरकमतो न कालनियमः । अपितूत्तरमार्गस्य दिनाद्यभिमानीनीदेवतापरकत्वेन मार्गस्य तदभिमानि देवताया एव मुख्यत्वात् । तस्माद्दक्षिणायने मृतस्यापि ब्रह्मोपासकस्य मोक्षप्राप्तिर्भवत्येवेति संक्षेपः ॥२०॥

इत्यानन्दभाष्यकार जगद्गुरु श्रीरामानन्दार्यपीठाचार्य जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य योगीन्द्रकृतौ श्रीरघुवरीय वृत्ति विवरणे चतुर्थाध्यायस्य द्वितीयपादः ॥

॥ श्रीहनुमते नमः ॥

सारबोधिनी—"जिस काल विशेष में योगी लोग आवर्तन अनावर्तन को प्राप्त करते है" इत्यादि वाक्यों से ब्रह्मज्ञानी के लिए प्रतिदिन स्मर्तव्य दोनों प्रकारक सृती मार्गों का प्रतिपादन है । किन्तु मरण काल विशेष का व्यवस्थापन नहीं किया जाता है । इसलिए दक्षिणायन में मृत भी ब्रह्मज्ञानियों को मोक्ष की प्राप्ति अवश्य ही होती है । "यत्र कालेत्वनावृत्तिम्" इत्यादि स्मृति मार्ग का व्यवस्थापक है काल का नहीं ॥२०॥

इति दक्षिणायनाधिकरणम् ॥

स्वामी रामेश्वरानन्दाचार्य कृत श्रीरघुवरीयवृत्ति सारबोधिनीमें चतुर्थाध्याय द्वितीयपाद पूर्ण हुआ ।

॥ श्रीआचार्यचरणकमलेभ्यो नमः ॥

श्रीरामचन्द्रचरणौ शरणं प्रपद्ये

॥ अथ चतुर्थाध्यायस्य तृतीयः पादः ॥

अर्चिराधिकरणम् ॥१॥

अर्चिरादिना तत्प्रथितेः ।४।३।१।

परमपुरुषोपासनया विनष्टबन्धनस्य विदुष उत्क्रान्ति प्रदर्शिता । तदुत्तराध्वनोऽधुना निर्णयः क्रियते । ब्रह्मधामजिगमिषोविदुषोऽनेकश्रुतिष्वनेकप्रकारेणाम्नातेष्वध्वसु येन केनाप्यध्वना गमनमुतार्चिरादिनैवाध्वनेति संशयः । तत्र श्रुतिषु गौणमुख्यभेदाभावात्स्वातन्त्र्येणाभिधीयमा-

---

विवरणम्—अत्रातीत प्रकरणेन ब्रह्मविदः केन प्रकारेण समुत्क्रमणं भवतीति विचारितवान् । तत्र केन प्रकारेण कथमिव गमनं भवतीति विचारयितुमुपक्रमः । तत्र तत्तत्स्थानेषु अनेक प्रकारको मार्गप्रतिपादितः । तत्र भिन्न–भिन्न प्रकरणे प्रतिपादनात् भिन्नोभिन्नो मार्गोऽथवा अनेकविशेषणविशिष्ट एक एवार्चिरादिमार्ग इति संशयः । तत्र भिन्न प्रकरणे समाम्नानात्प्रकारभेदाच्च भिन्नभिन्न एव गमनमार्ग इति पूर्व पक्षाशयः । सिद्धान्तस्तु प्रकरणभेदेऽपि गन्तव्यस्य ब्रह्मण एकत्वादादित्यादिमार्गदेवतानामेकत्वात् स एवार्चिरादिमार्ग इति प्रत्यभिज्ञानाच्चैक एव मार्गोऽनेकविशेषणविशिष्ट इति दर्शयितुमुपक्रमते "परमपुरुषोपास-

सारबोधिनी—गत प्रकरण से परमपुरुष साक्षात्कारवान् पुरुष के उत्क्रमण प्रकार का वर्णन किया गया है । इसके बाद जिस मार्ग द्वारा परम पुरुष की प्राप्ति होती है उस मार्ग का विचार किया गया । उस विषय को लेकर के छान्दोग्य में कहा है कि "तेर्चिषमभिसंभवन्ति" [वह उपासक अर्चिरादिमार्ग को प्राप्त करता है । "एवम् अथैतैरश्मिभिः" वह वह उपासक इस सूर्य के रश्मि द्वारा ऊपर जाता है"] यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति" [जब यह उपासक व्यक्ति इस लोक से प्रयाण करता है तब वह वायु में जाता है"] इत्यादि प्रकार से विभिन्न श्रुतियों में भिन्न–भिन्न मार्ग का वर्णन

नेष्वध्वसु येन केनापि गमनमिति पूर्वपक्षः। सिद्धान्तस्तु– अर्चिरादि-नैकेनैवाध्वना गतिः। प्रकारभेदेऽपि सर्वत्रार्चिरादिरेवाध्वा ब्रह्मविदो गन्तु मभिधीयते। सर्वेष्वभिधीयमानेष्वध्वसु नैयत्येनादित्यादीनां दर्शनात्स

नयेत्यादि" अथ परम पुरुषस्योपासनयाविनष्ट शुभाशुभकर्मबन्धनस्य ब्रह्मज्ञानिन उत्क्रमणंकथं केन प्रकारेण च भवतीति प्रतिपादितम्। तद-नन्तरं केन मार्गेण ब्रह्मज्ञानिनो गमनं भवतीति विचारः प्रस्तूयते। तत्र ब्रह्मणः श्री साकेताधिपते लोकं विलक्षणं स्थानजिगमिषुणामुपासकाना-मनेकश्रुतिषु विभिन्नप्रकारेण विभिन्नो मार्गः प्रदर्शितः। तेषु येन केनापि मार्गेण गमनं भवति अथवा अर्चिरादिनामार्गविशेषेणैकेनैव पथा-गमनं भवति ब्रह्मविदामिति संशयः। तत्रानेकासु श्रुतिषु गौणमुख्यादि भेदाभाव कथनात् येन केनापि मार्गेण गमनं भवति न तु प्रतिनियतः कश्चिन्मार्गविशेष इति पूर्वपक्षकर्तुराशयः।

किया गया है। तो ब्रह्मज्ञानी का गमन किस मार्ग से होता है। इसका निश्चय करने के लिए तथा सूत्र का व्याख्यान करने के लिए वृत्तिकार उपक्रम करते हैं "परमपुरुषोपासनया" इत्यादि। परमपुरुष भगवान् श्री सीताकान्त की उपा-सना करने से विनिष्ट है शुभाशुभ कर्म बन्धन जिनका एतादृश जो उपासक उनका इस शरीर से उत्क्रमण होता है इस बात का प्रतिपादन गत प्रकरण में किया गया है। उसके बाद उन उपासकों का गमन किस मार्ग से होता है उसका निर्णय किया जाता है। ब्रह्मधाम श्री सीताधिपति का जो अप्राकृत साकेत लोक में गमन करने की इच्छावान् जो उपासक है विद्वान् महापुरुष के लिए छान्दोग्य वृहदारण्यकादिक अनेक श्रुतियों में अनेक प्रकार से कथित जो अनेक मार्ग है जैसे कहीं अर्चिरमार्ग कहा है। कहीं उससे भिन्न मार्गान्तर का प्रकारान्तर का वर्णन किया है तो इन अनेक मार्गों में से किस मार्ग से गमन होता है अथवा प्रतिनियत अर्चिरादि रूप एक मार्ग से ही सबका गमन होता

एवायमर्चिरादिरध्वेति प्रत्यभिज्ञानात् । तस्मात्सर्वत्रार्चिरादिरेक एवाध्वेत्यनेनैवोपासकस्य गतिः ॥१॥

श्रीरघुवरीयवृत्तावर्चिराद्यधिकरणम् ॥१॥

एवं पूर्वपक्षिते सिद्धान्ती प्राह "अर्चिरादिनेति" अनेक विशेषण विशिष्टोऽर्चिराद्यक एव मार्ग सर्वत्र श्रुतिषु प्रतिपादितः । अतः सर्वोऽपि ब्रह्मवित् एकेनैवार्चिरादि मार्गेण ब्रह्मपदं प्राप्नोति । कुतः ? तत्प्रथितेः एक एवार्चिरादिमार्गः सर्वत्र प्रथितः प्रसिद्ध इति । न च प्रकरणभेदान्मार्गभेदः स्यादिति वाच्यम् सर्वश्रुतीनां मार्गप्रतिपादिनीनामेकवाक्यत्वेनैकथात् । प्राप्तव्यस्य परमपुरुषस्यैकत्वेनमार्गस्याप्येकत्वमेवनत्वनैकयमिति । एतदेव वृत्तिकारः प्रदर्शयति "सिद्धान्तस्तु" इत्यादिना । अर्चिराद्येकेनैवमार्गेण ब्रह्मविदां गतिर्भवति । यद्यपि प्रकारप्रकरणयोर्भेदस्तथापि एक एवार्चिरादिको मार्गः सर्वश्रुति सुकथितः । यतोऽभि-

है । इस प्रकार से मार्ग के विषय में संशय होता है । इस विषय में श्रुतियों में तो अमुक मार्ग मुख्य है और अमुक मार्ग गौण है ऐसा तो कहा है नही तब स्वतंत्र रूप से उन अनेक मार्गों में से जानेवाला पुरुष स्वेच्छया जिस किसी एक मार्ग से ही गमन करेगा । क्योंकि नियामक खास कोई कारण नहीं है ऐसा पूर्व पक्षवादी कहते हैं । अर्थात् नियामक विशेष हेतु के अभाव से गमन होता है ऐसा कोई नियम नही हैं ॥ इस प्रश्न के उत्तर में सिद्धान्तवादी कहते हैं "अर्चिरादिनेति" अनेक विशेषण विशिष्ट एक ही मार्ग है । जो कि सर्वत्र प्रतिपादित हुआ हैं । इसलिए सभी ब्रह्मज्ञानी एक अर्चिरादि मार्ग से ही गमन करते हैं नतु अनेक मार्ग से नवा अनेक मार्ग से तत्तत् पुरुषो का गमन होता हैं । क्यों ? एक यही अर्चिरादि मार्ग अनेक श्रुतियो में प्रतिपादन हुआ है इसी बात को वृत्तिकार करते हैं सिद्धान्तस्तु=इत्यादि प्रकरण से अर्चिरादि रूप एक ही मार्ग से सब ब्रह्मज्ञानियो का गमन होता हैं । यद्यपि मार्ग के विषय में प्रकार भेद तत्तत् स्थान में उपलब्ध होता है जिससे कि

वाय्वधिकरणम् ॥२॥

वायुमब्दादविशेषविशेषाभ्याम् ।४।३।२।

अर्चिरादिगतौ क्रमभेदः समाधीयते । "मासेभ्यः संवत्सरं संव-

मानिदेशानां सर्वत्र दर्शनादयमर्चिरादिरिति प्रत्यभिज्ञानाच्चेत्यर्थः । तस्मादेक एवार्चिरादिमार्गस्तेनैव मार्गेण ब्रह्मविदाङ्गमनमिति सर्वसिद्धान्तसिद्धो मार्गः ॥१॥

इति जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणेऽर्चिराद्याधिकरणम् ॥१॥

अनेक मार्ग को मानना ऐसा प्रतिभासित होता है तथापि सर्वत्र एक ही अनेक विशेषण विशिष्ट अर्चिरादिक मार्ग ब्रह्मज्ञानो के ऊर्ध्वगमन के लिए शास्त्र में प्रतिपादित हुआ है । क्योंकि प्रतिपाद्यमान सभी मार्गों में नियमतः आभिमानिक आदित्यादि देवों का कथन हुआ है । और स एवायमर्चिरादि मार्गः वही यह अर्चिरादिक मार्ग है इस तरह से प्रत्यभिज्ञान होता है वह प्रत्यभिज्ञान एकत्व का समर्थक रोता है । जैसे "सोयं देवदत्तः" इत्यादि प्रत्यभिज्ञागम एकत्व का समर्थक है । यद्यपि "ते एवामी केशाः" इत्यादि स्थल में प्रत्यक्ष विरोध होने से व्यक्तिगत एकत्व प्रत्यभिज्ञान नहो होता है । तथापि विशेष धर्म द्वारा अन्तत एकत्व ही समर्थित होता है । प्रकृत में भी इसी तरह प्रत्यभिज्ञान मार्गगत एकत्व का व्यवस्थापक होता है । इसलिए अनेक श्रुतियो में मार्ग का अनेकत्व यद्यपि आपात दृष्टि से प्रतिभासित होहा है तथापि सर्वश्रुति की एक वाक्यता होने से मार्गों में एकत्व ही सिद्ध होता है । अतः सर्वत्र अर्चिरादिक एक हो मार्ग हैं । और उसी एक मार्ग द्वारा उपासक ब्रह्मज्ञानी का गमन होता है यह सिद्ध हुआ । मार्ग विषयक अनेकत्व आपात दृष्टि से ही प्रतिभासित होता हैं । परन्तु वस्तुतः अनेकत्व नहो हैं एक ही मार्ग से तत्वज्ञानी का उत्क्रमण होता हैं यह सार हैं ॥१॥

इत्यर्चिराद्यधिकरणम् ॥१॥

त्सरादित्यम्" [छा०।४।१५।५] इतिच्छन्दोगाः समामनन्ति अग्निलोक-मागच्छति स वायुलोकम्" [कौ० १।३] इति "मासेभ्यो देवलोकं देव-लोकादादित्यम्" [बृ०६।२।१५] "स वायुमागच्छति" [बृ० ५।१०।१] इति च वाजसनेयिनः। अत्र देवलोकवायुशब्दाभ्यां भिन्नार्थोऽभिधी-यते। देवलोकं गत्वा वायुमुपासको गच्छत्युत देवलोकवायुशब्दयोरेक

विवरणम्--योऽयमर्चिरादिमार्ग ऊर्ध्वगमनाय ब्रह्मविदाम् स एक एवेति पूर्वनिर्धारितः परन्तु प्रकारभेदो भवतीति या शङ्का कृता तस्या निवारणायोपक्रमते="अर्चिरादिगतावित्यादि" अर्चिरादिगतौ क्रमभे-दाद्यो मार्गभेदः शङ्कितस्तस्य क्रमभेदस्य समाधानं करोतीत्यर्थः। मार्ग भेदको यो क्रमभेदस्तमेव दर्शयति "मासेभ्यः" इत्यादि द्वादशमासेभ्य-श्चैत्रादारभ्य फाल्गुनान्तेभ्यस्त्रयोदशमासेभ्यो वा, अथवा चैत्रसंक्रान्तित आरभ्य कुम्भसंक्रान्ति सौर्यमासेभ्योऽनन्तरं सम्वत्सरं मासावयविनम्काय

सारबोधिनी—अर्चिरादिक जो ब्रह्मधाम के गमन का मार्ग कहा गया है उसके विषय में विभिन्न श्रुतियों में जो क्रमभेद उपलब्ध होता है उसकी व्यव-स्था करने के लिए उपक्रम करते हैं अर्चिरादिगतावित्यादि" अर्चिरादिक मार्ग के विषय में श्रुतियों में जो परस्पर भेद प्रतिभास होता है उसका समाधान इस सूत्र से किया जाता है। "वह उपासक मास से संवत्सर मासावयवी कालात्मक वर्ष में जाता है और संवत्सर से आदित्य में जाता है"] इस प्रकार से छान्दोग्य श्रुति में कहा गया है। "अग्निलोक में वह उपासक आता है; वह वायुलोक में आता है" वह उपासक मास से देवलोक में जाता है। देवलोक से आदित्य में जाता है। इस प्रकार से बृहदारण्यक में कहा है। तथा "वह वायु में आता है" इस प्रकार से वाजसनेयीशाखा में कहा गया है। यहाँ श्रुतियों में वायु तथा देवलोक शब्द परस्पर विभिन्न अर्थ का कथन करता है। अर्थात् वायु शब्द का अर्थ वायु और लोक शब्द का अर्थ है देवता सम्बन्धी लोक विशेष। इस प्रकार से ये दोनों शब्द विभिन्नार्थ का प्रतिपादक

एवार्थं इति संशये-तयोर्विभिन्नार्थकत्वाद्यथारुचि गच्छतीति पूर्वपक्षः सिद्धान्तस्तु-संवत्सरादूर्ध्वं वायुमागच्छन्ति देवानां लोक इत्यविशेषव्यु-त्पत्तौ देवलोक शब्दोऽपि वायुपरस्तथा वायुमिति विशेषरूपेण च वायु-मेवाभिधत्तेऽतः संवत्सरादूर्ध्वं वायुमागच्छति ॥२॥

इति श्रीरघुवरीयवृत्तौ वाय्वधिकरणम् ॥२॥

विशेष गच्छति ततश्चमास समुदायि वर्षान्तरमादित्यलोकगच्छत्युपासक इत्येवं क्रमेण छन्दोगाः प्रतिपादयन्ति । अग्निलोकमित्यादि स उपा-सकोऽग्निलोकं गच्छति ततो वायुं गच्छति । अत्राग्निलोकाद्वायुगमनं प्रतिपादयति । अन्यत्र मासेभ्योदेवलोकं गच्छति देवलोकाच्चादित्यं गच्छति स वायुं गच्छति । अत्र देवलोको भिन्नः वायुश्चभिन्नो नत्वेकः । तत्र देवलोकं गत्वोपासको गच्छति अथवा देवलोकवायु शब्दौ समा-नार्थकाविति संशयः । तत्र वायुलोकयोर्विभिन्नार्थ प्रतिपादकत्वात् यथे-च्छया गच्छतीति पूर्वपक्षाशयः । सिद्धान्तस्तु वायुमिति स उपासकः संवत्सरादनन्तरं वायु गच्छति कुतः ? अविशेषविशेषाभ्याम् एकत्र है न तु समानार्थक है जिससे विरोध नहीं होता है । अब यहाँ संशय होता है कि वह उपासक देवलोक में जाकर के वायु में जाता है । अथवा देवलोक तथा वायु-यह दोनो समानार्थक है । एतादश संशय के बाद पूर्वपक्षवादी कहते हैं कि देवलोक तथा वायुशब्द को विभिन्नार्थक होने से स्वेच्छया गमन होता उपासकों का । इस पूर्वपक्ष के उत्तर में सिद्धान्तवादी कहते हैं "वायुमब्द-दित्यादि" वह उपासक संवत्सर के बाद वायु में जाता है । क्योंकि अविशेष और विशेष से अर्थात् "देवानां लोको देवलोकः" इस व्युत्पत्तिसे देवलोक शब्द वायु का भी बोधक होता है । क्योंकि वायु भी तो देव ही । तथा "स वायु-मागच्छति" इत्यादि वाक्य से साक्षादेव वायु का बोध होता है । यद्यपि देव-लोक शब्द सामान्य देवत्वरूप से देवत्वाक्रान्त वायु को समझता है तथापि "वायुमागच्छति" इत्यादि शब्द प्रतिपदोक्त रूप से वायु का बोधक हैं । इस

वरुणाधिकरणम् ॥३॥

तडितोऽधिवरुणः सम्बन्धात् ।४।३।३।

कौषीतकिनां ब्राह्मणे श्रूयते "स एतं देवयानं पन्थानमासाद्या-ग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्र-

---

संवत्सरानन्तरं वायुं गच्छति अन्यत्र तदनन्तं देवलोकं गच्छति तत्रोभयत्रापि वायोरेव ग्रहणम्। देवलोक शब्दोऽपि वायोरेव बोधकः। देवानां लोक इत्यादिव्युत्पत्या वायोरपि देवत्वात्। अन्यत्र च वायुशब्देनैववायोर्ग्रहणम्। अतः संवत्सरानन्तरम् विशेषाविशेषाभ्यां वायोरेवग्रहणमिति तस्मादुभयत्रापिवायोरेवसम्पर्क मिति न कोऽपि क्रमविरोधः ॥२॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ श्रीरघुवरीयवृत्ति विवरणे वाय्वधिकरणम् ॥२॥

लिए वायु समभिव्याहार देवलोक शब्द भी सामान्य रूप से वायु का ही बोधक हैं।

इसी वस्तु का स्पष्टीकरण करते हैं "सिद्धान्तस्तु" इत्यादि संवत्सर के बाद वह उपासक वायु में जाता है। क्योंकि "देवानां लोको देवलोकः" इस प्रकार की व्युत्पत्ति से देवलोक शब्द भी वायु का भी बोधक है। तथा "वायु गच्छति" इस प्रकार से विशेष रूप से भी श्रुति वायु का ही कथन करती है। इसलिए संवत्सर के बाद वह उपासक वायु में जाता है यह सिद्ध होता है। इति वाय्वधिकरणम् ॥

सारबोधनी—कौषीतकि ब्राह्मण में सुनने में आता है कि "वह ब्रह्मविद्योपासक देवयान मार्गको प्राप्त करके अग्निलोक को प्राप्त करता है। उसके बाद वायुलोकको प्राप्त करता है। तदनन्तर वरुण लोक उससे आदित्य लोकको प्राप्त कर इन्द्रलोकसे प्रजापति लोकको प्राप्त करता है। प्रजापति लोकके वाद परम प्राप्य ब्रह्मलोक श्री साकेत धामको प्राप्त करता है"] इत्यादिक श्रुति में श्रुत जो वरुण है उसका वायु के वाद में निवेश होता

लोकं स प्रजापतिलोकं स ब्रह्मलोकम्'' [कौषी० १।३] इत्यादिषु श्रुतीनां वरुणादीनां वायोरुर्ध्वं निवेश आहोस्वित्तडित इति संशये--पाठक्रममादृत्य वायुलोकादूर्ध्वं वरुणादीनां निवेश इति पूर्वपक्षः। सिद्धान्तस्तु--तडिद्वरुणयोर्मेघस्थत्वेन सम्बन्धात्तडित ऊर्ध्वमेव वरुणादीनां निवेशः ॥३॥

इति श्रीरघुवरीय वृत्तौ वरुणाधिकरणम् ॥३॥

विवरणम्—अर्चिरादिमार्गविषये तथा तदन्तर्गत वायु विषयक क्रमभेदविषये शङ्कां निराकृत्य वरुणविषयकक्रमभेदं निराकर्तुमुपक्रमते "कौषीतकिनां ब्राह्मणे" इत्यादि। "स एतं देवयानमित्यारभ्य स ब्रह्मलोकमित्यन्तं श्रूयते कौषीतकिनां ब्राह्मणे। तत्र पाठक्रममाश्रित्य वायोरनन्तरं वरुणस्य निवेशोऽथवा तडितोऽनन्तरं वरुणस्य निवेश इति संशयः। तत्र विद्युतोऽनन्तरं वरुणस्य निवेशासंभवाद् वायोरनन्तरमेव वरुणस्य निवेश इति पूर्वपक्षः। तमिमं पूर्वपक्षं निराकरोति "तडितोधि" इत्यादि। पाठक्रमादर्थक्रमस्य बलवत्वेन तडितोऽनन्तरमेव वरुणस्य सम्बन्धस्तथा तडिद्वरुणयोर्मेघस्थत्वाच्च तदत्र श्रीआनन्दभाष्य-

है अथवा तड़ित के बाद में वरुण लोक का निवेश होता है ऐसा संशय होता है। एतादृश संशय के बाद पूर्वपक्षी कहते हैं कि पाठक्रम के अपेक्षा से वायु लोक के बाद ही वरुण का निवेश होता है। सिद्धान्तवादी कहते हैं कि तडित और वरुण यह दोनों मेघ स्थित हैं तो मेघ स्थितत्व साधर्म्य से तडित के बाद ही वरुण का सम्बन्ध होता है। ननु वायु के बाद वरुण का सम्बन्ध यद्यपि पाठक्रम की अपेक्षा से वायु के बाद वरुण का सम्बन्ध अपेक्षित है तथापि पाठापेक्षया अर्थक्रम बलवान् होता है। जैसे "अग्निहोत्र जुहोति यवागू पचति" इस स्थल में पाठक्रम से यदि हवन प्रथमतः कर लेवें तो यवागू पाक निरर्थक हो जायगा। इसलिए अर्थक्रम से प्रथमतः यवागू का पाक किया जाता है। तदनन्तर कारण रूप यवागू से हवन किया जाता है। तभी

आतिवाहिकाधिकरणम् ।।४।।

आतिवाहिकास्तल्लिङ्गात् ।४।३।४।

एतेऽर्चिरादयः किमध्वलक्षणभूता उतगमयितार इति संशयेऽध्वनो लक्षणभूता एवेमे । दृश्यत एवलोक एवं विधोऽध्वलक्षणानि सूचय-

---

काराः "ततश्चायं क्रमः सम्पन्नः नाडीरश्मिप्रवेशानन्तरमर्चिषमर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षादुत्तरायणमासांस्तेभ्यः सम्वत्सरं सम्वत्सरादूवायुं वायोरादित्यमादित्याच्चन्द्रमसं चन्द्रमसो वैद्युतं वैद्युताद्वारुणं वारुणादैन्द्रमैन्द्राद्धातृलोकं धातृलोकाद्विरजां तत्र स्नात्वा श्रीसाकेतलोकद्वारम्" इति ॥३॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ
श्री रघुवरीयवृत्तिविवरणे वरुणाधिकरणम् ॥३॥

विवरणम्—ननु एतेऽर्चिरादयो मार्गस्य चिह्नरूपा अचेतनाः अथवा गमयितारः सचेतना इति संशयः। तत्रा चेतनाश्चिह्नभूता एव मार्गस्येति पूर्वपक्षः। "स एनान् ब्रह्म गमयतीति श्रुते रतिवाहिका ब्रह्म-

यवागूपाक सफल होता है । अन्यथा हवनार्थक जो यवागू उसका सम्पादन सर्वथा व्यर्थ होगा तथा तन्मूलक हवन भी नहीं हो सकेगा । अतः पाठक्रमापेक्षया अर्थ क्रम बलवान् है । यह मानने से यवागूपाक तथा हवन दोनों की सम्पत्ति होती है । इसी तरह प्रकृत में तडित वरुण को मेघस्थित होने से अर्थ क्रम को लेकर के तडित के बाद वरुण का सम्बन्ध होता है । नतु पाठक्रम से वायु के बाद वरुण का सम्बन्ध विशेष अन्यत्र देखें ॥३॥

इति वरुणाधिकरणम् ॥

सारबोधिनी—अर्चिरादि मार्ग तथा उसके क्रम विषय में जो विप्रतिपत्ति थी उसका निराकरण करके अब वे अर्चिरादिक मार्ग स्थान का चिह्नभूत अचेतन वस्तु है । अथवा अर्चिरादिक ब्रह्म के प्रति गमयिता चेतन विशेष है । इसका निर्णय करने के लिए उपक्रम करते हैं "एतेऽर्चिरादयः" इत्यादि ।

न्नुपदेशो देशान्तरं जिगमिषून्प्रति तथाऽध्वलक्षणभूता एवार्चिरादय इति पूर्वपक्षः । अत्राभिधीयते । ब्रह्मप्रेप्सूनामेतेऽर्चिरादयो गमयितार एव "स एनान्ब्रह्म गमयति" [छा० ४।१५।६] इत्युत्तरवाक्यस्थलिङ्गादवगम्यते । अर्चिरादयोऽत्र तत्तदधिष्ठातृदेवता एवेति तासां गमयितृत्वं सुतरां सम्भवति ॥४॥

नियुक्ता स चेतना एव नतु अचेतना इति सिद्धान्तं मनसि कृत्य सूत्रं व्याख्यातुमुपक्रमते "एतेऽर्चिरादय इत्यादि" य एतेऽर्चिरादयः पूर्वमुक्तास्ते मार्गस्य चिह्नभूता अचेतनाः सन्ति अथवा ब्रह्मजिगमिषूणां गमयितारः स चेतना देवा इति संशयः । तत्र मार्गस्य लक्षण भूता एवार्चिरादयः लोकेमार्गस्थानस्यैव प्रयोगदर्शनादिति पूर्वपक्षाशयः । अत्रोत्तरम् "आतिवाहिकाः" इत्यादि । एतेऽर्चिरादयः आतिवाहिका ब्रह्म जिगमिषूणां गमयितारः सचेतनाः पुरुषा एव कुतः ? तल्लिङ्गात् सचेतनानां पुरुषाणामेव लिङ्गस्य दर्शनात् "स एनान् ब्रह्म गमयतीत्यादि वाक्येन चेतनस्य गमयितु निर्देश दर्शनात् नहि मुख्यवृत्त्याऽचेतने

ये जो पूर्वकथित अर्चिरादिक है वे क्या मार्गका नाम विशेष है अथवा ये लोग ब्रह्मधाम के प्रतिजिगमिषु जो उपासक उनको ब्रह्म पर्यन्त पहुचानेवाले चेतन विशेष हैं ऐसा सन्देह होता है । इसमें पूर्वपक्षवादी कहते हैं कि ये अर्चिरादिक मार्ग का चिह्न विशेष है लोक में भी एतादृश मार्ग के लक्षण को सूचित करते हुवे उपदेश दिया जाता है। देशान्तर में जानेवालो के लिए उसी तरह प्रकृत में भी ये अर्चिरादिक मार्ग का ही चिह्न विशेष है ऐसा पूर्वपक्ष का अभिप्राय है । इसके समाधान में कहते हैं "आतिवाहिका इत्यादि" ये अर्चिरादिक अतिवाहिक अर्थात् ले जानेवाले चेतन विशेष हैं । क्योंकि चेतन का ही लिङ्गविशेष है । ब्रह्म प्राप्ति की इच्छावान को पहुँचानेवाले चेतन हैं "स एनान् ब्रह्म गमयति" एतादृश उत्तर वाक्य से सिद्ध होता है । क्योंकि मुख्यवृत्ति से गमयितृत्व चेतन में ही होता है अचेतन में नहीं । यहाँ अर्चिरादिक

वैद्युतेनैव ततस्तच्छ्रुतेः ।४।३।५।

ननु "स एनानिति श्रुतिविद्युल्लोकादूर्ध्वमाब्रह्मातिवाहिकतयाऽमानवं पुरुषमभिधत्त इति तत उपरितनानान्त्वातिवाहिकत्वं कथमिति चेत्ततो विद्युत ऊर्ध्वमाब्रह्म वैद्युतामानवेनातिवाहिके नैव प्राप्यते। स एनान्ब्रह्मगमयति" [छा० ४।१५।६] इति श्रुतेः। वरुणादीनान्त्वनुग्राहकत्वम् ॥५॥

इति श्रीरघुवरीयवृत्तावातिवाहिकाधिकरणम् ॥४॥

गमयितृत्वं किन्तु सचेतने एव तथात्वम्। तस्मादेतेऽर्चिरादयो देव विशेषा एवातिवाहिकाः न तु मार्गचिह्नभूता इति स्थितम् ॥४॥

विवरणम्—ननु वैद्युत पुरुषोऽमानवः सविद्युत आरभ्य ब्रह्मप्राप्ति पर्यन्तमुपासकानां ब्रह्मप्रापकतया आतिवाहिको भवतु नाम किन्तु वैद्युतात्पूर्ववर्तिनोये ते तु नामानवास्ततः कथं तेषां वरुणादीनामातिवाहिकत्वम्, न च ते वरुणादयोऽमानवाः "स एनान् ब्रह्मगमयतीत्यादिना-वैद्युत आरभ्यैवामानवत्वस्य श्रवणादिति न वरुणादीनां पूर्ववर्तिनामातिवाहिकत्वमित्याशङ्क्य समाधातुमुपक्रमते "ननु स एनातीत्यादि" "स एनान् ब्रह्म गमयति" इत्यादि श्रुतिः विद्युल्लोकादनन्तरंकमप्यमानवपुरुषब्रह्मलोकपर्यन्तमातिवाहिक रूपेणप्रापकं प्रापयति ननु विद्युल्लोकात्पूर्ववर्तिनामानवतया आतिवाहकत्वं दर्शयतीति कथं तेषां वरुणादीनां पदत्ततदधिष्ठातृ देवता का सूचक है और देवता सचेतन होते हैं। इसलिए अर्चिरादिक पद गमयिता चेतनपरक है। नतु मार्ग का चिह्न रूप है ॥४॥

सारबोधिनी—वह विद्युत अमानव पुरुष ब्रह्मोपासक को ब्रह्मलोक में ले जाता है यह श्रुति तो विद्युत लोक से ब्रह्मपर्यन्त प्राप्त करता है तो वैद्युत से पूर्ववर्ति जो वरुणादिक हैं उनमें तो आतिवाहिकत्व सिद्ध नहीं होता है। इस शङ्का का समाधान करने के लिए उपक्रम करते हैं "ननु स एनानित्यादि" "स एनान् ब्रह्मगमयति" यह श्रुति विद्यूत लोक से आगे ब्रह्मपर्यन्त आतिवाहिक

कार्याधिकरणम् ॥५॥

कार्यं बादरिरस्य गत्युपपत्तेः ।४।३।६।

अर्चिरादेरध्वनो विदुषो गमनमित्यभिहितम् । अथात्र संशयः किमयमर्चिरादिको गणः कार्यं ब्रह्मोपासीनान्नयत्याहोस्वित् परब्रह्मोपासीनान् ब्रह्मात्मकतया प्रत्यगात्मानमुपासीनांश्चेति । तत्र कार्यं हिरण्यगर्भमुपासीनान्नयतीति बादरिर्मन्यते । यतः परिच्छिन्नस्य परब्रह्मण उपासकस्य देशविशेषे गतिः सम्भवति ॥६॥

तत्पूर्ववर्तिनामातिवाहिकत्वमित्यत आह "वैद्युतेनैवेत्यादि" सूत्रम् । वैद्युतेन विद्युल्लोकादागते नामानवेनातिवाहिक पुरुषविशेषेण तत ऊर्ध्वं ब्रह्मोपासकानां तत्साहाय्येन ब्रह्मपर्यन्तं गमनं भवति कुतः? तथैव श्रुतौ श्रवणात् "स एनान् ब्रह्मगमयतीति श्रुतेः । यद्यपि पूर्वोक्तरीत्या वरुणादिषु नातिवाहिकत्वं तथापि तेषां पदातिवाहिकत्वं तत्तु अमानवातिवाहकस्यानुग्राहक तयोपचारतयैव भवति ननु मुख्य रूपेण । दृश्यते लोकेऽनुग्राहकेऽपि तथा प्रयोगः ॥५॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ
श्रीरघुवरीयवृत्तिविवरणे अतिवाहिकाधिकरणम् ॥४॥

विवरणम्—ब्रह्मोपासकानामर्चिरादि मार्गेण गमनं तथाऽर्चिरादिकस्य स्वरूपमपीतः पूर्वविचारितम् । अतः परं संशयो भवति यत् योय रूप से अमानव पुरुप का प्रतिपादन करती है । तब वैद्युत से पूर्ववर्ती वरुणादिक में आतिवाहिकत्व किस तरह से होता है । इस शङ्का के उत्तर में कहते हैं "वैद्युतेनैव" इत्यादि सूत्रों विद्युत लोक के आगे ब्रह्मपर्यन्त विद्युत सम्बन्धी अमानव आतिवाहिक पुरुष ब्रह्मोपासक को ले जाता है । क्योंकि "स एनान् ब्रह्म गमयति" इस प्रकार श्रुति में श्रुत है । वरुणादिक में जो आतिवाहिकत्व है वह आतिवाहिक अमानव पुरुष का सहायक है । इसलिए औपचारिक रूप से आतिवाहिकत्व है मुख्य रूप से नहीं ॥५॥

इत्यतिवाहकाधिकरणम् ।

विशेषितत्वाच्च ।४।३।७।

"पुरुषोऽमानव एत्य ब्रह्मलोकान गमयति" [बृ० ६।२।१५] "प्रजापते समां वेश्म प्रपद्ये" [छा० ८।१४।१] इत्यादिषु कार्यस्य हिरण्यगर्भस्यैव प्राप्यतया विशेषितत्वात् कार्योपासीनान्नयतीति ।।७।।

मर्चिरादिको गणः स कार्यब्रह्मोपासकान् कार्यब्रह्मगमयति अथवा परं ब्रह्मोपासकान् परं गमयतीति । तत्र कार्य ब्रह्मोपासकस्य कार्यब्रह्मप्रदे-रामर्चिरादिकोगण प्रापयतीति दर्शयितुमुपक्रमते "अर्चिरादेरध्वन" इत्यादि अर्चिरादि मार्गेण ब्रह्मविदां गमनं तथाऽर्चिरादीनां स्वरूपं च विचारितम् तदनन्तरं संशयो जायते योऽयंमचिरादिगण स किं कार्यब्रह्मो-पासकस्य कार्यं ब्रह्मगमयति अथवा परब्रह्मोपासकस्य परमेव ब्रह्म गमयतीति । तत्र बादरिराचार्यः एवं प्रतिपादयति यत् कार्य ब्रह्मो-पासकान् कार्य ब्रह्मैवावगमयति यतः कार्यस्य ब्रह्मणः परिच्छिन्न त्वात् परिच्छिन्नदेशविशेषे गमनं संभवति परब्रह्मणस्तु व्याप-कत्वेन तत्र गमना संभवात् व्यापकस्य सर्वत्रावस्थितत्वेन तद्गतेरसंभ-वादिति पूर्वपक्षसूत्रम् ।।६।।

सारबोधिनी—जो ब्रह्मज्ञानी हैं उनका गमन अर्चिरादि मार्ग से होता है ऐसा कहा गया । तथा अर्चिरादि मार्ग का स्वरूप का भी निरूपण किया गया । अब इसमें संशय होता है कि जो यह अर्चिरादिक गण है वह कार्य ब्रह्म का उपासक जो हैं उनको कार्य ब्रह्म तक पहुँचाता है । अथव परब्रह्म का उपासना करनेवाले को परब्रह्म तक पहुँचाता है । तथा ब्रह्म रूप से प्रत्य-गात्मा का उपासना करनेवाले को ब्रह्मगमन करता है । इसमें बादरी आचार्य कहते है कि कार्य ब्रह्मके उपासन करनेवाले को कार्य ब्रह्म तक पहुँचाता है । क्योंकि परिच्छिन्न ब्रह्म के उपासकको देश विशेषमें गमन हो सकता है । परन्तु सर्वगत सर्वात्मभूत परब्रह्म के प्राप्ति के लिए गमन तो सर्वथा अनुप-पन्न है ।।६।।

सामीप्यात्तु तद्व्यपदेशः ।४।३।८।

"स एनान् ब्रह्म गमयति" [छा०४।१५।६] इति हिरण्यगर्भस्य प्रथमकार्यत्वेन सामीप्याद् ब्रह्मपदेन व्यपदेशः ॥८॥

विवरणम्-'पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयतीति' श्रुतिरपि कार्यब्रह्मणः प्राप्तिमेव तदुपासकस्य प्रतिपादयतीति तदेवोपपादयितुमुपक्रमते पुरुषोऽमानवः" इत्यादि। अमानवः कश्चित् पुरुषः समभ्येत्य ब्रह्मोपासकान् ब्रह्मलोकान् गमयति तथा "प्रजापतेः सभांवेश्म" इत्यादि स्थलेषु कार्यहिरण्यगर्भ ब्रह्मण एव प्राप्यत्वं प्रदर्शितम्। अतः कार्य ब्रह्मोपासकान् एवार्चिरादिगणः प्रापयति नतु परम पुरुषमिति॥७॥

विवरणम्-ननु यदि हिरण्यगर्भ एव प्राप्यतया श्रुतस्तदा तस्य ब्रह्मत्वाभावात् कथं ब्रह्मपदेन तस्य हिरण्यस्य निर्देशः कृतः? नहि तत् पदं मुख्य वृत्या हिरण्यगर्भं बोधयति किन्तु परम पुरुषमेवाभिधत्ते इत्याशङ्कायानिरासायाह "सामीप्यात्तु" इत्यादि परमपुरुषो हि प्रथमतो हिरण्य-

सारबोधिनी-"विद्युत लोक में एक अमानव पुरुष उपासक पुरुष के समीप में आकर के उस उपासक को ब्रह्मलोक में पहुँचाता है।" इस श्रुति में ब्रह्मलोक पदोत्तर बहुवचन का प्रयोग समझाता है कि ब्रह्मलोक अनेक है तो परब्रह्म का लोक तो अनेक नहीं है। इससे परिशेषात् सिद्ध होता है कि कार्य ब्रह्म का लोक ही ब्रह्मलोक है। क्योंकि कार्य ब्रह्म हिरण्य गर्भ ब्रह्माण्ड के भेद से अनेक हैं। एवम् प्रजायतेः समांवेश्म" इत्यादि श्रुति भी बतलाती है कि कार्य जो हिरण्यगर्भ वही प्राप्य है तो तादृश हिरण्यगर्भ को प्राप्यत्व रूप से कथन किया है। इससे सिद्ध होता है कि कार्यब्रह्म की जो उपासना करता हैं उस उपासक को अर्चिरादिक गण कार्य ब्रह्मलोक में ले जाते है।७।

सारबोधिनी—यदि हिरण्यगर्भ प्राप्य है उपासक से तब उस हिरण्यगर्भ में ब्रह्मशब्द का व्यपदेश किस तरह होगा? क्योंकि हिरण्य गर्भ तो ब्रह्म नहीं है ब्रह्म तो परम पुरुष ही है। अतः ब्रह्मनिर्देश अन्यथानुपपन्न होकर के मुख्य

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ।४।३।९।

नन्वेवं कार्यब्रह्मलोकगतानां पुनरावृत्तिः "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनः !" [गी० ८।१६] इत्यादि शास्त्रेणोच्यते । कथं

गर्भमेवोत्पादयति ततश्चतद्वारान्याञ्जनयति, इति प्रथमतत्वेन तस्य ब्र[illegible] ब्रमादं यथा कथञ्चितनपि बोधयतीत्याशयेन सूत्र व्याख्यानायोपक्रमते "स एनानित्यादि" स अमानवः पुरुष एनान् स मुपासकान् ब्रह्मलोकं गमयतीत्यत्र ब्रह्मपदम् प्रथम कार्यत्वेन हिरण्यगर्भ बोधयतीति कुतः मुख्य ब्रह्मणोऽतिसमीपस्थत्वात् हिरण्यगर्भस्यप्रथम-कार्यत्वादिप्रथमजत्वेन परम पुरुषस्याति समीपस्थत्वेन ब्रह्मपदेन हिर-ण्यगर्भस्यापि ग्रहणं भवतीत्यतो हिरण्यगर्भस्यापि ब्रह्मपदेन व्यपदेशोजा-यते इति ॥८॥

विवरणम्—ननु ये पुण्यकर्मबलात् कार्यं हिरण्यगर्भलोकं गच्छति तस्य "आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन !" इत्यादि शास्त्रेण तस्य पुनरावृत्तिः श्रूयते तदा कथमुच्यते यत् हिरण्यगर्भलोकमर्चिरादि ब्रह्म में ही प्राप्यत्व को समजाता है। इस शंका के समाधान में कहते हैं, "सामीप्यात्तु" इत्यादि । हिरण्यगर्भ परम पुरुष का प्रथम कार्य है तो कार्यत्व रूप से परमब्रह्म के अति समीपस्थ होने से ब्रह्मपद से हिरण्यगर्भ का भी बोध तथा व्यपदेश अर्थात् शब्द व्यवहार भी होता है । इस अभिप्राय को लेकरके सूत्र का व्याख्यान करने के लिए उपक्रम करते हैं "स एनानित्यादि" हिरण्य-गर्भ परमपुरुष का प्रथम कार्य है इसलिए परमपुरुष का प्राथमिक कार्य होने से तत्समीपस्थ होने से हिरण्यगर्भ में भी ब्रह्मपद का व्यपदेश अर्थात् व्यवहार होता है । तादृश व्यवहार में कोई भी क्षति नहीं है ॥८॥

सारबोधनी—जो उपासक उपासना के फल से हिरण्यगर्भ लोक में जाते हैं उनका तो पुनरावर्तन सुना जाता है "आब्रह्मभुवनाल्लोकाः" इत्यादि अर्थात् ब्रह्मलोक पर्यन्त लोकों का पुनरावर्तन होता है । तब तदन्त वर्त्तियों

तर्हि तयोर्ध्वमायन्नमृतत्वमेति" [का० २।६।१६] इत्यादि श्रुतिष्वमृतत्वाभिधानं सङ्गच्छेतेत्याह—कार्यब्रह्मलोकस्य विनाशे तल्लोकाध्यक्षेण सह प्राप्तपूर्णविद्योऽतः परब्रह्मधाम गच्छति । "ते ब्रह्मलोके तु परान्तकाले परामृताः परिमुच्यन्ति सर्वे" [मु० ३।२।६] इत्यभिधानात् ॥९॥

मार्गेण गतस्यामृतत्वमिति तद् विरुद्धमेव भवतीति शङ्कायाः निरासायोच्यते "कार्यात्यये" इत्यादि यो हि उपासनाबलात्कार्यब्रह्मलोकं गच्छति स तावत्कालं यावत्पर्यन्तं कार्यहिरण्यगर्भस्याधिकार समाप्तिर्न भवति तत्र प्रतीक्षते अधिकारसमाप्तौ तत्रैवोत्पन्न तत्त्वज्ञान तल्लोकाध्यक्षेण सहैव परमपदं पुनरावृत्तिरहितं प्राप्नोति "ब्रह्मणा सहते सर्वे संप्राप्ते प्रतिसंचरोपरस्यान्ते कृतात्मानः प्रविशन्ति परंपदमिति श्रवणात् । ततश्च तादृश क्रममोक्षं प्राप्त उपासकः पुनरावृत्ति वर्जितममृतत्वमेतीत्याशयेनोपक्रमते "नन्वेवं कार्यब्रह्मत्यादि" ननु पूर्वकथितं प्रकारेण ये कार्यब्रह्मलोके गतास्तेषां कथं मोक्षः यतः कार्यब्रह्मलोकगतानाम् "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन !" इत्यादिना पुनरावृत्ति श्रवणात् । तत्कथमुच्यते यत् उपासनया अर्चिरादिमार्गेण कार्य ब्रह्मलोकं प्राप्यते मुक्ता भवन्तीति शङ्कायामाह "कार्यात्यये" इत्यादि सूत्रम् । तत्र कार्यस्य हिरण्यगर्भस्य अत्ययेऽधिकार समाप्ति लक्षणस्यात्ययेऽवसाने सति तदध्यक्षेण तल्लोकाध्यक्षेण कार्यब्रह्मणा सहैव ते उपासका अपि परमपदं प्राप्नु-

का पुनरावर्तन तो स्वाभाविक है । इस स्थिति में कार्य ब्रह्म लोकगत उपासक को अमृतत्व की प्राप्ति होती है यह कथन तो सर्वथा अनुपयोगी होता है । इस शङ्का का समाधान सूत्रकार करते हैं 'कार्यात्यये" इत्यादि । कार्यब्रह्मलोक का अत्यय विनाश होने पर उस लोक का अध्यक्ष जो हिरण्यगर्भ उसके साथ हिरण्यगर्भ द्वारा प्राप्त है परिपूर्ण ब्रह्म विद्या जिनको ऐसे जो उपासक गण हैं वे हिरण्यगर्भ के साथ ही परमधाम का प्राप्ति लक्षण मोक्ष प्राप्त कर जाते हैं । वे उपासक लोग परान्तकाल में अर्थात् पर जो हिरण्यगर्भ उनका

स्मृतेश्च ।४।३।१०।

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति पर पदम् । इति स्मृतेश्च ॥१०॥

वन्ति यथा प्रथमतः समुत्पन्न विद्यः कार्य हिरण्यगर्भो मुक्तो भवति तथा तत्समये कार्यब्रह्मणः सकाशात्प्राप्तविद्या उपासका अपि परमपदं प्राप्नुवन्ति न तेषां पुनरावृत्तिर्भवति किन्तु निरतिशय पुनरावृत्तिलक्षण-रहितं परमधामं प्रविशन्ति । "ते ब्रह्मलोके तुपरान्त काले परामृताः परि मुच्यन्ति सर्वे" इत्यादि शास्त्रेण कार्य हिरण्यगर्भ लोकप्राप्तानामपि पुन-रावृत्ति विवर्जित परमधामप्राप्तेरभिधनादिति ॥९॥

विवरणम्—पूर्वसूत्र कथितोऽर्थः पुराणादि स्मृतिबलेनापि व्यव-स्थापितो भवतीति दर्शयितुमुपक्रमते "ब्रह्मणा सह ते सर्वे" प्रतिसञ्चरे प्रलये प्राप्त सति ते तल्लोकवासिनो ये उपासकास्ते सर्वेऽपि कार्यब्रह्मणा सहैव परस्य कार्यब्रह्मणोऽन्तेऽवसाने कृतात्मानः ब्रह्मोपदेशात् प्राप्तब्रह्म-विद्यावन्तः परंपदं मोक्षं प्रविशन्ति परमधामात्मकं मोक्षं प्राप्नुवन्तीति स्मृति प्रामाण्यादपि पूर्वोक्तोऽर्थः प्रसाधितो भवतीति भावः ॥१०॥

अधिकार समाप्ति लक्षण अन्त काल में परमअमृत स्वरूप होकरके मुक्त हो जाते हैं अर्थात् सर्वथा संसार बन्धन से मुक्त हो जाते हैं । "उनका आवा-गमन नहीं होता है" इत्यादि शास्त्र से अर्चिरादि मार्ग द्वारा ब्रह्मलोकगत उपासक मुक्त हो जाते हैं" ऐसा कहा गया है । अतः अन्ततः तल्लोकगत जीव मुक्त होते है इसमें दो मत नहीं ॥९॥

सारबोधिनी-पूर्वसूत्र प्रतिपादित अर्थ का स्मृत्यादि प्रमाण से प्रामाणित करने के लिए उपक्रम करते हैं "ब्रह्मणा सहेत्यादि" प्रतिसंचरकार्य हिरण्यगर्भ का अवसान लक्षण प्रलय प्राप्त होने पर वे सब उपासक लोग कार्य हिरण्य-गर्भ के साथ-साथ ब्रह्म द्वारा प्राप्त विद्या होकर के परम पद में प्रविष्ट होते हैं अर्थात मोक्ष को प्राप्त कर जाते हैं ।': इत्यादि स्मृतियों से सिद्ध होता

परं जैमिनिर्मुख्यत्वात् ।४।३।११।

"स एनान् ब्रह्म गमयति" इत्यादिषु ब्रह्मशब्दस्य मुख्यत्वात् परमेव ब्रह्म गमयति इति जैमिनिराचार्यों मन्यते । ब्रह्मलोकशब्दः कर्मधारयसमासबलेन ब्रह्माभिन्नलोकपरः । किञ्च ब्रह्मणोऽपि श्रुतिस्मृतिप्रसिद्धधामास्त्येव तत्रैवार्चिरादिगणो गमयति ॥११॥

विवरणम्--ब्रह्मलोक इत्यत्र ब्रह्मणोलोको ब्रह्मलोक इति न षष्ठी तत्पुरुषः किन्तु नीलोत्पलवत् कर्मधारय एव तथा च ब्रह्मपदेन मुख्यस्यैव ब्रह्मणो ग्रहणम् तथा च ब्रह्मात्मकलोक एव ब्रह्मलोकस्तत्र प्रथमोपस्थितत्वात्परमेव ब्रह्मपदेन गृह्यते नतु कार्यब्रह्मणो ग्रहणं येन पूर्वोक्तापत्तिरुदोषादिति क्रमेण ब्रह्मपदेन मुख्यस्यैव ग्रहणं भवतीति जैमिनिराचार्यो मन्यते इति दर्शयितुं धक्रमते "स एनानित्यादि" स अमानवः पुरुष एनानुपासकान् ब्रह्मगमयति इत्यादि श्रुतिषु श्रूयमाणो ब्रह्मशब्दो मुख्यमेव ब्रह्मावगमयति एवं हि जैमिन्याचार्यस्य मतमिति । न च ब्रह्मलोक इत्यत्र षष्ठीतत्पुरुष समासेन ब्रह्म सम्बन्धीलोकप्रसिद्ध इति कथं तद् ग्रहणमिति वाच्यम् नीलमुत्पलमित्यत्र कर्मधारये यथा नीलाभि-

है कि कार्य हिरण्यगर्भ लोक को विनाशी होने पर भी तादृश लोकगत जो उपासक वे नित्यनिरतिशय ब्रह्मधाम को जो कि पुनरावृत्ति रहित है प्राप्त करते हैं ॥१०॥

सारबोधिनी--"स एनानित्यादि वह अर्चिरादि आतिवाहिक गण इस उपासक को ब्रह्मलोक में प्राप्त करता है ।" इत्यादि श्रुति में श्रूयमाण जो ब्रह्मशब्द है वह कार्य हिरण्यगर्भ का बोधक नहीं है । किन्तु मुख्य ब्रह्म का ही बोधक है । और ब्रह्मलोक में ही उपासक को ले जाता है ऐसा जैमिनि आचार्य का मत है । नहीं कहो कि परब्रह्म तो व्यापक है तो उसका तो लोक अप्रसिद्ध है ऐसा मत कहना क्योंकि ब्रह्मलोक में षष्ठी तत्पुरुष

दर्शनाच्च ।४।३।१२।

"एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" [छा० ८।३।४] इत्यर्चिरादिना परप्राप्तेर्दर्शनाच्च ॥१२॥

न्नमुत्पलम् तथैव प्रकृते कर्मधारयसमासेन ब्रह्माभिन्नलोकस्यैव ग्रहणात् तस्यैव च प्रसिद्धत्वात् । अथवा मुख्यस्यापि ब्रह्मणो लोकः स्वेच्छा निर्मिताप्राकृतसाकेतनामकः श्रुतिस्मृतिपुरादिष्ववगत एव अतो न तस्य लोकोऽप्रसिद्धः । तस्मात् मुख्य ब्रह्मण एवात्र ग्रहणम् तादृश ब्रह्मात्मके ब्रह्मसम्बन्धिनि वा लोके अर्चिरादीको गण उपासकान् गमयतीति जैमिनेराचार्यस्य मतमिति ॥११॥

विवरणम्—न केवलं स्मृत्यादावर्चिरादि मार्गेण गतानां परब्रह्मप्राप्तिर्भवति किन्तु श्रुतिप्रमाणेनापि परमपुरुषप्राप्तिः सिद्ध्यत्युपासकानामिति दर्शयति दर्शनादिति सूत्रेण । एषः सम्प्रसादो जीवः परिदृश्यमानकलेवरात् समुत्थाय निष्क्रम्यार्चिरादि मार्गेण परंज्योतिः परमब्रह्मवा

समास नहीं है । जिससे कि व्यापक का लोक अप्रसिद्ध हो किन्तु "नीलोत्पलम्" के जैसे कर्मधारय समास करने पर नीलाभिन्न उत्पलवत् प्रकृत में भी ब्रह्माभिन्न लोक हो अर्थ है । इसलिए अप्रसिद्धि का संभव नहीं है । अथवा श्रुतिस्मृति में ब्रह्म का भी अप्राकृत लोकोत्तर साकेतधाम प्रसिद्ध है उसी अप्राकृत ब्रह्मलोक में अर्चिरादिगण उपासक को ले जाते हैं ॥११॥

सारबोधिनी—सुषुम्नानाडी के द्वारा शरीर से निर्गत जो उपासक वह अर्चिरादिमार्ग के द्वारा पर ब्रह्म को प्राप्त करता है । इस बात को श्रुति स्वयमेव प्रतिपादन करती है "एष सम्प्रसाद" इत्यादि । यह सम्प्रसाद जीव परिदृश्यमान पाँच भौतिक भोगाधिष्ठान कलेवर से उत्क्रमित होकर के अर्चिरादि द्वारा परं ज्योति परम ब्रह्म को प्राप्त करके स्वकीय रूप से अर्थात् आविर्भूत गुणाष्टक से अभिनिष्पन्न होता है । अर्थात् परमधाम साकेत को

न च कार्ये प्रत्यभिसन्धिः ।४।३।१३।

यत्तूक्तं "प्रजापतेः समां वेश्म प्रपद्ये" [छा० ८।१४।१] इति कार्यं ब्रह्मणः प्राप्तेः सङ्कल्प इति । तदपि न कार्ये हिरण्यगर्भे प्रत्यभिसन्धिः किन्तु वाक्यशेषे "यशोऽहं भवामि ब्राह्मणानाम्" [छा० ८।१४।१] इति सर्वात्मभावाभिसन्धानात् परब्रह्मण्येव सोऽभिसन्धिरिति परं ब्रह्मोपासीनान्नयतीति जैमिनिः ॥१३॥

संपद्य सम्प्राप्य स्वकीयरूपेण: आविर्भूतगुणाष्टकेनाभिनिष्पद्यमानो भवतीति कथयन्ति इति देवयानपथा प्रस्थितानां परमपुरुषप्राप्तिः सिद्ध्यतीति ॥१२॥

विवरणम्—"प्रजापतेः समां वेश्म प्रपद्ये" इत्यादि श्रुत्या अर्चिरादि मार्गेण गत उपासक कार्य ब्रह्मलोकमेव गच्छति तत्रैवार्चिरादिको गणस्तं नयति न तु परमब्रह्मधाम गमयतीति यदुक्तं तन्मतं निराकर्तुं प्रक्रमते "न च कार्ये" इत्यादि योऽयं कार्यब्रह्मणि प्रत्यभिसन्धिः प्रदर्शितः सोऽपि परस्मिन्नेव ज्ञातव्यः कुतः तस्याभिसन्धानकर्तुरुपासकस्य सर्वा-

प्राप्त करके संसार बन्धन से विमुक्त हो जाता है। जन्ममरण प्रबन्धशील जगत् से निवृत्त होकर के पुनरावर्तन रहित परमधाम नित्य सुखात्मक मोक्ष को प्राप्त करता है ॥१२॥

सारबोधिनी—"प्रजापतेः समां वेश्म प्रपद्ये" [प्रजापति कार्य हिरण्यगर्भ-उसकी समाको प्राप्त करूँ"] इत्यादि श्रुति से यह सिद्ध होता है कि उपासक को कार्य ब्रह्म प्राप्ति विषयक हो संकल्प है इसलिए अर्चिरादिक गण उपासक को कार्य हिरण्यगर्भ लोक में ले जाता है ऐसा जो कहा था ऐसा कहना ठीक नहीं है। क्योंकि कार्य जो हिरण्यगर्भ है तत्प्राप्ति विषयक प्रत्यभिसन्धि सङ्कल्प उपासक का नहीं है क्योंकि "यशोऽहं भवामि ब्राह्मणानाम्" इस वाक्य शेष में उपासक का सर्वात्म भाव का हो सङ्कल्प है। उपासक को ऐसा ज्ञात होता है। इसलिए उपासक का जो सङ्कल्प है वह परम

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषा-त्तत्क्रतुश्च ॥ ।४ ।३।१४।

भगवान् बादरायणोऽत्र सिद्धान्तयति । प्रतीकालम्बनव्यतिरिक्ता नर्चिरादिगणो नयतीति । कार्यमुपासीनानिति पक्षे "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय" इत्यस्याः श्रुतेर्विरोधः परमेवोपासीनानिति पक्षे "तद्य इत्थं विदुर्येचेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ति" इति श्रुतिर्विरुध्यते। एवमुभयथा च दोषात् परमुपासीनान् केवलमात्मानं ब्रह्मात्मकत्वेनोपासीनाञ्च नयतीत्येव नियमः । "यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" [छा० ३।१४।१] इति तत्क्रतुन्यायात् यथोपास्ते तथैःप्नोतीति नियमात् ॥१४॥

त्मभावस्यैवाभिसन्धानमिति "यशोऽहं भवामि ब्राह्मणा नामिति वाक्यशेषेणावगमात् । तस्मादर्चिरादिको गणो ब्रह्मोपासकान् परमब्रह्मलोकं नयतीति जैमिनेराचार्यस्य मतम् ॥१३॥

विवरणम्—एतावता प्रकरणेन जैमिनेर्मतं प्रदर्श्य स्वमतेन सिद्धान्तं दर्शयितुं भगवतो बादरायणस्य मतं दर्शयति सूत्र व्याख्यानाय "भगवान् बादरायणः" इत्यादि ये च प्रतीकालंबनव्यतिरिक्तोपासकास्तानेवार्चिरादिकगणो नयतीति भगवतो बादरायणस्य मतमिति। नतु प्रतीकालंबनान् कार्यं ब्रह्मोपासकानेवार्चिरादि गणो नयतीति नियमः । किन्तु ये परमपुरुषमुपासते प्रकृतिवियुक्तस्वरूपं प्रत्यगात्मानं ब्रह्मरूपतया समुपासते एतादृशानेव प्रापयतीत्येव नियमः । यतः पूर्वोक्तनियमद्वयेऽपि ब्रह्म प्राप्ति विषयक ही है न तु कार्य हिरण्यगर्भ प्राप्ति विषयक तस्मात् परब्रह्म का उपासक व्यक्ति को अर्चिरादिक गण परब्रह्म में प्राप्त करता है न तु कार्य ब्रह्मलोक में ले जाता है । ऐसा जैमिनी आचार्य का मत है ॥१३॥

सारबोधिनी—इस विषय में भगवान् बादरायण सिद्धान्त कहते हैं प्रतीकालंबन व्यतिरिक्त उपासक को अर्चिरादिगण ब्रह्म प्राप्ति कराते है कार्य ब्रह्म

विशेषञ्च दर्शयति ।४।३।१५।

"यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति" (छा० ७।१।५) इत्यादि श्रुतिर्नामादि प्राणपर्यन्त प्रतीकोपासकानां गतिमनपेक्ष्य परिमितमेव फलविशेषं दर्शयति ततः परब्रह्म भगवच्छ्रीरामोपासकान् प्रकृतिवियुक्तब्रह्मात्मकत्वेन स्वात्मोपासकाँश्चार्चिरादिरतिवाहिकगणो नयतीति सिद्धम् । तथैवाहुः सिद्धान्तसार्वभौमा जगद्गुरु श्रीपूर्णानन्दाचार्याः स्वप्रसादिते श्रीबोधायनमतादर्शे—

"अनादिकालतो बद्धा जीवा दैवाख्यकर्मणा ।
अत्र कर्माणि कुर्वन्ति भुञ्जन्ति तत्फलानि च ॥९०६॥

दोषदर्शनात् । तथाहि कार्यब्रह्मोपासकान् नयतीति पक्षे "अस्माच्छरीरात्समुत्थायेत्यादि श्रुतिविरोधो भवति परमेव ब्रह्मोपासीनान् नयतीति द्वितीयपक्षे पञ्चाग्नि विद्योपासकानामप्यर्चिरादिना गतिर्भवतीति प्रतिपादक "तद्य इत्थं विदुरित्यादि" श्रुतिविरोधः स्यात् तस्मात् प्रतीकालंबनव्यतिरिक्तानेव नयतीत्ययमेव नियमः साधीयान् । तं यथा यथोपासते, इत्यादि तत्क्रतुन्यायेनैव व्यवस्थेति । एतदेव सर्वं विभज्य सूत्रं दर्शयति "कार्यमुपासीनानीति । पक्षद्वयमपि दर्शयति" "तद्य इत्थं विदुरित्यादि" अन्यत्सर्वं सुगमम् ॥१४॥

के उपासक को अर्चिरादिगण प्रापक है इस पक्ष में "यह सम्प्रसाद जीव इस शरीर से उत्क्रान्त होकर के" इस श्रुति का विरोध होता है । परमब्रह्म के उपासक को प्राप्त करता है इस पक्ष में "तद्य इत्थं विदुः" इत्यादि श्रुति का विरोध होता है । इस तरह दोनों पक्षों में दोष होने से परम पुरुष के उपासना करनेवाले को और केवल आत्मा को ब्रह्मरूप से उपासना करनेवाले को अर्चिरादिक गण ले जाते हैं यही नियम है । "यथा क्रतुः" इस तत्क्रतुन्याय से जो जिस प्रकार उपासना करता है वह तादृश फल को प्राप्त करता है यही अनुगत नियम है ॥१४॥

बद्धाश्च गुणमय्या ते दैव्या श्रीराममायया ।
ज्ञानप्रकाशसङ्कोचं प्राप्ताश्च प्राकृता नराः ॥९०७॥
वदन्ति मलिनाः स्वांश्च संसारिणोऽज्ञता युतान् ।
नानायोनिषु सञ्जाता देहात्मभ्रमकारिणः ॥९०८॥
रामाधीनत्वशून्यस्त्र स्वातन्त्र्यमतिशालिनः ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवानिति ॥९०९॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्ये इत्यज्ञानविमोहिताः ॥९१०॥
स्वकर्मणः फलस्याथ स्वतन्त्रं च फलप्रदम् ।
रामतुल्यं हि मन्यन्ते रामभिन्नं सुरासुरम् ॥९११॥
तापत्रयेण सन्तप्ता अनाथा दुःखिनस्ततः
रामानुकम्पया जाताः सत्सङ्गरुचयस्तथा ॥९१२॥
सद्गुरुञ्च प्रपन्ना ये राममन्त्रेण दीक्षिताः ।
स्मरन्तो ब्रह्मरामं ते देहं व्यक्त्वार्चिरादिना ॥९१३॥
रामधाम्नि गताश्चाथ श्रीरामगुणसंयुताः ।
नित्यानन्तसुखं प्राप्ता दुःखमूलविवर्जिताः ९१४॥
रामानुभवकर्तारो भोगसाम्यं गतास्तथा ।
ज्ञानसङ्कोच शून्याश्च जगद्व्यापारवर्जिताः ॥९१५॥
सर्वलोकसुसञ्चारा रामकैङ्कर्य कारकाः ।
तेषां मुक्तिमवाप्तानां कर्मबन्धः पुनर्नहि ।९१६॥"
इत्यादि रूपेण ॥१५॥

इति श्रीरघुवरीयवृत्तौ कार्याधिकरणम् ॥५॥

इतिश्रीमद्भगवद्रामानन्दान्वय प्रतिष्ठित श्रीमदनुभवानन्दाचार्य द्वारकेण ब्रह्मविरस्वामि जगद्गुरु श्रीरामानन्दाचार्यरघुवराचार्य विरचितायां श्रीरघुवरीय वृत्तौ चतुर्थाध्यायस्य तृतीयः पादः ।

॥ श्रीसीतारामार्पणमस्तु ॥

विवरणम्—नामादि प्राणान्त प्रतीकोपासकानां गतिविशेषप्रदर्शनाय प्राह "यावन्नाम्नो गत" मित्यादि। अन्य स्वपूर्वाचार्यसम्मतिं दर्शयति 'तथैवाहु' रिति शिष्टं स्पष्टम् ॥१५॥

इति कार्याधिकरणम् ॥५॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यप्रधानपीठाचार्यजगद्गुरु श्रीरामानन्दाचार्यं रामप्रपन्नाचार्ययोगीन्द्रकृतौ श्रीरघुवरीयवृत्तिविवरणे चतुर्थाध्यायस्यतृतीयः पांदः

॥ श्रीसीतारामार्पणमस्तु ॥

सारबोधिनी-"यावन्नाम्ना गतम्" इत्यादि श्रुति नाम से लेकर प्राणपर्यन्त प्रतीकोपासनका विशेष फलवतलाती है। इसलिये परब्रह्म भगवान् श्रीरामचन्द्रजी के अनन्यनिष्ठ होकर उपासना करने वाले जीव को अर्चिरादि मार्ग से अतिवाहिक गण दिव्य श्रीसाकेतधाम में ले जाते हैं यह सिद्ध होता हैं। श्रीसाकेतगामी जीव को भगवत्सेवक कैसे श्रीसाकेतधाम में ले जाते हैं उसका क्या स्वरूप है इस विषय का विशेष ज्ञान के लिये जगद्गुरु श्रीरामेश्वरानन्दाचार्य कृत 'श्रीरामप्राप्ति पद्धतिः' तथा उसकी टीका तथा आनन्दभाष्य के चतुर्थाध्याय तृतीय पाद का मेरा हिन्दी विवरण और पण्डित सम्राट् स्वामी श्रीवैष्णवाचार्यजी का 'अर्चिरादिप्रकाश' में देखें ॥१५॥

इति कार्याधिकरणम्

स्वामी रामेश्वरानन्दाचार्य कृत सारबोधिनी में चतुर्थाध्याय
का तृतीय पाद पूर्ण हुआ।

॥ श्री हनुमते नमः ॥

श्रियः श्रियै नमः

॥ अथ चतुर्थाध्यायस्य चतुर्थः पादः ॥

सम्पद्याविर्भावाधिकरणम् ॥१॥

सम्पद्याविर्भावः स्वेनशब्दात् ।४।४।१।

"एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" [छा० ८।१२।२।] अत्रापूर्वरूपेण सम्बन्ध उतस्वाभाविकस्यैव रूपस्याविर्भाव इति संशयः । कर्म साध्यदेवादिरूपवद्विद्यासाध्येनापूर्वेण रूपेण सम्बन्धः "रसं ह्येवायं लब्ध्वाऽनन्दी भवति"

विवरणम्—गतपादेन ब्रह्मोपासकानामर्चिरादिमार्गेण पुनरावृत्ति रहितं गमनं भवतीति कथितं तथा तेन गमनेन ब्रह्म प्राप्तिर्भवतीति प्रतिपाद्य मुक्तस्य पुरुषस्य कीदृशमैश्वर्यं भवतीति निर्णेतुमयमुपक्रमः क्रियते। तत्रपरं ज्योतिरूपसंपद्याभिनिष्पद्यते इति विषयवाक्यम्। तत्र ब्रह्मनिष्पन्नस्य जीवस्य कर्मसाध्यदेवरूपादि निष्पत्तिवत् विद्या साध्य केनापि रूपेण सम्बन्धो जायते अथवा स्वाभाविकरूपस्य ब्रह्मसंपत्याऽविर्भावो जायते। तत्र कर्मसाध्यदेवादिरूपप्राप्तिवत् विद्यासाध्यरूपेण सम्बन्ध एवेति पूर्वपक्षं निराकर्तुमुपक्रमते 'एवमेवैष" इत्यादि। एव

सारबोधिनी—जो ब्रह्मज्ञानी है उनका अर्चिरादि मार्ग से गमन पुनरावृत्ति रहित होता है तथा उनको ब्रह्म की प्राप्ति होती है इस बात का प्रतिपादन करके मुक्तजीवों को जो ऐश्वर्य प्राप्त होता है उसका निर्णय करने के लिए उपक्रम करते हैं "एवमेवैष" इत्यादि "इस प्रकार से यह संप्रसादजीव इस प्रत्यक्ष शरीर कलेवर से उत्क्रान्त होकर के परमज्योतिः स्वरूप पर ब्रह्म-को उपसम्पन्न होकर के स्वकीय रूप से अभिनिष्पन्न होता है" यहाँ परम ज्योति में अभिनिष्पन्न जीव को कर्म साध्य देवादि स्वरूप प्राप्ति के समान अभिनिष्पत्ति होती है ? अथवा ब्रह्म विद्या से साध्य किसी अपूर्व से सम्बन्ध होता है ऐसा संशय होता है। उसमें कर्मसाध्यदेवादि रूप प्राप्ति के समान

इत्यादि श्रुतेः परंज्योतिरूपसम्पन्नस्यानन्दित्वमप्यत्र श्रूयते । अत एवाभिनिष्पद्यत इत्यपि सङ्गच्छते । अतोऽपूर्वेण सम्बन्ध इति पूर्वपक्षः । अत्राभिधीयते–'स्वेन रूपेण'' इति रूपविशेषणतयाभिधानात् कर्मरूपाविद्यातिरोहितस्य स्वाभाविकजीवरूपस्य परंज्योतिरूपसम्पद्याविर्भावोऽत्राभिधीयते ॥१॥

मनेन प्रकारेण एष सम्प्रसादो जीव. एतस्मात् देहात्समुत्थाय समुत्क्रम्य परमपुरुषं प्राप्य स्वकीयेन स्वाभाविकरूपेणाभिनिष्पन्नो भवतीति श्रुति वाक्यं विषयः । तत्र किं कर्मसाध्यदेवादिस्वरूपनिष्पत्तिजीवस्यविद्यासाध्यरूपेण सम्बन्धो जायते अथवा विद्यावलेन स्वस्वरूपस्याविर्भावो भवतीति । तत्र कर्मसाध्यदेवादि रूपप्राप्तिवदिहापि विद्यासाध्यापूर्वात्मकरूपेण सम्बन्ध एव जीवस्य भवति न तु स्वस्वरूपाविर्भावो भाति अतएव रसं लब्ध्वाऽनन्दोभवतीति श्रुत्या परमपुरुषसंपन्नस्यानन्दप्राप्तिर्भवतीति श्रूयते. अतोविद्यासाध्येन केनचिदपूर्वेण सम्बन्ध एव भवति न तु स्वस्वरूपस्याविर्भाव इति पूर्वपक्षः ॥

अत्राभिधीयते संपद्याविर्भाव इति । कर्मफलस्यानित्यत्वेननात्र स दृष्टान्त उपयुज्यते किन्तु प्रकृते उपासनाबलेन कर्मात्मकाविद्ययातिरोहित रूपस्य जीवस्य तादृशतिरोधान निवृत्यास्वस्वरूपस्याविर्भाव एव

विद्या साध्य किसी अपूर्व से सम्बन्ध होता है, ''यह रस को प्राप्त करके आनन्दित होता है'' इत्यादि श्रुति से परम ज्योति में उपसंपन्न जीव को आनन्दित्व सुना गया है। अत एव ''अभिनिष्पद्यते'' यह कथन भी संगत होता है। इसलिए विद्यावल से किसी अपूर्व के साथ ही जीव को सम्बन्ध होता है ऐसा पूर्वपक्ष होता है। इसके उत्तर में कहते है ''संपद्याविर्भाव इति'' ब्रह्म में संपन्न होने के बाद जीव का स्वरूप से आविर्भाव होता है। क्योंकि 'स्वेन शब्दात्' यहाँ 'स्वेन रूपेण' इत्याकारक विशेषण रूपसे स्वशब्द से कथन किया गया है। इसलिए कर्मलक्षण अविद्या से तिरोहित जो जीव का स्वकीय

मुक्तः प्रतिज्ञानात् ।४।४।२।

"एतन्त्वेवते भूयोऽनुव्याख्यास्यामि" [छा०८।९।३] इति जागरिताद्यवस्थातिरोधानमुक्तस्यैव वक्तव्यत्वेन प्रत्यभिज्ञानात्स्वाभाविक रूपस्यैवाविर्भाव इति निश्चीयते ॥२॥

जायते न तु अपूर्वाकारस्योत्पत्तिर्भवतीति । कुतः ? एवम् तत्राह स्वेन-शब्दात् "स्वेन रूपेणाभिनिष्पद्यते" इति रूपस्य विशेषणेन स्वेनेति कथनादागन्तुकरूपस्य व्यावृत्तिदर्शनात् । एतदेव दर्शयति अत्राभिधीयते स्वेन इत्यस्य रूपविशेषविशेषणतया कथनात् स्वाभाविकजीवरूपस्यै चाविर्भाव भवति. परसंपत्या न तु अपूर्वस्य लाभो भवति ॥१॥

विवरणम्—ननु यस्ययत्स्वरूपं तत्तस्य नित्यप्राप्तमेव यथा जलस्य शैत्यं यथा वा वन्हेरौष्ण्यम् तदाकः पूर्वावस्थात उत्तरावस्थाया विशेषः। येन "उपसंपद्यस्वेनरूपेणाभिनिष्पद्यते" इति वचनं सार्थकं भवेदित्याशङ्काया निरासाय प्रक्रमते "एतंत्वेव" इत्यादि ।

गुण है उसका परम ज्योति में संपत्ति के बाद आविर्भाव होता है इस बात का यहाँ कथन किया गया है । तस्मात् विद्या के बल से अविद्या रूप प्रति-बन्धक का तिरोधान पूर्वक स्वरूप का आविर्भाव होता है नतु अिसी अपूर्व का सम्बन्ध ॥१॥

सारबोधिनी—जिसका जो स्वरूप है वह तो नित्य प्राप्ति ही है यथा अग्नि का "औष्ण्य जलकाशैत्य" तो जीव की जो पूर्वावस्था है उसकी अपेक्षा से क्या विशेषता है । जो कि "परज्योति को उपसम्पन्न होकर के स्वस्वरूप से अभिनिष्पन्न होता है" इत्यादि वचन सार्थक होगा ? एतादृश पूर्व पक्षका निराकरण करते हुए सूत्र का व्याख्यान करने के लिए उपक्रम करते है "एत-न्त्वेवते" इत्यादि । [इस प्रकृत आत्मा का ही मैं तुमको पुनः कथन करूँगा"] इत्यादि श्रुति से जाग्रत्स्वप्न सुषुप्ति रूप जो अवस्थात्रय तद्रूप जो तिरोधान. तादृश तिरोधान रहित आत्मा का वक्तव्यता रूप से प्रत्यभिज्ञान होने से स्वा-

अयमाशयः "स्वेनरूपेणाभिनिष्पद्यते" इति वचनेन अविद्यात्मक कर्म सम्बन्धप्रयुक्तशरीरादिसर्वानर्थवियुक्तः स्वाभाविकरूपेण युक्तः समवस्थित इति कथ्यते। मुक्तेः पूर्वं जीवोजागराद्यवस्थयाकलुषितः संसारीचासीत् पूर्वावस्थायाम्। इदानीं तु कर्मलक्षणाविद्याकृतं यत् स्वरूपस्य तिरोधानं तादृशतिरोधाननिराकरणपूर्वकस्वकीयस्वरूपस्याविर्भावरूप एव विशेषः। अयमेव विशेषः स्वेन रूपेणाभिनिष्पद्यते इत्यस्यविषयः कुत एतत्! प्रतिज्ञानादिति एतदेवविवृणोति "एतन्त्वेवेत्यादि" एनं प्रकृतमात्मानं ते पुनरपि कथयामीति वाक्यं श्रौतं जीवस्य जागरिताद्यवस्थानलक्षणतिरोधानरहितस्यैव तदीय स्वाभाविकरूपस्य प्रतिपाद्यत्वेन प्रत्यभिज्ञानात् जीवस्य यत् स्वाभाविकस्वरूपम् तादृशस्यैव मोक्षावस्थायामाविर्भावो भवतीति निर्णीयतेऽतो भवत्येव पूर्वावस्थात उत्तरावस्थाया वैलक्षण्यम् गृहस्थतः परि-

भाविक जो अपहतपाप्मात्वादिक रूप है जीव का तादृश स्वाभाविक स्वरूप का ही ब्रह्म संपत्ति से आविर्भाव होता है। नतु इससे अतिरिक्त किसी रूपकी प्राप्ति होती है। ऐसा निश्चय किया जाता है। कहने का अभिप्राय तो यह है कि बद्ध तथा मुक्त जीव के स्वरूप अर्थात् विशेष्य अंश में कोई भी फेरफार नहीं होता है। किन्तु संसारावस्थ जीव में जो विशेषणांश है संसार उसका ब्रह्मविद्या से विनाश होता है। तथा प्राप्त भी जो स्वरूप जो कि तिरोहित था स्वकर्म बल से उसका तिरोधान निवृत्ति होने पर स्वगुणाष्टक आविर्भाव हो जाता है। तो शिखी विनष्ट इसके समान विशेषणांश मात्र का विनाश होता है। "नासतो विद्यते भावः" इसन्याय से यथा वा विस्मृत पदार्थ का पुनः प्राप्ति होने से प्राप्त ही होता है उसी तरह आत्मा का जो नित्य प्राप्त ही स्वरूप है वह अविद्या तिरोधान से आविर्भूत मात्र होता है पर समुत्पन्न नहीं क्योंकि सत्कार्यवाद में अभूतपूर्व नवीन की उत्पत्ति तथा विद्यमान का अभाव नहीं होता है। प्रकृत में विशेष विवरण अन्यत्र देखें ।।२।।

आत्मा प्रकरणात् ।४।४।३।

"य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकः" [छा०८।७।१] इत्यादिप्रकरणात्, अयमात्मापहतपाप्मात्वादिगुणक एव निश्चित कर्मरूपाविद्यया तु संसारदशायां तिरोहितस्वरूपतां गतः। एतद्विशुद्धस्वरूपस्यैव "एतन्त्वेव ते भूयोऽनुव्याख्यास्यामि" इति प्रतिज्ञानात् ॥३॥

इति श्रीरघुवरीयवृत्तौसम्पद्याविर्भावाधिकरणम् ॥१॥

व्राजकावस्थायाः। तत्र विशेष्यसमत्वेऽपि विशेषणस्यावस्थारूपस्य तिरोभावाविर्भाववदिति ॥२॥

विवरणम्—ननु यस्य जीवात्मनः स्वेनरूपेणाभिनिष्पत्तिः कथिता तस्यात्मनो वास्तविकं स्वरूपं किंशब्दवाच्यं किं लक्षणकं चेति दर्शयितुमुपक्रमते "य आत्मा" इत्यादि यश्य प्रकृतो जीवात्मास्वस्वरूपेणापहतपाप्मत्वादि गुणवानेव। कुतः? प्रकरणात्तथा निश्चीयते "अयमात्माऽपहतपाप्मा विजरो विमृत्युर्विशोक" इत्यादिप्रकरणेन जीवात्मनः स्वरूपस्य तत्तत्प्रकरणेन विनिश्चयः कृत एवेति। अयंभावः तत्त्वज्ञानोत्पत्तेः पूर्वंकर्मलक्षणाविद्ययाजीवस्तिरोहितस्वरूपोऽनेकविध-

सारबोधिनी—"जो आत्मा अपहत पाप्मा है, जरा रहित है, मरण शोकादि रहित है" इत्यादि प्रकरण से यह जीवात्मा अपहत पाप्मात्वादिक गुणवाला है ऐसा ही निश्चित हैं। परन्तु जीव का वह विशुद्ध स्वरूप कर्म-लक्षण अविद्या के बल से तिरोहित हो जाता है। एतादृश विशुद्ध स्वरूपक जीवात्मा का ही "एतन्त्वेवते भूयोऽनुव्याख्यास्यामि" इत्यादि से कथन किया है। यद्यपि जीव सर्वथा विशुद्ध गुणवाला सर्वदा रहता है। तथापि संसार काल में शुभाशुभ कर्म के बल से जीव का वह स्वरूप तिरोहित रहता है। पुनः भगवान् का उपासन रूप विद्या के बल से कर्म बन्धन का विनाश होने से उसका प्रादुर्भाव होता है जिसका नाम मोक्ष है। यही विशेषता उभयकाल

अविभागेनदृष्टत्वाधिकरणम् ॥२॥

अविभागेन दृष्टत्वात् ।४।४।४।

आविर्भूतस्वरूपोऽयमात्मा परमात्मानं विभक्तमनुभवत्युत स्वात्मतयैवाविभागेनेति संशयः। तत्र "निरञ्जनः परमं साम्यमुपैति" [मु० ३।

योनिषु विपरिवर्तमानः संसारीति कथ्यते। यदातु स एव जीवो भगवदुपासनाबलेन शरीरं परित्यज्यार्चिरादिना यथा परमपुरुषं संपद्य कर्मतिरोधानस्य निवर्तनेनाविर्भूतस्वरूपोभवन मुक्त इति कथ्यते। आनन्दादिका ये गुणा स्वभावभूतास्तेऽविद्यादशायां तिरोहिता अभवन् ते एव गुणा अपगते कर्मबन्धने पुनराविर्भूता भवन्ति "तथा हेयगुणध्वंसादवबोधादयो गुणः। प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हिते" (वि.ध. १०४।४७) इत्यादिरूपेण पुराणादावप्येवमेव प्रतिपादनात्। एतत्सर्वं मनसि कृत्याह "य आत्मा" इत्यादि "य आत्मा" इत्यादि प्रकरणाज्जीवात्मनो विशुद्धस्वरूपस्य निर्णयो भवति स एव स्वरूपविशेषोऽविद्यया कर्मलक्षणया संसारकाले तिरोहित इव भवति। एतादृशतिरोधानस्य विद्यया निवृत्तेरनन्तरं पुनः स्वरूपप्राप्तौ मुक्त इति कथ्यते। एतादृश विशुद्ध गुणविशिष्टस्यैवात्मनः "एतन्त्वेव भूयोंऽव्याख्यास्यामि" इत्यादिना प्रतिपादनादिति संक्षेपः ॥३॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ श्रीरघुवरीयवृत्तिविवरणे सम्पद्याविर्भावाधिकरणम् ॥१॥

में जीव का है। जैसे अयस्कान्त मणिमल युक्त होने पर आकर्षणादि कार्य को नहीं करता है। घर्षण प्रक्रिया से मल का विनाश हो जाने से पुनः स्वरूप विशिष्ट होकर के आकर्षण कार्य को करता है। उसी तरह प्रकृत में भी पूर्वपरावस्था मात्र में भेद है। स्वरूपांश में भेद नहीं होता है। ऐसा आत्मा प्रकरणात् इस सूत्र का आशय है ॥३॥

सारबोधिनी—मोक्षकाल में जीव परमात्मा को स्व से भिन्न रूप से देखता

१।३।] "सह ब्रह्मणा विपश्चिता" [तै०आ० १।२।] इत्यादिश्रुतिभ्यो विभक्तमेवेति पूर्वपक्षः। सिद्धान्तस्तु—"अहं ब्रह्मास्मि" य आत्मनि तिष्ठन्नित्यादिश्रुतिभिरात्मशरीरभावेनाविभक्ततयैवात्मानमनुभवतीति४।

इति श्रीरघुवरीयवृत्तावविभागेनदृष्टाधिकरणम् ॥२॥

विवरणम्-योयं विनिर्मुक्तकर्मबन्धनो मोक्षप्राप्तो जीवः स तद्दशायां परमात्मानं स्वविभक्तया पश्यति अथवा स्वेनाविभक्ततया पश्यतीति संशयः। तत्र जीवेशभेदस्य नित्यत्वेन श्रुतौ जीवस्य ब्रह्मसमता प्रतिपादनेन समत्वस्य च भेदनियतत्वेन स्वस्माद्भिन्नतयैव परमात्मानं पश्यतीति पूर्वपक्षः। "यः आत्मनि तिष्ठन्, तत्वमसि, अहं ब्रह्मास्मीत्यादि' श्रुत्या शरीरशरीरिभावेनोभयोर्व्यवस्थितत्वेन. तद्भावस्यचाभेदघटिततया स्वाभिन्नतयैव मोक्षकाले परमात्मानं मुक्तोजीवो जानातीति सिद्धान्तं दर्शयितुमुपक्रमते "आविर्भूतस्वरूपोयमात्मेत्यादि" योयमाविर्भूतस्वरूपो जीवात्मा समोक्षकाले परमात्मानं मुक्तप्राप्यं साकेताधिपतिं स्वस्माद्भेदेन तदा पश्यति. अथवा स्वात्मतया स्वस्वरूपाभेदेन तादृशात्मानं परमपुरुषं पश्यतीति संशयाकारः। तत्र "निरञ्जनः" सर्वदुःखरहितो जीवः परमात्मना परमसाम्यमुपैति प्राप्नोतित्यादि श्रुत्या तथा "सह ब्रह्मणा विपश्चिता" इत्यादि श्रुत्या च परमसमतायाः प्रतिपादनात् परमसमत्वस्य च भेद घटि

है अथवा अविभाग रूप से देखता है। इत्यादि संशय का निराकरण करने के लिए उपक्रम करते है "आविर्भूत स्वरूप" इत्यादि। जिसका ब्रह्मविद्याके प्रभाव से स्वकीय स्वरूप आविर्भूत हो गया है एतादृश जो जीव वह सर्व कारण परमात्मा को स्व से विभाग पूर्वक अनुभव करता है। अथवा स्वात्मा रूप से अविभाग पूर्वक अनुभव करता है एतादृश संशय होता है। इसमें पूर्वपक्षवादी कहते है कि "निरञ्जनः" सर्वदुःख रहित मोक्षावस्था में परमात्मा के परमशमता को प्राप्त कर जाता है" "तथा विद्वान् ब्रह्म परम पुरुष के साथ"

॥ ब्राह्माधिकरणम् ॥३॥

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ।४।४।५।

अपहतपाप्मत्वादिगुणाश्रयो जीव उतचैतन्यमात्रोऽथवोभयमिति संशयः। "य आत्मापहतपाप्मा" [छा० ८।७।१] इति श्रुतेरपहतपाप्म-

---

त्वात् स्वस्माद्विभक्तमेव परमात्मानमनुभवतीति पूर्वपक्षाशयः। तदीयसमाधाने कथयति "अविभागेनैवेत्यादि' मोक्षावस्थायां जीवः परमात्मानं स्वाभेदेनैव पश्यति कुतः? तथा दृष्टत्वात् "अहं ब्रह्मास्मीत्यादि" श्रुतौ अविभागेनैव दर्शनादित्याशयं दर्शयति सिद्धान्तस्तु इत्यादिना। "अहं ब्रह्मास्मि, तत्त्वमसीत्यादि" श्रुतिर्जीवपरात्मनोरभेदं दर्शयति "य आत्मनि तिष्ठन्" इत्यादि श्रुतिर्जीवपरेशयोः शरीरशरीरिभावं दर्शयति न चायं शरीरशरीरिभावोभेदे घटते अपितु तादात्म्ये सत्येव घटते "व्याप्यस्य व्यापकापृथक्सिद्धदेश्च व्याप्यव्यापकयोरविभागेन स्थित्युपपत्तेः" इत्याचार्योक्तेः तस्मादविभागेनैव जीवस्तदामोक्षकाले परमात्मानमनुभवतीति सिद्धान्तसिद्धोभागः ॥४॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ श्रीरघुवरीयवृत्तिविवरणे ऽविभागेनदृष्टत्वाधिकरणम् ॥२॥

विवरणम्—परज्योतिरूपसंपद्यनिवृत्तकर्मबन्धनस्य जीवस्य स्वरूपस्याविर्भावो भवतीति पूर्वं प्रतिपादितम्। तत्र येन स्वरूपेणाविर्भूय तिष्ठति इत्यादि श्रुति से सिद्ध होता है कि विभागपूर्वक ही अनुभव करता है। क्योंकि परमसमत्व जहाँ होता है उस स्थल में भेद अवश्य रहता है। अत जीवमोक्ष समय में विभाग पूर्वक ही परमात्मा को देखता है। अविभाग पूर्वक नहीं यह हुआ पूर्वपक्ष। इसके उत्तर में सिद्धान्तस्तु—"अहं ब्रह्मास्मि" ["मैं ब्रह्मस्वरूप हूँ"] "जो आत्मा में रहता हुआ" इत्यादि श्रुतियों से शरीर शरीरिभाव का प्रतिपादन किया गया है। अतः अविभाग रूप से ही जीव परमात्मा का अनुभव करता है ॥४॥

त्वादिगुणाश्रय एवेति प्रथमः पक्षः। "विज्ञान घन एवेति श्रुतेश्च चैतन्यमात्र एवेत्यपरः पक्षः। एवं पक्षद्वयं पूर्वपक्षतयोपन्यस्यानेन सूत्रेण प्रथमं जैमिनीमतमभिधीयते। दहरन्यायगतानामपहतपाप्मत्वादि ब्रह्मगुणानामेव भूयो जीवगुणतयोपन्यासात् "जक्षन् क्रीडन् रममाणः" इति सत्यसङ्कल्पादयोऽपि तस्मिन् सन्तीति जैमिनिर्मन्यते ॥५॥

तादृशस्वरूपस्य मतभेदेनेदानीं विचारः क्रियते। किमयं जीवोऽपहतपाप्मत्वादिगुणैराविर्भूय तिष्ठति अथवा चैतन्यरूपेण अथवोभय स्वरूपेणेति संशयः। तत्र अपहतपाप्मत्वादिरूपेण तिष्ठतीति जैमिनेराचार्यस्य मतं पूर्वपक्षतया दर्शयितुमुपक्रमते "अपहतपाप्मत्वादिगुणाश्रय" इत्यादि। अपहतपाप्मत्वादिगुणानामाश्रयो मुक्तावस्थो जीवोऽथवा चैतन्यमात्र गुणवान् अथवा तदुभयरूपक इति संशयः। तत्र प्रथमः पक्षः अपहतपाप्मत्वादिगुणाश्रयकः "विज्ञानघन एवेति श्रुतेः, चैतन्यमात्र गुणक इति द्वितीय पक्षः। अनेन प्रकारेण पक्षद्वयं दर्शयित्वा

सरबोधिनी—परम ज्योति को उपसम्पन्न होने के बाद सकल कर्मबन्धन विमुक्त जीव का स्वस्वरूप का आविर्भाव होता है ऐसा पूर्व में कहा गया है। उसमें जिस स्वरूप से आविर्भूत होकर के रहता है। तादृश स्वरूप का मतभेद से विचार करने के लिए उपक्रम करते है। मुक्तावस्थ जो जीव है वह अपहतपाप्मत्व गुण का आश्रय है अथवा चैतन्य मात्र स्वरूपक है या उभयात्मक है ऐसा संशय होता है। उसमें "जो आत्मा अपहत पाप्मा है" एतदृश श्रुति से सिद्ध होता है कि मुक्तावस्था जीव अपहत पाप्मत्व गुण का आश्रय है यह प्रथम पक्ष है। "विज्ञानघन स्वरूप जीव है" इसश्रुति से यह सिद्ध होता है कि चैतन्य मात्र स्वरूपक मुक्तावस्था जीवात्मा है। यह एक अन्य पक्ष है। इस प्रकार से पक्ष द्वय को पूर्वपक्ष रूप से कथन करके इस सूत्र से प्रथम जैमिनि मत को बतलाते हैं "ब्रह्मणेत्यादि" मुक्तावस्थ जीव ब्रह्म सम्बन्धी गुण से युक्त होता है। क्योंकि श्रुति में उसी प्रकार से कथन किया हैं। इसीका

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ।४।४।६।

"प्रज्ञानघन एव" [बृ० ४.५।१३।] इत्यादि श्रुते चैतन्यमात्रोऽयं जीव इत्यौडुलोमिर्मन्यते ॥६॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ।४।४।७।

चैतन्यमात्रस्वरूपस्यापि जीवस्यापहतपाप्मत्वादिगुणानामुक्तश्रुत्योपन्यासात्तदाश्रयत्वमपि स्वाभाविकमेव चैतन्यप्रकाशकत्वादपहतपाप्मत्वादीनां परस्परमविरोधं भगवान बादरायणोऽभिमत इति ॥७॥

इति रघुवरीयवृत्तौ ब्रह्माधिकरणम् ॥३॥

प्रथमं जैमिनिमतं पूर्वपक्षरूपेण दर्शयति ब्राह्मेणापहतपाप्मत्वादि रूपेणावस्थितोभवति उपन्यासादिभ्य इति । एतदेव दर्शयति दहरवाक्यगतापहतपाप्मकत्वादिगुणानां जीवगुणतया प्रतिपादनात् । तथा सत्यसङ्कल्पादिका अपि गुणास्तस्मिन् जीवे सन्तीति जैमिनेर्मतसंक्षेपः॥५॥

विवरणम्—जैमिनेमतं प्रदर्श्याचार्यान्तरस्य पूर्वपक्षरूपेणोपस्थापितं मदर्शयितुमुपक्रमते "प्रज्ञानघन" इत्यादि "प्रज्ञानघन" इत्यादिश्रुतिवलादात्मनो जीवस्यापि चैतन्यमात्र स्वरूपत्वमित्यौडुलोमिनामकाचार्यस्य मतमिति तदेवं ज्ञानमात्रस्वरूपक एव जीवस्तदावतिष्ठते इति संक्षेपो द्वितीयस्य ॥६॥

स्पष्टीकरण करते हैं दहरवाक्यगत जो अपहत पाप्मत्वादिक ब्राह्मगुण है उसी का पुनः जीवगुणरूप से उपन्यास किया गया है । एवम् "जक्षन् क्रीडन्रममाण इत्यादि श्रुति से मुक्तावस्थ जीव में सत्य सङ्कल्पादिक भी गुण है ऐसा जैमिनी आचार्य का मत है ॥५॥

सारबोधिनी—जैमिनी मत का प्रदर्शन करके आचार्यन्तर का मत वतलाते हैं "प्रज्ञानघनः" इत्यादि श्रुति के वल से सिद्ध होता है कि जीव विज्ञानमात्र स्वरूपक है । ऐसा आचार्य औडुलोमि का मत है । एतदश पक्ष द्वय का प्रदर्शन किया गया ॥६॥

॥ सङ्कल्पाधिकरणम् ॥४॥

सङ्कल्पादेवतु तच्छ्रुतेः ।४।४।८।

एवमुक्तप्रकरणे "स तत्र पर्य्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा" इत्यादि श्रूयते । तत्र संशयः किमेतेषामुपस्थिति

विवरणम्—तत्र पूर्वोक्त प्रकारेण मतद्वयं प्रदर्श्य भगवान् बादरायणः सिद्धान्तमतं स्वमतं प्रदर्शयति सूत्रेण तद्व्याख्यानायोपक्रमते "चैतन्यमात्रस्वरूपस्येत्यादि" यद्यपि जीवोहि चैतन्यमात्रस्वरूपस्तथापि अपहतपाप्मत्वादीनां श्रुतिप्रतिपातिदानामपि तेषां तदाश्रयत्वेन न कोऽपि विरोधः। ज्ञानं हि प्रकाशकं प्रकाश्यं च तदितरगुणादिकं न भवति प्रकाश्ययो विरोधः । विरोधस्तु पाप्मत्वविज्ञानयोरिति श्रुति प्रामाण्यादपहतपाप्मत्वादि गुणाश्रयमपिज्ञानवत् जीवस्य स्वाभाविकमेव । चैतन्यापहतपाप्मत्वादीनां परस्परमविरोधादित्युभयगुणाश्रयत्वं स्वाभाविकमेवेति बादरायणस्यमतमिति सर्वं समञ्जसम् ॥७॥

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृतौ
श्रीरघुवरीयवृत्तिविवरणेब्रह्माधिकरणम् ॥३॥

सारबोधिनी—पूर्वोक्त क्रम से मतद्वय प्रकृत में बतला करके बादरायण स्वकीय मत का सिद्धान्त रूप से बतलाते है "एवमपीत्यादि" सूत्रम् । जीवात्माको विज्ञानमात्र स्वरूपत्व होने पर भी अपहतपाप्मत्वादिक जो प्रकरणापगत गुण हैं उनको जीव में रहने में कोई विरोध नहीं है ऐसा बादरायण आचार्य मानते है ॥

सूत्रार्थ का स्पष्टीकरण करते है "चैतन्यमात्रेत्यादि" जोव चैतन्यमात्र स्वरूप हैं तथापि श्रुति प्रतिपादित अपहतपाप्मत्वादिगुण का आश्रयत्व भी जीव में स्वाभाविक हैं । चैतन्य प्रकाश्य होने से अपहतपाप्मत्वादिकगुणों का परस्पर में कोई विरोध नहीं हैं । ऐसा भगवान बादरायण आचार्य कहते है । इस तरह से प्रकृत विषय का सिद्धान्त होता है ॥७॥

मुक्तात्मनः प्रयत्नान्तरसापेक्षोत ब्रह्मण इव सत्यसङ्कल्पादेवेति। निखिलस्यापि कार्यस्य प्रयत्नसाध्यतया प्रयत्नान्तरसापेक्षैवोपस्थितिरिति पूर्वपक्षः। अत्राभिधीयते—"स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति" [छा० ८।२।१] इति श्रुतेः सङ्कल्पादेव प्रयत्नान्तरनैरपेक्ष्येणैव पित्रादीनामुपस्थितिः ॥८॥

विवरणम्—ब्रह्म संपत्त्यनन्तरं मुक्तात्मनः सत्यसङ्कल्पादिका गुणाः प्रादुर्भवन्तीति कथितम्। ततश्च समुक्तात्मासङ्कल्पसिद्धान् पदार्थाननुभवति इति छान्दोग्ये कथितं "स तत्र पर्येतीत्यादि" प्रकरणेन। तत्र संशयो जायते यत् ते पदार्थाः जीवस्य प्रयत्नसाध्याः सङ्कल्पमात्र साध्यावेति। तत्र प्रयत्न साध्या एव कार्यमात्रं प्रयत्नजनकत्वनियमेनात्रापि तथैव भवितव्यमिति प्रथमः पक्षः। श्रुतिप्रतिपादितत्वात् सङ्कल्पादेवेति सिद्धान्तः। एतत्सर्वं पिण्डीकृत्यदर्शयितुमुपक्रमते "एवं मुक्त प्रकरणे" इत्यादि। मुक्तजीवस्य प्रकरणे छान्दोग्यादिके। स तत्र पर्येत्यादि। य एते साङ्कल्पिकाः पदार्थाः समुपस्थिता भवन्ति तत्र

सारबोधिनी—ब्रह्म संपत्ति के अनन्तर में मुक्तात्मा को अपहतपाप्मकत्वादि सत्यसंकल्पत्वान्त गुणों का आविर्भाव होता है ऐसा पूर्व में कहा गया है। एवं मुक्त जीव के प्रकरण में "स तत्र पर्येति" "वह मुक्त जीव स्त्री के अश्वयानादिक के द्वारा क्रीडा विहार करता है" इत्यादि छान्दोग्यादिक प्रकरण में कहा गया है। इसमें संशय होता है कि ये जो सांकल्पिक पदार्थों की उपस्थिति होती वह मुक्त पुरुष के प्रयत्न से होती है। अथवा जिस तरह ब्रह्म को संकल्प मात्र से पदार्थों की उपस्थितो होती है उसी तरह मुक्त जोव को भी संकल्पमात्र से अनुभवनीय पदार्थ उपस्थित हो जाता है। इसमें पूर्वपक्षवादो कहते हैं कि कार्यमात्र जो उत्पन्न होता है उसमें प्रयत्न की आवश्यकता होती है। जैसे घटादि कार्य की उत्पत्ति में कुलाल का प्रयत्नजनक होता है "यत्कार्यंतत्प्रयत्नजन्यं यथा घटः" ऐसी व्याप्ति है। तो घट कुलालादि

अत एव चानन्याधिपतिः ।४।४।९।

अतः सत्यसङ्कल्पादेवानन्याधीपतित्वमस्य सिद्धम् । अन्यत्कर्मादिकमस्याधिपत्यं न भजते । एवमपि परमात्मनियाम्यता नापैति ॥९॥

इति श्रीरघुवरीयवृत्तौसंकल्पाधिकरणम् ॥४॥

मुक्तात्मनः प्रयत्नस्यावश्यकताभवति अथवा सङ्कल्पादेव ते जायन्ते इत्थं संशयो भवति । तत्र कार्यमात्रं प्रतिप्रयत्नस्य जनकताया घटादिका कार्यस्थले दर्शनात् यत्कार्यं तत्प्रयत्नजन्यमितिव्याप्तेरिहापि मुक्तात्मप्रयत्नजन्यत्वमेतेषामिति पूर्वपक्षः । उत्तरयति "सङ्कल्पादेवेत्यादि" स यदि पितृलोककामो भवतीति श्रुतौ सङ्कल्पमात्रस्य साधकत्वदर्शनेन मुक्तस्य सङ्कल्पमात्रे ते पदार्था उपस्थिता भवन्ति न तु मुक्त प्रयत्न साध्यताश्रुतिविरोधात् । यद्यत् कार्यं तत्प्रयत्नजन्यमिति व्याप्तिस्तु पारमेश्वरप्रयत्ने नैव सावकाशता भवतीति संक्षेपः ॥८॥

दृष्टान्त से सिद्ध होता है कि यानादि पदार्थों की जो उपस्थिति होती है वह मुक्त पुरुष के प्रयन्न साध्य है । नतु ब्रह्म दृष्टान्त से संकल्पमात्रजन्य है ऐसा पर्वपक्ष होता है । इसके उत्तर में कहते है :"सङ्कल्पादेव तच्छ्रुतेः" पुरुष के संकल्पमात्र से अनुभव योग्य पदार्थों की उपस्थिति हो जाती है क्योंकि श्रुति कहती है कि संकल्पमात्र से पदार्थ उपस्थित होता है। तादृश श्रुति को उदाहृत करते हैं "अत्राभिधीयते" इत्यादि ग्रन्थ से वह मुक्त पुरुष यदि पितृलोक कामनावान् होता हैं तो संकल्प मात्र से पितरलोक उपस्थित हो जाते है" इस श्रुति में "संकल्पादेव" यहाँ एव शब्द के होने से वह एवकार संकल्पेतर प्रयत्नान्तर का निराकरण करता है, अर्थात् मुक्त जीव के सङ्कल्प से प्रयत्नान्तर निरपेक्ष होकर के ही पित्रादिक अनुभव योग्य पदार्थ उपस्थित हो जाते हैं उसमें प्रयत्नान्तर की आवश्यकता नहीं होती है । "यत्कार्यं तत्प्रयत्नजन्यम्" यह व्याप्ति सामान्य रूप से लौकिक कार्यपरक है । उसका समावेश प्रकृत में नहीं है । मुक्त जीव के उपर भगवत्कृपा रहने से सब कार्य हो जाता है ॥८॥

अभावाधिकरणम् ॥५॥

अभावं बादरिराह ह्येवम् ।४।४।१०।

मुक्तस्य सङ्कल्पसत्व इन्द्रियसत्ताभ्युपेतैव स्यादिति तद्विषये चिन्त्यते । किं मुक्तजीवस्य करणकलेवरादिकमस्ति न वेति संशयः ।

विवरणम्–यस्मात् कारणात् मुक्तोजीवः परमेश्वरकृपाप्राप्त सत्य सङ्कल्पवान् भवति अत एतस्मादेव कारणादयं मुक्तो जीवऽनन्याधिपतिर्भवति अस्य जोवस्योपरि अन्यस्य परमेश्वरव्यतिरिक्तस्य पुरुषान्तरस्य शुभाशुभकर्मणोवा आधिपत्यं नियामकत्वं न भवति स्वकीयसङ्कल्प मात्रेणैव सर्वं कर्तुमुत्सहते । तत्र नान्योऽस्याधिपतिर्भवतीत्यस्य परमेश्वर व्यतिरिक्तोऽधिपतिर्न भवतीत्यर्थः परमेश्वरस्य नियामकतातुनिवारिता न भवति । यत एवायमनन्याधिपति एव "स्वराड्भवतीति" श्रुतिरपि तस्य परमेश्वरव्यतिरिक्तस्याधिपत्यं निवारयतीत्याशयेन सूत्रव्याख्यानायोपक्रमते अतः सत्यसङ्कल्पादेवेत्यादि" । अवतरण ग्रन्थेनैव विदितार्थतावृत्तिः ॥९॥

इति जगद्गुरुश्रीरामनन्दाचार्य रामप्रपन्नाचार्य कृतौ
श्रीरघुवरीयवृत्तिविवरणे संकल्पाधिकरणम् ॥४॥

विवरणम्– सत्यसङ्कल्पादिको गुणोमुक्तस्य विद्यते इति पूर्वं

सारबोधिनी–यह मुक्त जीव परमेश्वर कृपा प्राप्त सत्य संकल्पवान् होता है । अतः यह मुक्त जीव अनन्याधिपति होता है । अर्थात् परमेश्वर से अतिरिक्त अन्य कोई जीवान्तर अथवा शुभाशुभ कर्मादिक इसका अधिपति नियामक नहीं होता है ।

अतएव मुक्त जीव स्वराट् कहलाता है । एतावता परमेश्वर की नियामकता तो नहीं जाती है । क्योंकि एतादृश सत्य संकल्पवत्व भी तो परमेश्वर की कृपा से ही प्राप्त हुआ है । अतः परमेश्वर व्यतिरिक्त का आधिपत्य मुक्त जीव में नहीं होता है । ॥९॥

"न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" [छा०८।१२।१] इत्यादि श्रुतिषु शरीराभावदर्शनान्न करणकलेवरादिकं मुक्तस्य बादरिर्मन्यत इति पूर्वपक्षः ॥१०॥

कथितम्. सच गुण इन्द्रियशरीरसाध्य इति मुक्तस्य शरीरेन्द्रियादिकं भवति न वेति विचारः क्रियते। यो हि मुक्त जीवस्तस्य सत्यसङ्कल्पादि सत्वस्य स्वीकारे ततः पूर्वं शरीरादिकमस्ति न वेति संशयः। तत्र 'असरीरंवावसन्तं प्रियाप्रिये न स्पृशतः" इत्यादौ शरीराभावस्य प्रतिपादनात् करण कलेवरादिकं न भवतीति बादरेराचार्यस्य पूर्वपक्षो भवतीत्येतद्दर्शयितुमुपक्रमते "मुक्तस्य सत्यसंकल्पसत्वे" इत्यादि। सङ्कल्पसद्भावो गमयति करणसत्त्वमिति तद्विचार प्रस्तूयते। किमस्मदादिवत् मुक्तजीवस्य मोक्षदशायां शरीरेन्द्रियादिकं भवति न वेति। यतः शरीरेन्द्रियविशिष्टस्यैव जीवस्य भोगो भवति. तदभावे भोगादर्शनात्। स च भोगो मुक्ते दृश्यते इति तस्यापिकरणकलेवरादिकमस्तीति प्रथमकोटिः। किन्तु "असरीरंवावसन्तं न प्रियाप्रिये स्पृशतः"

सारबोधिनी—मुक्त जीव का जब सत्य संकल्प है तब उसमें इन्द्रिय सत्ता को अवश्य मानना चाहिए इस प्रकार से उस विषय में विचार करते हैं। जो जीव संसार राहित्य रूप मोक्ष को प्राप्त कर लिया है उसका संसारान्तर्गत के तरह करण कलेवर हैं अथवा नहीं ऐसा संशय होता है। जब इन्द्रिय का कार्य संकल्प है तब इन्द्रियादिक को होना चाहिये इस युक्ति से इन्द्रियादिक का सद्भाव सिद्ध होता है। और संसार निवृत्त हो गया तब संसारावयव करण कलेवर का सद्भाव कैसे हो सकता है ? इसलिए करण कलेवर का असद्भाव प्राप्त होता है इस प्रकार से उभय कोटि का उपस्थापक होने से संशय होता है कि "करणकलेवरस्य सद्भावो भवति नवेति" इसमें बादरि आचार्य द्वितीय कोटि को मान करके कहते है कि "नवैसशरीस्य" इत्यादि श्रुति मोक्ष दशा में मुक्तजीव का करण कलेवर नहीं है ऐसा प्रतिपादन

भावं जैमिनिर्विकल्पामननात् ।४।४।११।

"स एकधा भवति त्रिधा भवति" [छा०७।२६।२।] इति विविध-रूपेण भवनं श्रुतिरभिधत्ते । तच्च कलेवरमन्तरेण न सम्भवतीति मुक्तात्मनः करणादिभावं जैमिनिर्मन्यते ॥११॥

इत्यादि श्रुत्यामुक्तस्य शरीराभावप्रतिपादनात्. तत्सहकृतेन्द्रियस्याप्यभाव एवेति द्वितीयकोटिमेवपूर्वपक्षतया व्यवस्थापयति बादरिराचार्य इति ॥१०॥

विवरणम्– "स एकधाभवतीत्यादि" श्रुत्यामुक्तजीवस्यानेकरूपेण भवनस्य प्रतिपादनेन. तस्यानेक भवनस्य करणकलेवरमन्तरेणासंभवेन मुक्तात्मनोऽपि करणादि सद्भावमेव स्वीकरोति जैमिनीराचार्य इति । कार्यस्य सङ्कल्पस्य शरीरेन्द्रियमन्तरेणासंभवादिति निवेदयितुमुपक्रमते "स एकधेत्यादि" स एकधा भवतीत्यादि श्रुतिरनेकरूपेण भवनं करती है । और मोक्षदशा में करणादि सहभाव प्रतिपादक प्रबल प्रमाण नहीं है । अतः मुक्जीव का करण कलेवर नहीं है ऐसा मानते हैं । यही प्रकृत में पूर्वपक्ष होता है कि मुक्त जीव का करण कलेवर नहीं है ॥१०॥

साबोधिनी—जैमिनि आचार्य कहते हैं कि मैं मुक्त जीन का शरीरेन्द्रिय सद्भाव मानता हूँ उनका अभिप्राय यह है कि "स एकधा भवति" इत्यादि श्रुति से अनेक भवन का प्रतिपादन किया है वह अनेक प्रकारक भवन शरीरेन्द्रियादि के बिना असंभवित है । अतः करण कलेवर के सद्भाव की इच्छा करते है "अशरीरंवावसन्तम्" इत्यादि श्रुति जो शरीराभाव का प्रतिपादन करती है । उसका अभिप्राय यह कि मुक्तजीव का कर्म शुभाशुभ लक्षण है । तादृश कर्म जनित शरीरादिक नहीं है । तो कर्मकृत शरीर के अभाव का प्रतिपादन किया जाता है । किन्तु सत्य सङ्कल्पादिक शरीर के अभाव का प्रतिपादन करने में तात्पर्य नहीं है । इसी विषय का वर्णन किया है "सएकधा" इत्यादि ग्रन्थ से—"वह मुक्त जीव एक रूप से तीन रूप से अनेक रूप होता

द्वादशाहवदुभयविधं बादरायणोऽतः ।४।४।१२।

अतः सङ्कल्पादेव करणादिमत्वं तद्रहितत्वञ्चेत्युभयविधं मुक्तात्मानं भगवान् बादरायणो मन्यते । यथा द्वादशाहस्य सत्रत्वमहीनत्वञ्च विधिवैलक्षण्यात्तथा सङ्कल्पवैलक्षण्यादुभयविधमपि युक्तम् ॥१२॥

कथयति तदनेकरूपत्वं करणकलेवरमन्तरेणासंभवतीति तत् सद्भावं मुक्तस्य प्रतिपादयतीति जैमिनेर्मतम् ॥११॥

विवरणम्—उक्तक्रमेण बादरेः जैमिनेश्चमतद्वयं मुक्तस्य शरीरेन्द्रियविषये प्रदर्श्य स्वकीयं सिद्धान्तं दर्शयितुं बादरायणस्य सिद्धान्तमुपक्रमते "अतः सङ्कल्पादेवेत्यादि" सङ्कल्पबलादेवमुक्तस्य शरीरादिकं तदभावमपीच्छति यथा विधिशास्त्रबलात् द्वादशाहस्य सत्रत्वमपरविधिबलादहीनत्वमपि भवति । तथैव प्रकृते शरीरादि साहित्यं तदभावमपि प्रतिपादयति बादरायण इति भावं प्रदर्शयति अतः सङ्कल्परूपकारणादेवकरणकलेवरादिमत्वं तदभाववत्वमपि मुक्तात्मनो भवतीति बादरायणः कथयति । "द्वादशाहवदिति द्वादशाहमृद्धि कामा उपेहेः' इस प्रका से अनेक रूप से भवन का प्रतिपादन श्रुति करती है तो यह अनेक प्रकार का जो भवन होना है वह करण कलेवर के बिना नहीं हो सकता है इसलिए मुक्तात्मा का करणादि के सद्भाव को जैमिनि मानते है ॥११॥

सारबोधिनी–पूर्वोक्त प्रकार से बादरि तथा जैमिनि का मतद्वय बतलाकर के सिद्धान्त को बतलाते हैं बादरायणजी । उस विषय को बतलाने के लिए उपक्रम करते हैं "अतः सङ्कल्पादित्यादि" मुक्त जीव के संकल्पबल से करण कलेवरत्व भी होता है । तथा विलक्षण तादृश संकल्प के बल से करण कलेवर अभाव भी होता है । इस तरह उभय रूपत्व मुक्त जीव का भगवान् बादरायण मानते है द्वादशाह के समान जैसे "द्वादशाह मृद्धिकामा" प्रजाकामंयाजयेत्" इत्यादि शास्त्र के बल से अहीनत्व होता है । तो उभय प्रकारक शास्त्र के बल से एक में ही उभयविधत्व होता है । इसीलिऐ प्रकृत में उभय

तन्वभावे सन्ध्यवदुपपत्तेः ।४।४।१३।।

मुक्तस्य तन्वभावदशायां स्वप्नभोगवद्भगवत्प्रदत्तैर्भोगोपकरणैरेव भोगोपपत्तेः ।।१३।।

युरिति द्वादशाहस्य सत्रत्वम् द्वादशाहेन प्रजाकामयाजयेदित्यादि विधिवाक्येन तस्यैवाहीनत्वमपि भवति तथैव सत्यसङ्कल्पवलान्मुक्तस्य करण-कलेवरादिमत्वम् तथा तदभाववत्वमपीति सिद्धान्तः ।।१२।।

विवरणम्- ननु शरीरेन्द्रियजन्यस्य भोगस्य कलेवरकरणाभावे भोगोपपत्तिर्मुक्तस्य कथं स्यादित्याशङ्कानिरासाय तदुपपादयितुमुपक्रमते "मुक्तस्यतन्वभावेत्यादि" तन्वभावदशायां मुक्तस्य योयं भोगो भवति न स भोगोमुक्तशरीरेन्द्रियत्वलेन किन्तु भगवत् कृपापात्रस्य मुक्त जीवस्य परमेश्वरप्रदत्तशरीरेन्द्रियैर्भोग्यैश्च भोगोपपत्तिर्भवति । यथा स्वप्नसमये स्वप्नद्रष्टुर्जीवस्य स्वकीयकरणग्रामस्योपसमेऽपि परप्रदत्त-करणादिभिर्भोगोजायते तथैवमुक्तस्यापि स्वकीयकरणादेरसत्वेऽपि-

प्रकरण संकल्प के वल से मुक्त जीव में करण कलेवरवत्व भी होता है। तथा करण कलेवराभाववत्व की भी सिद्धि होती है। इसीलिए कोई अनुपपत्ति नहीं होती है ।।१२।।

सारबोधिनी—भोग में शरीरेन्दिय की कारणता है जब कारणता है तब मुक्त जीव का करण कलेवर के अभाव में भोग किस तरह से होगा। इस आशंका का निराकरण करने के लिए तथा सूत्र व्याख्यान करने के लिए कहते हैं "मुक्तस्यतन्वभावेत्यादि" मुक्त पुरुष को शरीराभाव काल में जैसे शरीरादिक का अभाव होने पर भी भोग विहित है। उसी तरह भगवान् के अनुग्रह प्राप्त शरीरेन्द्रियादिक के द्वारा भी मुक्त पुरुष को भोग संभव है। स्वकीयशरीर से ही भोग होता है यह लौकिक स्थल में ही नियम है अलौकिक में नहीं। अतः अन्य प्रदत्त शरीरादिक से भी मुक्त जीव को भोग होने में कोई क्षति नहीं है ।।१२।।

भावे जाग्रद्वत् ।४।४।१४॥

करणकलेवरादिसद्भावे तु मुक्तात्मा जाग्रत्पुरुषभोगवत् पितृलोका-दिभोगाननुभवति। यथा परात्परः कमलासनेशानाद्यखिलदिविषद्व-न्द्याङ्घ्रिपद्मोभयविभूतिपतिर्भगवान् श्रीरामचन्द्रः स्वसङ्कल्पेनाध्यवनि-मण्डलं देवानां पूरयोध्येत्याम्नायसमधिगतमहिमसाकेतापरनामधेयायो-ध्याधाम्नि, नमदमरनरभूपालमालामौलिमुकुटमणिमरीचिनिकरनीराजित चरणारविन्दश्रीमद्दशस्यन्दननन्दनतामासाद्य बाल्येऽनल्पकल्पपादप-स्थलकमलकिसलयप्रसूनचयविरचित-विचित्रसुरभिसरयूशीतलसलिलक ल्लोलमिल-दनिलचलद-लकराजिराजि-तकपोलमण्डलद्युतिमण्डितकुण्डलप्र भयाशेषदिशां तिमिरमुदस्यन्निजजनसुलभनरलीलारसमनुभवति तथा मुक्तोऽपि परेशलीलान्तः पातिपितृलोकादिकं स्वीयसङ्कल्पबलादुत्पाद्य तैस्सहाभिनवललितलीलामाकलयति ॥१४।

परेशप्रदत्तैरेवकरणकलेवरैर्भोगोभवतीति शरीरादीनामभावे मोक्षदशायां मुक्तस्य भोगोपपत्तिरिति संक्षेपः ॥१३॥

विवरणम्- यथा जाग्रज्जीवः करणकलेवरसद्भावे भोगमनुभवति तथैव सत्यसङ्कल्पबलेन प्राप्तकरणग्रामो मुक्तः स्वप्नविलक्षणं भोगमनु-भवति करणादिप्राप्तिस्तु भगवत्प्रसादादिति । एतत्सर्वं दर्शयितुमुप-

सारबोधिन—करण कलेवर इन्द्रियग्राम शरीर के सद्भाव में मुक्तजीव-जाग्रत् कालिक भोग के सामान स्वप्न विलक्षण पितृलोमादि भोग का अनुभव करता है। जैसे परात्पर भगवान् श्रीरामचन्द्र. ब्रह्मामहादेवादि निखिल देव समूह से वन्दित चरण कमल उभय विभूति के स्वामी संकल्प के बल से इस पृथिवी मंडल में देवताओं का नगर अयोध्या में वेद समधिगत महिमा युक्त साकेता पर नामक दिव्य धाम अयोध्या में नमस्कार करनेवाले देव मनुष्य राजाओं के समुदाय के मुकुटमणि के किरण समुदाय से पूनित चरणारविन्द श्रीदशरथ राजा के पुत्रत्व को प्राप्त करके बाल्यावस्था में अनेक कल्पवृक्ष सम्बन्धी कम-

प्रदीपवदावेशस्तथाहि दर्शयति ।४।४।१५।

मुक्त्यवस्थायामप्यणुस्वरूपस्य जीवात्मन एकदेशस्थितप्रदीपस्य यथा स्वप्रभया देशान्तरसम्बन्धस्तथा देहान्तरदेशान्तरसम्बन्धो व्यवहारश्चोपपद्यते । तथा हि दर्शयति श्रुतिः "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयः सचानन्त्यायकल्पते"।(श्वे०५।९)

क्रमते "करणकलेवरादीत्यादि" मुक्तात्मा करणकलेवरादिसद्भावे जाग्रत्पुरुषभोगवदेव पितृलोकादिभोगं स्वप्नविलक्षणमनुभवति । यथा परेशः श्रीरामचन्द्रः स्वसङ्कल्पेन विविधभावानुत्पाद्य स्वलीलारसमनुभवति तद्वदेवेति वृत्तिग्रन्थाशयोऽर्थस्तु स्वमनीषयैवावगन्तव्यः दार्शनिक प्रबन्धे केवलशब्दार्थविवरणस्यानादेयत्वात् ॥१४॥

विवरणम्—ननु जीवस्याणुपरिमाणयुक्तत्वात् एकधा त्रिधेत्यादि श्रुतिकथितविविधशरीरेषु सम्बन्धाभावात्कथमनेक शरीरेण मुक्तजीवस्य भोगः स्यादित्याशङ्का निराकरणाय प्रक्रमते "मुक्त्यवस्थायामित्यादि यपि जीवोणुपरिमाणवान् तथापि यथा गृहैकदेशेवर्तमानो प्रदीपः स्वप्रभया सकलगेहं प्रकाशयति यथा वा हृदय प्रदेशगतोऽपि

लवत् किसलय पुष्प समुदाय से सुशोभित कपोलमण्डल किरण से मण्डितकुण्डल प्रभा से अशेष दिशा के अन्धकार को दुर करके स्वकीय भक्तजन सुलभलीलारस का अनुभव करते हैं । उसी तरह मुक्त पुरुष भी भगवान् की लीला के अन्तर्गत पितृलोकादिक को अपने संकल्प के बल से उत्पन्न करके उसके साथ अभिनव लीला का अनुभव करता है ॥१४॥

सारबोधिनी—जीवात्मा के अणु होने से "सएकधात्रिधाभवति" इत्यादि श्रुति से कथित अनेक शरीर में सम्बन्ध नहीं होने से मुक्तात्मा अनेक शरीर से भोग करता है यह कथन अनुपयुक्त है । इस शंका का निराकरण करने के लिए उपक्रम करते है "मुक्त्यवस्थायामित्यादि" मोक्षावस्था में अणु स्वरूप जीवात्मा का एकदेश में अवस्थित प्रदीप का जैसे स्वप्रभा से देशान्तर के साथ

"एषोणुरात्मैष द्रष्टा' इत्यादि श्रुतिमानतः ।
अणुश्च चेतनो जीवो द्रव्यरूपो मतो बुधैः ॥
'आत्मानिष्क्रामती'त्येवमुत्क्रान्तिश्चात्मनः श्रुता ।
गमनाच्चन्द्रलोके च जीवेगतिससीरिता ॥
'तस्माल्लोकात्पुनः' श्चैवमागतिस्वात्मनः श्रुतो ।
एवमुत्क्रान्तिगत्यादेर्जीवोऽणुर्मन्यते बुधैः ॥"
(श्रीबोधायनमतादर्शः ८६०–८६२) इत्यादिस्मृतिरपिसङ्ग्राह्याः इति सङ्कल्पेनैव मुक्तात्मनस्सर्वमुपपद्यते ॥१५॥

जीवः सकलशरीरे चैतन्यव्याप्तिं करोति तथैव देहान्तरेऽपि चैतन्यद्वारा व्याप्तिं करोतीत्यतोमुक्तस्यापि विविधशरीरेसम्बन्धो भवतीति नकोपि दोषः। एतदेव दर्शयति यथागृहैकदेशेस्थितो दोपः स्वप्रभयासकलगेहं प्रकाशयति तथा मोक्षावस्थायामणुरपि जीवश्चैतन्यद्वारा देहान्तर देशान्तरस्यापि ज्ञानेन सम्बन्धं करोति। तथाहि श्रुति स्मृतयः–बाला-ग्रेत्यादि" ततश्च स्वकीय संकल्पेनैव मुक्तात्मनः सर्वमपि सम्पन्नं भवतीति न कोऽपि दोषः।

अयंभावः यद्यपि बद्धजीवानामनाद्यविद्यया संकुचित ज्ञानस्वभावत्वा द्देहान्तरे चैतन्यद्वारा व्याप्तिं न करोति स्वकीयदेहेतु सर्वत्र व्याप्तिं सम्बन्ध होता है उसी तरह जीव का भी देशान्तद तथा देशान्तर के साथ सम्बन्ध और व्यवहार भी उत्पन्न होता है। श्रुति स्मृति भी इसी प्रकार से कहते हैं "बाल के अग्रभाग के अग्रभाग को शतधा कल्पना किया जाय। उसका एक भाग जीव है। तथा वह गमन शील और अनन्त है अतः इस प्रकार संकल्प से ही मुक्तात्मा का सब व्यवहार सिद्ध होता है। बद्ध जीव अनादिकर्म के बल से संकुचित ज्ञानवान है। इसलिए बद्ध जीव का देहान्तर में चेतना का सम्बन्ध नहीं होता है। स्वकीय देह में तो सर्वत्र सम्बन्ध होता है। मुक्त जीव का तो परमात्मा की उपासना से कर्म बन्धन नष्ट हो गया

स्वाप्ययसम्पत्योरन्यतरापेक्षमाविष्कृतं हि ।४।४।१६।

कथंतर्हि "प्राज्ञेनात्मना सम्परिष्वक्तो न वाह्यं किञ्चन वेद नान्तरम्" [बृ० ४।३।२१।] इति मुक्तात्माभिधायिनी श्रुतिः सङ्गच्छतामित्यतोऽभिधत्ते स्वाप्ययेति । नोदीरितश्रुतिर्मुक्तात्मानं गोचरयति। अपितु सुषुप्तिमरणयोरन्यतरापेक्षमिदं श्रुतिवाक्यम्। आविष्कृतं हि स्वाप्ययसम्पत्योर्निः संज्ञत्वमुक्तौ च सर्वज्ञत्वं श्रुत्या। "नाहं खल्वयं भगव एवं सम्प्रत्यात्मानं जानाति" [छा० ८।११।२।] इति सुषुप्तौ "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति" [बृ० २।४।१२।] इति मरणे। "सवा एष दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके" [छा० ८।१२।५।] इति स्पष्टमेवमुक्तौ सुषुप्तिमरणविलक्षणं ज्ञानवत्त्वमाविष्कृतम् ॥१६॥

इति श्रीरघुवरीयवृत्तावभावाधिकरणम् ॥५॥

करोत्येवानुभवसिद्धत्वात् । मुक्तजीवात्मनांतु परमपुरुषस्योपासनया प्रक्षीणकर्मबन्धनत्वेनासङ्कुचितज्ञानत्वात् स्वकीयदेहवद्देहान्तरेऽपि व्याप्तिं साधयति तेन सर्वोऽपि व्यवहारो निराकुलो भवतीति संक्षेपः ।१५

विवरणम्—ननु मुक्तौ बाह्याभ्यन्तरज्ञानस्याभावम् "प्राज्ञेनानात्म संपरिष्वक्त" इत्यादिश्रुतिः प्रतिपादयति तत्कथं मुक्तस्य सर्वज्ञ-

है इसलिए असंकुचित ज्ञानवान् होने से स्वदेहवत् देहान्तर में उसका सम्बन्ध होता है इसलिए सब व्यवहार होता है ॥१५॥

सारबोधनी–"प्राज्ञेनात्मना संपरिष्वक्तः"इत्यादि श्रुति तो मुक्त पुरुष में बाह्य आभ्यतर वस्तु विषयक ज्ञानाभाव का प्रतियादान करती है तब मुक्त पुरुष सर्व विषयक ज्ञानवत्व रूप सर्वज्ञत्व किस तरह से हो सकता है। इत्याकारक शंका का समाधान करने के लिए प्रक्रम करते हैं "कथंतर्हीत्यादि" प्राज्ञ परमात्मा से संपरिष्वक्त होकर के न कुछ वाह्य वस्तु को जानता है। नवा आन्तर किसी वस्तु को जानता है" यह श्रुति मुक्तात्मा में ज्ञानाभाव का

जगद्व्यापारवर्जनाधिकरणम् ॥६॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ।४।४।१७

मुक्तस्य सत्यसङ्कल्पत्वमुक्त्वाऽन्यदपि विचार्यते । किं मुक्तस्य जगद्रचनादिव्यापारोऽप्यस्ति, उत केवलं ब्रह्मानुभव एवेति संशयः ।

त्वमित्याशङ्कां निराकर्तुमुपक्रमते "कथंतर्हीत्यादि" परमात्मानं संपरिष्वक्तो जीवो न किञ्चनबाह्यं विजानाति नवा आन्तरमिति श्रुतिमुक्तस्य ज्ञानाभावमिच्छति तत्कथं मुक्तस्य सर्वज्ञत्वमित्याशङ्क्यसमाधत्ते- "स्वाप्ययेत्यादि यदिदं ज्ञानाभावप्रतिपादकं वचनं न तन्मुक्ते ज्ञानाभावं प्रतिपादयति किन्तु सुषुप्तिकाले मरणकाले च ज्ञानाभावं दर्शयति । मोक्षेतु "रमते य एते ब्रह्मलोके" इति श्रुतिः सर्वज्ञतामेव मुक्तस्य प्रतिपादयतीति ध्येयम् । १६॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्य कृतौ
श्री रघुवरीयवृत्तिविवरणेऽभावाधिकरणम् ॥५॥

प्रतिपादन करती है तो इसकी संगति किस तरह से होगी ? इस शंका के उत्तर में कहते हैं "स्वाप्यय संपत्त्योरित्यादि" उक्त श्रुति मुक्तात्मा में ज्ञानाभाव का प्रतिपादन नहीं करती है । किन्तु सुषुप्ति में तथा मरण में जीव के ज्ञानाभाव प्रतिपादन करती है । क्योंकि मरण तथा सुषुप्ति में निःसंज्ञकत्व तथा सर्वज्ञत्व प्रतिपादन किया है । "हे भगवन् मैं सम्प्रति आत्मा को नहीं जानता हूं" यह श्रुति सुषुप्ति में । "एतेभ्यो भूतेभ्य" इत्यादि श्रुति मरण में ज्ञानाभाव कहती है । "सवा एष दिव्येन चक्षुषा" इत्यादि श्रुति स्पष्ट रूप से सुषुप्ति मरण से विलक्षण ज्ञानवत्व का मोक्ष में प्रतिपादन करती है । अर्थात् संकल्प वश से मोक्ष में ज्ञानवत्व रूपसर्वज्ञत्व का प्रतिपादन करती है ॥१६॥

सारबोधिनी—मुक्त पुरुष सत्य संकल्पवान् होते हैं इसका कथन करके प्रसंगात् मुक्त के विषय में कुछ और भी पदार्थ का विचार करते है । क्या

"निरञ्जनः परमं साम्यमुपैति" [मु०३।१।३] इत्यादिवचनैर्जगद्रचनादिव्यापारोऽपीति पूर्वपक्षः। अत्राभिधीयते—सृष्ट्यादिव्यापारवाक्येषु ब्रह्मण एकस्यैव श्रवणात् जगद्रचनादिव्यापारं विहाय ब्रह्मानुभवादिरूपे सुख एव मुक्तस्य साम्यम्। एतच्च सृष्टिप्रकरणादवगम्यते। तत्र मुक्तस्य सन्निधानं न श्रूयतेऽतोऽसन्निहितत्वादप्यवगम्यते ॥१७॥

विवरणम्—मुक्तो जीवः सत्यसङ्कल्पबलेन जगदुत्पत्यादिकमपि करोति अथवा तदतिरिक्तब्रह्मानुभवमात्रमिति संशयः। तत्र परमेश्वरस्य परमसमतामुपगतोमुक्तो जगद्रचनामपि करोतीति पूर्वपक्षः। सिद्धान्तस्तु जगदुत्पत्यादिप्रकरणे समुत्पादकतया मुक्तस्याश्रवणात् असंनिहितत्वाच्च जगद्रचनाव्यापारवर्जितं ब्रह्मानुभवमात्रं करोतीति दर्शयितुमुपक्रमते "मुक्तस्य सत्यसङ्कल्पत्वमित्यादि" जगद्रचनाव्यापारवर्जितमेव परमैश्वर्यसत्यसङ्कल्पबलान्मुक्तस्य भवति प्रकरणात् असंनिहितत्वाच्चेति सूत्रार्थः। मुक्तोहि सत्यसङ्कल्पवान्भवतीति कथयित्वा तस्यान्यत् जगद्रचनादिव्यापारो भवति नवेति विचार्यते। तत्र मुक्तपुरुषस्य जगद्रचनाव्यापारो भवति अथवा केवलं ब्रह्मानुभव एवेति संशयः। तत्र "निरञ्जनः" इत्यादि श्रुत्या परमेश्वरेणातिसाम्यतायाः श्रुतत्वात परेशवत् मुक्तोपि जगतोरचनां करोतीति पूर्वपक्षः। "अत्राभिधीयते" इति

मुक्त पुरुष जगत रचनादि व्यापार भी करता है! अथवा केवल मुक्त पुरुष ब्रह्म का अनुभव ही करता है ऐसा सन्देह होता है। उसमें "मुक्त पुरुष परमेश्वर के साथ परम समता को प्राप्त कर जाता है।" इत्यादि वचन से सिद्ध होता है कि जगत रचना का व्यापार भी करता है ऐसा पूर्वपक्ष होता है। समाधान=सृष्टि प्रतिपादक वाक्य में कर्त्ता रूप से ब्रह्म का ही श्रवण होने से जगत् रचना व्यापार को छोड़ करके ब्रह्मानुभव रूप सुखानुभव मात्र में परमेश्वर के साथ मुक्त पुरुष की समता है। यह "यतोवा इमानि" इत्यादि सृष्टि प्रकरण से ज्ञात होता है। उस सृष्टि प्रकरण में मुक्त की चर्चा नहीं है। अतः

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ।४।४।१८।

ननु "तस्य सर्वेषु लोकेषु कामचारो भवति" [छा० ७।२५।२] इत्यादि श्रुतिभिर्मुक्तस्य जगद्व्यापारो व्यपदिश्यत इति चेन्न, परमात्मना लोकशासनाधिकारे नियुक्त प्रजापतिलोकस्थभोगेषु मुक्तस्य कामचारत्वं हि तादृशवचनैरभिधीयते । यतस्तत्र कामचारो भवतीत्यादिरूपैव वचनरचना दृश्यते ननु नियमयतीत्यादिरूपा ॥१८॥

"यतो वा इमानि" इत्यादिसृष्टिप्रकरणे सृष्ट्यादिकारणरूपेण परमेश्वरस्यैव जगद्रचयितृत्वेन श्रवणात् जगद्रचनां परित्यज्य केवलं ब्रह्मानुभवे एव मुक्तस्य सामर्थ्यं "जगद्व्यापारवर्जं समानोज्योतिषा" (बो.वृ.) इति वृत्तिकारोक्तेरिति सिद्धान्तः ॥१७॥

विवरणम्—ननु "तस्य सर्वलोकेषु कामचारो भवतीत्यादि" श्रुतिः प्रत्यक्षत एव मुक्तस्य सर्वत्र कामचारं दर्शयन्ती तस्य मुक्तस्य सर्वैश्वर्यवत्त्वं प्रतिपादयतीति चेन्न "आधिकारिक मण्डलोक्तेः" परमात्मना अधिकारे नियुक्ता ये प्रजापतयस्तेषां लोकस्थविभूतिभोगकामचारत्वं प्रतिपादयति ननु नियमयितृत्वमपि मुक्तस्य दर्शयतीति न कोऽपि दोष इत्याशयेन सूत्रव्याख्यानायोपक्रमते "ननु तस्येत्यादि" तस्य सर्वेषु-

असंनिहितत्व हेतु से भी यह जाना जाता है जगद्व्यापारातिरिक्त में ही ईश्वर समता जीव को है। तथैव जगद्व्यापार वर्जं समानो ज्योतिषा यह वृत्तिकार वाक्य भी इसी का पोषक है ॥१७॥

सारबोधिनी–"तस्य सर्वेषु लोकेषु" इति श्रुति मुक्त पुरुष को जगत रचना विषयक व्यापार का प्रतिपादन करती है ऐसा मत कहना, क्योंकि वह परमात्मा से लोकशासन के अधिकार में नियुक्त जो प्रजापति आदि है उन प्रजापति आदि लोकस्थ जो भाग तादृश भोग में मुक्त पुरुष की स्वेच्छाचारिता होती है। इस बात का प्रतिपादन करती है। उन प्रजापति आदि लोक

विकारावर्त्ति च तथाहि स्थितिमाह ।४।४।१९।

नन्वेवं संसारिजीववन्मुक्तस्यापि क्षयिष्णु लोकसुखभोक्तृतया तद्भोग्यमनित्यंस्यान्मुक्तस्य पुनर्जन्मजरामरणादियातनाः स्युरिति चोद्यं समाधत्ते–विकारवर्त्तिमुक्तो विनिर्मुक्तसमस्तविकारं :दिव्यानन्दगुणाकूपारं परमात्मानमक्षय्यधाम्न्यवस्थितानन्दविशिष्टमनुभवति तदीयलीला विभूत्यन्तर्गतांश्च कामानपि । तथाहि दिव्यगुणधाम्नि परस्मिन्नात्मन्यनुभवितुर्मुक्तस्य स्थितिमाह श्रुतिः "अथ ह्येवैष एतस्मिन्नदृश्ये" [तै० २।७] "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति [तै• २।७] इति ॥१९॥

लोकेषु इत्यादि श्रुतिर्मुक्तपुरुषाणां जगद्रचनाव्यापारं प्रत्यक्षतएव प्रतिपादयतीति चेन्न परमात्मनालोकशासनकर्मणिनियुक्ता ये पुरुषास्तदीयलोकेष्वेवमुक्तस्य कामचारादिमत्वं ज्ञापयति न तु तस्य सर्वनियामकत्व रूपपारमैश्वर्यमपि ज्ञापयतीति संक्षेपः ॥१८॥

विवरणम्–यथाबद्धविकारान्तर्गतभोगस्य भोगं करोति तद्वत् मुक्तस्यापि तथात्वे मुक्तस्य भोग्यमपि विनाशशीलं स्यादित्याशङ्क्य समा-

में मुक्तों की कामचारिता होती है ऐसी ही वाक्य रचना देखने में आती है। सर्व नियामकत्व मुक्त में है ऐसी बाक्य रचना नहीं देखने में आती है। इसलिए मुक्त पुरुष में सर्व जगदुपादानत्व सर्वनियामकत्व नहीं है । किन्तु ब्रह्मरूप सुख का अनुभव मात्र में ही समता होती है ॥१८॥

सारबोधनी—पूर्वोक्त क्रम से संसारी जीव के समान मुक्त पुरुष को भी उत्पादविनाशशाली सुख का भोक्ता होने से तदीय जो भोग्य है वह तो अनित्य होगा तब तो मुक्त पुरुष को मोक्ष के बाद भी जन्ममरण व्याधि प्रभृतिक अनेक प्रकारक क्लेश का अनुभव होगा । तब एतादृश मोक्ष के लिए कौन स्वस्थात्मा मोक्षार्थ प्रयत्न करेगा। शास्त्र से ज्ञात होता है कि मोक्ष सुख स्व-

दर्शयतश्चैवं प्रत्यक्षानुमाने ।४।४।२०।

जगद्रचनादयो व्यापाराः परब्रह्मण एव न मुक्तात्मनः । एवमेव श्रुतिस्मृतीदर्शयतः । "स तपस्तप्त्वा इदं सर्वमसृजत" [तै० २।६] "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः"

धातुमाह "नन्वेवं संसारिजीववदित्यादि" यथा संसारीजीवो विकारान्तर्गतभोगं करोति इति तस्य भोग्यं विनाशि तथा मुक्तस्यापि तादृशभोग्यकर्तृत्वे न तदीयभोगस्याप्यनित्यतास्यादिति तदामुक्तस्य जन्म मरणादिभयान्निवृत्तिर्नस्यादिति शङ्कां समाधातुमाह सूत्रकारः "विकारावर्त्तिचेत्यादि" विकारे वर्तमानोऽपिमुक्तः सर्वविकारवर्जितं परमात्मानं दिव्यगुणसागरमक्षयसाकेतानन्दविशिष्टमेवानुभवति तदीयलीला विभूतौ वर्तमानान् कामांश्चापिभुङ्क्ते । एतदेव श्रुतिरपि दर्शयति 'रसो वै सः' इत्यादीति ॥१९॥

विवरणम्—योयं जगद्रचनादि व्यापारः सर्वनियामकत्वादिकं स सर्वोऽपि व्यापारः परमेश्वरस्यैव नतु तदतिरिक्तस्य बद्धस्य मुक्तस्य नित्यमुक्तस्य वा भवति । इयमर्थं श्रुतिस्मृत्यादयः प्रतिपादयन्ति तदेव

र्गादि सुख के समान अनित्य तो नहीं किन्तु मोक्ष तो नित्य है । इत्याकारक शंका का निराकरण करने के लिए कहते हैं "विकारवर्त्तिचेत्यादि" विकार के अन्तर्वर्त्तीमुक्त पुरुष विनिर्मुक्त है सकल विकार जिसमें लोकोत्तर दिव्यानेक कल्याणगुण गण का सागरोपम परमात्मा परम पुरुष सकल जगत् का नियामक नित्य निरतिशय स्थान साकेत में अवस्थित आनन्द विशिष्ट परमात्मा का अनुभव करता है । तथा सकल नियामक भगवान् की जो लीला विभूति है उसके अन्तर्गत सकल कमनीय विषयों का भो अनुभव करता है । तथाहि दिव्य गुण के धाम पर आत्मा में तादृश अनुभव करने वाले मुक्त पुरुष की स्थिति को श्रुति स्वयं कहती है "वह अदृश्य परमात्मा रस स्वरूप है" उसका लाभ करके यह आनन्दित होता है ।" इत्यादिक ॥१९॥

[बृ० ३।८।९] "अहं सर्वस्य प्रभवोमत्तः सर्वं प्रवर्तते" [गी० १०।८] "जगत्सृष्ट्यादयो लीलाममेव राघवस्य च" (वसिष्ठसंहिता २२) "दृष्टि-निक्षेपमात्रेण यो लोकान् सृजति प्रभुः" (वाल्मीकिसंहिता ४९) इत्यादि श्रुतिस्मृतयः परमात्मन एवैकस्य जगद्रचनानियमनादिकर्तृत्वमभिदधुर्न-मुक्तात्मनः ॥२०॥

दर्शयितुमुपक्रमते "जगद्रचनादयोऽव्यापाराः" इत्यादि योयं सर्वजगतो-रचनाव्यापारः स सर्व एव परमेश्वरस्यैव नतु मुक्तात्मनो भवतीति श्रुति स्मृती प्रतिपादयतः। तथाहि "स परमात्मा तपस्तप्त्वा विचारं कृत्वा-परिदृश्यमानं सर्वं जगदुत्पादयामास। हे गार्गि अस्यैव परमात्मनः प्रशासने सूर्यादयो वर्तन्ते। अस्यैव भयेन सूर्यादिकानियतकालं सर्वं कुर्वन्ति" अहमेव सर्वस्योत्पादकोनान्योमदतिरिक्तो जगत उत्पादक इति तथा "त्रातारौ दीनदासानां सृष्टिसंहारकारिणौ। तामेव जानकीं वित्तजननीमात्मनां पराम्॥ श्रीरामं पितरं वित्त सत्यं ह्येतद्वचोमम। दृष्टिनिक्षेपमात्रेण यो लोकान् सृजति प्रभुः" (वाल्मीकीसंहिता) इत्या-

सारबोधिनी—स्थूल सूक्ष्म जड़चेतन साधारण जो जगत् उसका रचना व्यापार पर ब्रह्म का ही है किन्तु किसी मुक्तात्मा का यह व्यापार नहीं है। इस बात को श्रुति स्मृति समुदाय प्रतिपादन करते है। सूत्र में जो प्रत्यक्ष पद है वह श्रुति बोधक है। क्योंकि जैसे प्रत्यक्ष प्रमाण स्वप्रामाण्य में इतर प्रमाणा-नपेक्ष है उसी तरह श्रुति भी स्वप्राणाण्य में प्रत्यक्ष सापेक्ष है इसी तरह स्मृति भी स्वप्रामाण्य में अनुमान स्वप्रामाण्य में श्रुति सापेक्ष है। इसलिए सूत्र घटक अनुमान पद स्मृति का बोधक है। तथाहि "उस परमात्मा ने विचार करके इस स्थावर जंगम जगत् का उत्पादन किया"। हे गार्गि उस पुरुष के प्रशासन में रह करके सूर्यचन्द्रमादि स्वकीय व्यापार को अतंद्रित रूप से करते हैं" "मुझ परमात्मा से सकल जगत् उत्पन्न होता है" इत्यादि श्रुतिस्मृतिगण केवल एक परमात्मा को ही सर्वजगत्कर्तृत्व तथा सर्वनियामकत्व

भोगमात्रसाम्यलिङ्गाच्च ।४।४।२१।

परमात्मना सह साम्यन्तु मुक्तात्मनो भोगमात्र एव श्रूयते ,'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'' [तै० २।१] इति । तदपि भोगैश्वर्यसाम्यं परसङ्कल्पायत्तमेव न स्वातन्त्र्येणेति मुक्तैश्वर्यं जगद्रचनादिव्यापारवर्जितमेव ॥२१॥

दयः । एताः श्रुतिस्मृतयः परमात्मन एवैकस्य जगद्रचनाव्यापारं सर्वनियामकत्वं च प्रदर्शयन्तीति तस्मान्नजीवे तत्वम् ॥२०॥

विवरणम्—ननु यदि जगद्रचना व्यापारो मुक्तस्य न भवति तदा परमात्मसमत्वंमुक्तस्योच्यमानं कथं सङ्गच्छते इत्याशङ्कां निराकर्तुमुपक्रमते "परमात्मना सहेत्यादि "निरञ्जनः परमं साम्यमुपैति" इत्यादिना यत् परमसमतां बोधयति श्रुतिस्तद् भोगमात्रे परमसाम्यं न तु जगद्रचनादावपि तत्वम् "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति श्रुतेः एतदपि भोगैश्वर्यं साम्यमुक्तस्य परमात्मसङ्कल्पाधीनमेव न तु स्वातन्त्र्येण भवति । अतो मुक्तस्ययदैश्वर्यं तत् रचनाव्यापाररहितमेवेति न कोऽपि दोष इति संक्षेपः ॥२१॥

विवरणम्-ननु यथा क्षय्यसुखात्मकस्वर्गात् स्वर्गीजनः पुण्य समाप्तौ निवर्तते 'क्षीणेपुण्येमर्त्यलोकं विषन्ति' इति गीतोक्तेस्तथा का प्रतिपादन करते है । किन्तु मुक्त में रचनादि व्यापार का प्रतिपादन नहीं करती हैं ॥२०॥

साबोधिनि—परमात्मा के साथ जो मुक्त का समत्व प्रतिपादन किय गया है वह भोग मात्र के अंश में ही परम समत्व है क्योकि श्रुति "सह ब्रह्मणाविपश्चित" इस प्रकार से कहती है । यह जो भोगैश्वर्य में परमशमता है वह भी परमात्मा संकल्प के अधीन ही है । किन्तु स्वतंत्र रूप से नहीं इसलिए मुक्त पुरुष का जो ऐश्वर्यं है वह जगत् रचना व्यापार वर्जित है यह सिद्ध हुआ ॥२१॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।४।४।२२

सर्वस्वतन्त्रस्य परमात्मनो नियन्तृतया स्वेच्छया कर्हिचिन्मुक्तमपि जगति पुनरावर्तयेदिति शङ्कामपाकरोति—अनावृत्तिरिति । "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते" [छा० ८।१५।१] "मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः" [गी० ८।१५] इत्यादि वैदिकस्मार्तशब्देभ्योऽवगम्यते । यन्मि

सर्वतन्त्रस्वतन्त्रो भगवान् कमपिमुक्तं मोक्षान्निवर्तयिष्यति इत्याशङ्कां निराकर्त्तुमुपक्रमते "सर्वतन्त्र स्वतन्त्रस्येत्यादि" भगवान् हि सर्वतन्त्र स्वतन्त्र सकदाचिन्मुक्तमपि संसारे पुनरावर्तयेदित्याशङ्कां समाधत्ते सूत्रकारः "अनावृत्तिरित्यादि" यद्यपि सर्वेश्वर श्रीरामकर्तुमकर्तुमन्यथा कर्तुञ्च स्वतन्त्रस्तथापिस्वानन्यभक्त्या समाराधितं भक्तं स्वधाम्निसमा-

सारबोधिनि—ईश्वर के सर्वतन्त्र स्वतन्त्र होने से कभी मुक्त जीव को संसार में वास के लिये भेज सकते हैं इसका उत्तर अनावृत्तिःशब्दात् इस सूत्र से देते है। "स खल्वेवं वर्तयन् यावदायुवं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्त्तते' 'मामुपेत्यपुनर्जन्म दुखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः" इत्यादि श्रुति स्मृति वचनो से यह अवगत होता है कि मुक्त व्यक्ति की पुनरावृत्ति नहीं होती है। तो फिर

परान्नारायणाच्चापि कृष्णात्परतरादपि ।
यो वै परतमः श्रीमान् रामो दाशरथिः स्वराट् ।।

इत्यादिरूप से आगमोपवर्णित सर्व पर सर्वेश्वर श्रीरामचन्द्र जी जो कि निरङ्कुशैश्वर्य शाली परमकारुणिक शरणागतवत्सल है अपने आश्रय में आये प्रपन्नजन को अपने दिव्यधाम श्रीसाकेत में प्रेम पूर्वक ले आकर वहाँ से कैसे वापस मर्त्यभू में भेज सकते है ? यदि ऐसा हुआ तो

द्विः शरान्नाभिसन्धत्ते द्विस्थापयति नाश्रितान् ।
द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभाषते ।। (श्रीरामायण)

रङ्कुशैश्वर्यशक्तिशाली परमकारुणिकः परमपुरुषः शरणागतवत्सलः श्रीरामः स्वाश्रितप्रपन्नजनं निजभुवनसाकेतापरपर्यायमक्षयधामप्रेम्णा समानीय न पुनर्निवर्तयति। अत एवेयं चरमप्रतिज्ञापि सङ्गच्छते।

गतं न पुनरावर्तयति यतः प्रमाणशेखरवेदस्तथैव प्रतिपादयति "न स पुनरावर्तते" इति "मामुपेत्य पुनर्जन्मदुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः"। इत्यादि स्मृतिरपि मुक्तस्यानावृत्ति मेवदर्शयति। नहि भक्तवत्सलो भगवान् श्रीरामचन्द्रः कमपि भक्तं पुनरावर्त्तयति तदैव "सकृदेव प्रपन्नाय" इत्यादि तदीय प्रतिज्ञापि सङ्गताभवति तथैवाहुः श्रीआनन्दभाष्यकाराः–यतः स्मर्यते स्वाश्रितजनमनन्यभक्तमुद्दिश्य तस्य परमकारुणिकस्य परमपुरुषस्य सर्वस्मादुत्कृष्टे

भगवान् श्रीराम की इस प्रतिज्ञा की क्या दशा होगी? क्या सर्वेश्वर श्रीराम स्वाश्रित को पुनः त्याग देंगे! नहि नहि कभी नहीं यविकुल चक्र चूडामणि जगद्गुरु श्रीतुलसीदासजी के शब्दो में सुनिये शरणागतवत्सल श्रीरामचन्द्र जी क्या कह रहे है--

कोटिविप्रबध लागहिं जाहू। आएँ सरन तजऊँ नहि ताहू॥
आवत देखि सक्ति अतिघोरा। प्रनतारति भंजन पन मोरा॥
तुरत बिभीषन पाछें मेला। सनमुख राम सहेउ सोइ सेला॥

तो क्या स्वाश्रित जन का थोडा भी दुख सहन न करने वाले श्रीराम अपने धाम श्रीअयोध्या से मर्त्यलोक में प्रपन्नों को पुनः भेजेगे? सम्भव नहिं यदि ऐसा हुआ तो....

स्वच्छन्दं व्रजसुन्दरीजनविटादवद्धैकदारव्रते
लीलावेणुलसत्करात्त्रिभुवनत्राणाय चापस्पृशि।
चौर्याकृष्टवधुजनात्परिणतौ कीटादि मुक्तिप्रदे
व्यावृत्तं मम यादवाद्रघुपतौ चेतः स्वयं धावति॥

जगद्गुरु श्रीरामभद्राचार्य जी की कीटादि मुक्तिप्रदे इस उक्ति की क्या-

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ इति ॥
सूत्रावृत्तिः शास्त्रसमाप्तिं गमयति ॥२२॥

इति जगद्व्यापारवर्जाधिकरणम् ॥६॥

यत्प्रतिज्ञा "अप्यहं जीवितं जह्याम्" (श्रीरा. आ. १०।१८) इति ।

यतः–"परान्नारायणाच्चापि कृष्णात्परतरादपि ।
यो वै परतमः श्रीमान् रामोदाशरथिः स्वराट् ॥
यस्यानन्तावताराश्च कला अंशाविभूतयः ।
आवेशाविष्णुब्रह्मेशाः परब्रह्मस्वरूपभाः ॥
स एव सच्चिदानन्दो विभूतिद्वयनायकः ।
वात्सल्याद्यद्भुतानन्तकल्याणगुणवारिधिः ॥"

दशा होगी जब कि कीट पतङ्गों को मुक्ति दे देते है स्वप्रपन्न मानव को देकर वापस लेंगे कीटों के बराबर भी मान का मूल्य नहिं ! इनना हो नहीं

सुरोऽसुरोवाप्यथवानरोऽनरः सर्वात्मनायः सुकृतज्ञ मुत्तमम् ।
भजेतरामं मनुजाकृतिं हरिं य उत्तरान्ननयत्कोशलान् दिवम् ॥

श्रीव्यासजी की इस भागवतोक्त उक्ति की ओर भी देखें ! सर्वात्म भाव से श्रीरामाश्रितों को सुर असुर नर वानरादि कोई हो सब को वे स्वसाकेताख्यदिव्यधाम में ले गये है। सर्व मुक्ति प्रद परमदयालु की दया क्षीण हो जायगी जो पुनः अधः पात कर देंगे ! तब तो सर्वेश्वर श्रीराम की इस दिव्य प्रतिज्ञा की क्या दशा होगी !

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

इस प्रतिज्ञा वाक्य का सारांश यह है--जो मानव एक बार भी हे श्रीराम मै आप का हूं मेरी आप रक्षा करें इस प्रकार याचना करता है उसे मैं सर्वभूतों से अभय कर देता हूं यह मेरा व्रत है । इस मन्त्र का सर्व शास्त्रानुकूल

अस्तिद्वारावतीधाम धरान्तः पतिशोभनः ।
शृङ्गराग्रामसर्वस्वः सर्वसम्पद्विभूषितः ॥१॥
आतिथेयीं दधद्वृत्तिं बटुभिर्वैष्णवैर्वृतः ।
मठः शेषाभिधोदिव्योगुणव्रजनमण्डितः ॥२॥

इत्यादिरूपेण वशिष्ठसंहितोक्तेर्नकदापि स्वाश्रितान् परावर्तयति सर्वेश्वरश्रीराम इति सर्वं निरवद्यम् । सूत्रावृत्तिग्रन्थसमाप्तिद्योतन परेतिशम् ।२२।

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्यकृतौ श्रीरघुवरीयवृत्तिविवरणे जगद्व्यापारवर्जनाधिकरणम् ॥६॥

विवरणम्—ग्रन्थान्ते वृत्तिग्रन्थप्रयोजनप्रदर्शनपूर्वकं स्वं परिचाय यतिः-अस्तीत्यादिपञ्चभिः श्लोकैः । सर्वसम्पद्विभूषितः शृङ्गराग्राम श्रीशृङ्गपुराभिधनगरसर्वस्वस्वरूपः –

मध्ये मार्गपरिश्रान्तो विश्रामं प्राप्य शृङ्गिणः
आश्रमे परमारामे कृष्णोवचनमब्रवीत् ॥
त्वया संस्थापितां मूर्तिं विश्रामद्वारकापतेः ।
अदृष्ट्वा द्वारका यात्रा नराणां निष्फला भवेत् ॥
यथा व्यासमनालोक्य काशीयात्रा हि निष्फला ।
तथैव द्वारकायात्रा ऋतेऽत्राऽगनाद् भवेत् ॥

इत्यादिरूपेण श्रीकृष्णेनैव प्रसंशितत्वेन सर्वशोभायुक्तः मुक्तिप्रदायकसप्तपुरीष्वन्यतमधामविश्रामद्वारिकेति नाम्ना प्रसिद्धोऽस्ति विशद विवेचन मैंने श्रीवैष्णवमताब्जभास्कर की प्रभा कीरण नामक टीका में किया है अतः विशेषार्थियों को वही देखना चाहिए अतः भगवद्दिव्यधाम साकेत प्राप्ति रूप मुक्तात्मा की पुनरावृत्ति नहीं होती है यह सर्वशास्त्र सम्मत है। सूत्र की आवृत्ति ग्रन्थ समाप्ति सूचक है ॥२२॥

इति जगद्व्यापारवर्जाधिकरणम्

तत्रस्थितस्तदध्यक्षो ब्रह्मविद्याविशारदः ।
श्रीमद्रघुवराचार्योविरक्तः शास्त्रवित्तमः ॥३॥
मातङ्गग्रहनिध्यब्जमिते वैक्रमवत्सरे ।
व्यरोरचदिमां वृत्ति वेदान्तार्थप्रकाशिकाम् ॥४॥

भारतपश्चिमदिशि यत्र गुणव्रजजनमण्डितः आतिथेयीं वृत्तिं दधद्नानादिगन्तागतसाङ्गवेदाध्ययनशीलबटुभिः श्रीवैष्णवैश्चवृतः सर्वदा संकुलः श्री रामानन्दाचार्यपीठत्वेन विश्वेऽतिप्रसिद्धताङ्गतो मठः छात्रादिनिलय इति शास्त्रचरितार्थकः श्रीशेषमठाभिधोदिव्यः पीठः सञ्चकास्ति । तदध्यक्षः श्रीरामानन्दाचार्यपीठाचार्यः–

यतेन्द्रियः शुचिः शुद्धवेशधृक् सुकुलोद्भवः ।
सदाचारपरोनम्रः शास्त्रज्ञो देशनापटुः ॥
विरक्तधर्मनिरतोध्यानाभ्यासी सुबुद्धिमान् ।
निग्रहेऽनुग्रहेचैव समर्थो देशिकोमतः ॥

इत्यादिरूपेण श्रीवैष्णवमताब्जभास्करे जगद्गुरुश्रीरामानन्दाचार्यचरणदिव्यादेशनिदर्शनभूतः शास्त्रवित्तमोविरक्तोब्रह्मविद्याविशारदः सर्वश्रियायुक्तो "जगद्गुरुश्रीरामानन्दाचार्य" इत्युपाधिबिभूषित श्रीरघुवराचार्यस्तत्रस्थितोऽस्ति श्रीसम्प्रदायस्योनचत्वारिंशत्तमाचार्यत्वेन वर्तत इत्यर्थः । तेनैव वेदान्तार्थप्रकाशिका श्रीमदाचार्यप्रसादितानन्द-

सारबोधिनी—अन्त में पांच श्लोकों से आचार्यजी अपना स्वल्प परिचय लिखते हुए ग्रन्थ को श्रीरामार्पण करते हैं--भारत वसुन्धरा के पश्चिम भाग में मोक्ष दायी पुरीयो में से एक सर्व सम्पत्ति से विभूषित शृङ्गपुर गाँव का सर्वस्व भूत श्रीविश्राम द्वारका नामक दिव्य धाम है जहाँ आतिथेयी वृत्ति को धारण किये सांग वेदाध्ययन शील नाना देशागत वैष्णव बटुओं से युक्त गुणिजनों से सर्वदा शोभित श्रीशेषमठ नामक दिव्य धाम संशोभित है । उसी श्री रामानन्द पीठ के आचार्य ब्रह्मविद्या विशारद सर्व शास्त्रविद विरक्त शिरो-

अनयाजानकीजानिर्निदानं जगतः परम् ।
वृत्तिकृज्जीवनप्राणः श्रीरामस्तोषमाप्नुयात् ॥५॥

इति श्रीमद्भगवज्जगद्गुरु श्रीरामानन्दाचार्यान्वयप्रतिष्ठित जगद्गुरु श्रीमदनुभवानन्दाचार्य द्वारकेण प्रस्थानत्रयानन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यदिव्यसिंहासनाधिष्ठितोनचत्वारिंशत्तमाचार्येण ब्रह्मविज्जगद्गुरु श्रीरामानन्दाचार्यरघुवराचार्येण विरचितायां श्रीरघुवरीयवृत्तौ (ब्रह्मसूत्रीयवेदान्तवृत्तौ) चतुर्थाध्यायस्य चतुर्थः पादः । श्रीमते रामानन्दाचार्याय नमः ।

भाष्यार्थप्रकाशनपरा मातङ्गग्रहानिध्यब्ज (१९९४) मिते वैक्रमाब्दे इमां श्रीसम्प्रदायसर्वस्वभूतानखिलपूर्वाचार्यानुगृहीतवेदान्तप्रबन्धार्थप्रकाशनपरां यथार्थनामिकां वृत्तिं व्यरीरचत् । तया च वृत्तिकृज्जीवनप्राणो जगतः परमनिदानं श्रीजानकीजानिः श्रीरामस्तोषमाप्नुयात् ।॥१-५॥

इति श्रीमद्भगवद्रामानन्दाचार्यान्वयप्रतिष्ठित श्रीमदनुभवानन्दाचार्यद्वारकमहामहोपाध्यायाद्यनेकोपाधिसमलङ्कृत जगद्गुरु श्रीरामानन्दाचार्य विरुदभाग् ब्रह्मवित्स्वामि श्रीरघुवराचार्य वेदान्तकेसरिप्रधानसच्छिष्य प्रस्थानत्रयानन्दभाष्यकार जगद् गुरु श्रीरामानन्दाचार्य प्रधानपीठ शङ्कुधारावारणिस्थानन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यपीठाचार्य जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्र कृतिसु श्रीरघुवरीयवृत्तिविवरणे तात्पर्यदीपाख्ये चतुर्थाध्यायस्य चतुर्थः पादः ।

॥ श्रीसीतारामचन्द्रार्पणमस्तु ॥

मणि महामहोपाध्याय जगद्गुरु श्रीरामानन्दाचार्य रघुवराचार्य वेदान्त केसरी जी ने सर्व पूर्वाचार्य के वेदान्तनिबन्धार्थ को प्रकाशित करने वाली इस श्रीरघुवरीय वृत्ति को विक्रम सम्बत १९९४ में रचना की, इससे वृत्तिकारके (मेरे) जीवन प्राण जगत् के अभिन्ननिमित्तोपादान कारण श्रीजानकी जी के स्वामी श्रीरामचन्द्र जी सन्तुष्ट हों ।

श्रीमद्रामचन्द्रचरणौशरणं प्रपद्ये

इति जगद्गुरु श्रीरामानन्दाचार्य रामप्रपन्नाचार्य कृपापात्र स्वामी रामेश्वरानन्दाचार्य कृत श्रीरघुवरीय वृत्ति सारबोधिनी में चतुर्थाध्याय का चतुर्थपाद

श्रीरामाय नमोनमः